


सुधी-ग्रन्थमाला—७

SUDHI SERIES—7

श्रीराधाचरितमहाकाव्यम्

(संस्कृतव्याख्यायुतम्)

आचार्यश्रीकालिकाप्रसादशुक्लः

शास्त्रचूडामणिः

Sudhi Sereis—7

ShriRadhacaritamahakavyam

OF

Acharya Kalika Prasad Shukla

Editor

Pandit Rama Narayana Shukla

Acharya, M. A., B. Ed.

Pradhanacharya

yagyashala Sanskrit Pathashala

Mathiya Shukla

Distt. Deoria (U. P.)

sanskrit commentory by

Dr. Girijesha Kumar Dixit

Vyakaranacharya, Ph. D.

S. Sanskrit University, Varanasi

SUDHI PRAKASHANA

VARANASI

1985

सुधीग्रन्थमालायां सप्तमं पुष्पम्

आचार्यकालिकाप्रसादशुक्लविरचितं

श्रीराधाचरितमहाकाव्यम्

(संस्कृतव्याख्यायुतम्)

सम्पादकः
पण्डितरामनारायणशुक्लः
आचार्यः, एम. ए., शिक्षाशास्त्री,
देवरियामण्डलान्तर्गतमठियाशुक्लग्रामे
यज्ञशालासंस्कृतपाठशालायाः प्रधानाचार्यः

व्याख्याकारः
डा० गिरिजेशकुमारदीक्षितः
व्याकरणाचार्यः, विद्यावारिधिः,
सं० संस्कृतविश्वविद्यालयः, वाराणसी

सुधी प्रकाशनम्

१९८५ ई०]   वाराणसी   [२०४१ वि०

प्रकाशक :
सुधीप्रकाशन
पो० बा० १०४९,
वाराणसी—२२१००१

Published By
Sudhi Prakashana
P. B. 1049,
Varanasi—221001

प्रथमसंस्करण : १९८५ First Edition : 1985

मूल्य : ५० रु०
(पञ्चाशद्रूप्यकाणि)

Price : 50/-
(Fifty Rupees)

मुद्रक :
गौरीशङ्कर प्रेस,
मध्यमेश्वर, वाराणसी

Printed at
The Gauri Shankar Press
Madhyameshwar, Varanasi

प्रकाशकीयम्

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥

मान्या विद्वन्मूर्धन्याः !

प्रत्नस्य पालि-संस्कृतसाहित्यस्य संरक्षणार्थम्; नव्यस्य च तस्य संवर्धनार्थमस्माभिरेतत् सुधी-प्रकाशनं समारब्धम् । अत्रेदानीं यावद् दश ग्रन्थाः प्रकाशिताः । तेष्वष्टौ प्राचीनाः, द्वौ च रचनाकालवशेन नवौ । अष्टास्वपि प्राचीनेषु तेषु ग्रन्थेषु पाणिनिशब्दशास्त्रालङ्कारभूतः श्रीमद्वामनजयादित्यविरचितः काशिकावृत्तिग्रन्थः (न्यास-पदमञ्जरीव्याख्यासहितः) षट्सु भागेषु विभज्य प्रकाशनयोजनायां गृहीतः । सप्तमस्तु श्रीमद्भर्तृहरिविरचितो वाक्यपदीयग्रन्थः (ब्रह्मकाण्डमितः) कयाचिन्नव्यया व्याख्यया विभूषितः प्रकाशितः । अष्टमेस्तु प्राचीनानां मीमांसा-वेदान्त-साङ्ख्य-योग-न्याय-वैशेषिकाणां दर्शनानां सूत्राणि संगृह्य विदुषां सम्मोदाय ग्रन्थरूपेण प्रकाशितानि । एवमिमेऽष्टावपि ग्रन्थाः प्राचीनसाहित्यनिधिभूताः वर्तमानसमृद्धपुस्तकालयेष्ववश्यमेव संग्रहणीया विदुषामन्तेवासिनामनुसन्धित्सूनां च महान्तमुपकारं विधास्यन्तीति दृढीयान् विश्वासः ।

अथ चावशिष्टौ द्वौ ग्रन्थौ साहित्यशास्त्रस्य पुष्टये संवर्धनाय च प्रकाशितौ । तत्रास्ति प्रथमो भास्करभावभानवः (सूर्यशतकम्) । सूर्यशतकमिदं न केवलमष्टोत्तरशतश्लोकानां संग्रहभूतं काव्यम्, अपि तु सौराराधनपराणां भक्तानां जिज्ञासूनां च कृते विशिष्टमहत्त्वाभायीति सूर्यसाधकास्तत्त्वज्ञा मुनिकल्पा विद्वांसोऽभिदधति ।

अपरश्चायं राधाचरितमहाकाव्यनामको ग्रन्थो महाकविकालिकाप्रसादशुक्लप्रणीतो भवतां करकमलेषु समुपाह्रियते । अत्र कविना राधाकृष्णौ न सामान्येनोपवर्णितौ, अपितु श्रीराधाया आद्यापराशक्तिरूपम् श्रीकृष्णस्य

च परमेश्वरत्वं बहुभिर्मनोहारिभिश्छन्दोजालैरतीव कोमलकान्तपदावलीभिः, विशिष्टैश्चालङ्कारैस्तथा गुम्फितम्, येन काव्यरसिका अत्र काव्यमनुजिघ्रेयुः, भगवच्चरणारविन्दानुरक्ताश्च काव्यमिदं पाठम्पाठं भगवच्चरणारविन्दमनुध्यायेयुः । किमधिकम्, अत्र रासलीलावर्णनमपि शान्तरसपरिप्लुतमेवेत्यस्य काव्यस्य वैशिष्टचम् ।

भक्ति-ज्ञान-वैराग्यमिश्रितमिदं मौलिकं काव्यं काव्यरसिकानां भक्तानाँ चेत्युभयेषां कृते प्रमोदावहं स्यादित्याशास्ते—

प्रकाशकः

मकरसंक्रान्तिः
१४-१-८५
वाराणसी



हिन्दूधर्मोद्धारक, कलिवामनावतार
यतिचक्रचूडामणि, जगद्गुरु,
आचार्यसम्राट्, अनन्तश्रीविभूषित,
स्वामी श्रीरामानन्दाचार्यजी महाराज



सिन्ध शिकारपुरी आवलावाला
श्री स्वामी महन्त लक्ष्मणदास जी महाराज

गुणानुकीर्तनं तावत्

अहर्निशं तपःस्वाध्यायनिरतानां सततभगवच्चरणारविन्दध्यानक्षपितकल्मषाणां साधुजनसमर्चितपादपङ्कजानां सौजन्यसारोदधीनां हरद्वारस्थगोकुलधामपीठाधीश्वराणाम् आकारानुरूपगुणानां करुणावरुणालयानां श्रीमतां श्रीलश्रीलक्ष्मणदासमहाभागानां कृतज्ञतां कैः शब्दैः प्रकाशयेयम्, येषामकारणस्नेहेनैव केवलेन काव्यमिदमिदानीं तत्त्वज्ञानां सदयहृदयानां मात्सर्यशून्यानां पण्डितविदग्धानां करकमलान्यञ्चति ।

महात्मभिरेभिः परुत् कदाचिद्धर्मप्रवचनप्रसङ्गे काव्यस्यास्य कतिपयश्लोकानां श्रवणसमकालमेव प्रमुदितमनसा अस्य प्रकाशनविषये कविः पृष्टः । यथाकथमपि च कवेरर्थसङ्कोचं ज्ञात्वा तत्कालमेव समुपस्थितः कश्चिद् भक्तोऽस्य प्रकाशनाय समादिष्टः । गुरोराज्ञां शिरोधार्यां कृत्वा सद्य एव तेनास्य प्रकाशनव्ययभारः स्वीकृतः । इति स भगवच्चरणारविन्दाराधनपरो वन्दनीयचरणो गुरुः, आज्ञाकारी संस्कृतसंरक्षको भक्तश्चास्माकमुभावपि श्लाघ्यौ । एतादृशानां धर्मपरायणानामुपस्थित्यैवैतत् संसारचक्रं सुखेन परिचाल्यते ।

वैराग्यव्यथितारितापहृदयो मूर्त्या च शान्तिप्रदः,
विद्याख्यातयशोभिरामवदनः सल्लक्षणो लक्ष्मणः ।
द्वारे पापहरे हरस्य च हरेः पीठाधिपः साम्प्रतम्,
राधाकाव्यमिदं प्रकाशमनयद् द्रव्यप्रदानान्मुदा ॥

पूज्यानामर्चनं मुदा

भारतीयसंस्कृतिसंरक्षकाः, प्रदेशे ध्यानेकसभासमितीनामध्यक्षा

आचार्यश्रीकरुणापतित्रिपाठिनः

शास्त्रारण्यविहारवारणकुले शार्दूलविक्रीडित
विद्यावारिधिपण्डितेन्द्रसदने चन्द्रायमाण श्रिया ।
विद्वन् श्रीकरुणापते लसतु ते पाथोजपाणौ मुदा
राधाकाव्यमिदं प्रसादवचनं दिव्यप्रसादोदयम् ॥

*

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदवेदाङ्गसङ्कायाध्यक्षचराः
शास्त्रचूडामणयः पण्डितश्रीभूपेन्द्रपतित्रिपाठिनः

अन्तेवासिसमर्चिताब्जचरण स्फीतावदातान्तर,
दीव्यद्वाक्पटुताप्रसादितसदोविद्वद्वरेण्याकुल ।
श्रीभूपेन्द्रपते तवाञ्जलिपुटे संशोभतां कामधुक्,
राधाकाव्यमिदं प्रसादवचनं दिव्यप्रसादोदयम् ॥

*

अन्ते च—

वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
पुराणविभागे प्राध्यापकाः श्रीकपिलदेवत्रिपाठिनः

दीव्यत्पुराणसमवाप्तसमस्तवाञ्छः
साहित्यवार्धिपरिशीलनदत्तचित्तः ।
वाग्मी त्रिपाठिकुलभूषणचारुहासः
भव्याकृतिः कपिलदेवबुधो विभायात् ॥

*

हृषीकेशे मुनीश्वरसंस्कृतमहाविद्यालये प्रधानाचार्याः

श्रीश्रीनिवास-उपाध्यायाः

श्रियो निवासोऽपि धियो निवासः
सतो निवासोऽप्यसतोऽनिवासः ।
भूमौ निवासोऽपि गिरौ निवासः,
श्रीश्रीनिवासो जयतात् समन्तात् ॥

*

प्रस्तावना

यामाद्यां प्रवदन्ति देवमुनयः शक्तिं परामद्भुताम्,
श्रीकृष्णोऽपि विभावयत्यनुदिनं दिव्यां निजाह्लादिनीम् ।
यां गोपीति पदेन नौति नियतं वेदोऽखिलः सर्वदा
तां राधां सततं नमामि शिरसा सौवर्णवर्णां मुदा ॥

अद्यत्वे श्रीवृन्दावनधाम्नि व्रजवलये स्थानान्तरेषु च सच्चिदानन्दस्य परब्रह्मणो जगदुत्पत्तिस्थितिप्रलयकारणस्याप्यकारणस्य श्रीकृष्णस्य कयाचिदनिर्वचनीयया शक्त्या चराचरात्मकस्य जगतः सञ्चालनं सम्पद्यत इति मन्यन्ते समेऽपि वेदशास्त्रपरिशीलनशालीना विपश्चिदपश्चिमा महानुभावाः । योगाभ्यासक्षपितकल्मषैरमलात्मभिमुनिभिरियमेवानुपमा परात् परा शक्तिः 'राधा, लक्ष्मी, दुर्गा, सरस्वती, सावित्री' प्रभृतिभिस्तैस्तैरभिधानैस्तेषु तेषु शास्त्रेषु मुक्तकंठं प्रगीयते । किम्बहुना, इयमेव परा शक्तिराद्या शक्तिर्वेति विविधपदैः श्लोक्यते शास्त्रेषु—

गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चधा स्मृता ॥
(देवीभागवते ९।१।१)

इयञ्च जगदादिभूतस्य भगवतः श्रीकृष्णस्याह्लादिनी परा महती शक्तिरथवा आद्या प्रकृतिर्भगवतो भिन्ना नास्ति, तत्स्वरूपरूपैव सदा विराजतेतमाम् । 'लोकवत्तु लीलाकैवल्यम्' इति सिद्धान्तात् तां तां लीलां विधातुं तत्तत्स्वरूपं कलयति ।

वस्तुत एकैव सा शक्तिस्तत्तदुद्देश्येन तां तामाकृतिं परिदधाति । जगत्परिपातुकामा पवित्रितविष्णुवामपादा लक्ष्मीरूपा, मर्यादां द्रढयितुं कामाऽलंकृतश्रीरामवामभागा सीतारूपा, श्रीकृष्णं नर्तयितुकामा रसस्वरूपा राधारूपा, तपः प्रभावं प्रदर्शयितुकामा पार्वतीरूपा भवति ।

'एकमेव द्विधाऽभवत्' इति रीत्या राधाकृष्णयोर्मनागपि पार्थक्यं न प्रतीयते । अतः श्रीराधास्वरूपमवगन्तुं प्राक् श्रीकृष्णस्वरूपमगन्तव्यम्, अन्यथा तयोरैक्यादेकस्य बोधाभावेऽपरस्य बोधः खपुष्पायमाणः स्यात् ।

'कृष्णस्तु भगवान् स्वयम्' इति अभियुक्तोक्त्या श्रीकृष्ण एव नराकृतिलीलाधाम, आनन्दचिन्मयरसोदधिः, मन्मथमन्मथः, सर्वाङ्गसुभगो लसति ।

स्वमेव माधुर्यरसमास्वादयितुमाह्लादिनीं शक्तिं श्रीराधामभिव्यनक्ति। श्रीराधैव श्रीकृष्णः, श्रीकृष्ण एव श्रीराधा। तयोर्द्वयोः कश्चनापि भेदो नास्ति। अनयो रसमधुरा लीलापि सत्या नित्या च विलसति। श्रीकृष्णस्य नित्यस्य नवीनस्य माधुर्यस्य प्रादुर्भाव श्रीराधैव। भगवतः श्रीकृष्णस्य नित्याया नवीनाया माधुर्यसरितः प्रकाशस्थली श्रीराधायाः प्रत्यहं वर्धमानोत्कतैव। जगन्मूलभूतायाः श्रीराधाया विभुरप्यनुरागः प्रतिक्षणं वर्द्धनशीलः। एवमपि श्रीकृष्णस्यापि माधुर्यं नित्यं सदपि वस्तु नवीनमिव लक्ष्यते। श्रीकृष्णस्य सामीप्यमेव श्रीराधायाः प्रेम्णो वर्द्धनशीलता, श्रीराधायाश्च सान्निध्यमेव श्रीकृष्णस्य माधुर्यस्य नवनवायमानता विद्योतते।

इयं हि शब्दैः प्रतिपादयितुमशक्या लीला निरवधिकालं यावत् प्रवर्तत एव। श्रीकृष्णस्य माधुर्यं श्रीराधाया औत्कण्ठयञ्चातीतमर्यादं विभाति। भगवती श्रीराधा श्रीकृष्णस्य माधुर्यं सततमास्वादयन्त्यपि कदापि तृप्तिं नाप्नोति, न च तस्य माधुर्यस्य कदाप्यन्तो भवति। अपितु श्रीराधाया माधुर्यं पिपासोत्तरं प्रवर्द्धमानैव लक्ष्यते। श्रीराधाया इयं काचनानुपमा साधना, यया सा प्रतिपलं श्रीकृष्णस्य वदनविधुं विलोकयन्ती भवेत्। साधानायां चास्यां कापि स्वमङ्गलकामना नास्ति, न चापि स्वदुरितक्षयाकांक्षा, न च पराभक्तिप्राप्तिभवना, न च शाश्वतमुक्तिसमीहा। तत्रेयमेव समीहा मनसि सततं समुदेति यत् परमप्रेमास्पदं श्रीकृष्णो मम स्मृतिपथं संरोहतु। इयमेव भावना सद्भावना वर्तते। भावनाया अस्याः साक्षान्मूर्तिः श्रीराधाऽस्ति। अत एव श्रीराधामाधवयोर्नितान्तमभेदेऽपि सततं समाराध्यते।

श्रीराधामाधवयोर्नितान्तमभेदेऽपि श्रीराधा श्रीमाधवस्य निरुपधिभक्ता, प्रिया, आराधिका चासीत्। एवमेव श्रीराधा माधवस्यापि समाराध्याऽस्ति। निखिलमपीदं प्रेमसाम्राज्यस्य निर्मलं मनसः शान्तिप्रदं भूरिभाग्यलभ्यं पृथक्-पृथक् स्वरूपमस्ति। वस्तुत एकमेव वस्तु तान् तान् साधकानुद्दिश्य तांस्तान् पथो निर्दिशति। यस्मै साधकाय यः पन्था रोचते, स साधकस्तं पन्थानमाश्रयते। यः साधको भगवतो निरतिशयं प्रेमाणमभिलषति, तस्मै स एव प्रेमपन्थाः समुचितः।

श्रीराधायाः श्रीमाधवविषयकानुरागे कुत्रापि लौकिकवासनाया गन्धमात्रमपि नास्ति। स चानुरागः स्फटिकमणिरिवामलो भागीरथीप्रवाह इव सततं प्रवहन् क्वचनापि कदाप्यविच्छिन्नः कामवासनाशून्योऽहन्ताममतालेशरहितः किमपि प्रयोजनमसमीक्षमाणोऽगणितलोकाभिशापो निखिलायां निशि निखिलेऽपि दिवसे निखिलायामपि दिशि सकलेऽपि कर्मणि, किम्बहुना,

निखिलमपि चराचरात्मकं ब्रह्माण्डं परमप्रेमास्पदं श्रीकृष्णमेव पश्यति, तत्-सुखसुखित्वभावनयैव सर्वमाचरति, सर्वत्र व्यवहरति; मनागपि स्वसुखं न गणयति ।

अस्यां प्रेमसाधनायां लौकिकचक्षुषा दृश्यमानायां शृङ्गाररसाभासः प्रतीयेत प्राकृतप्राणिनाम् । कदाचित् तु प्रतीयते यदत्र लौकिकभोगकाम-सुखादिकमस्ति । परन्तु अलौकिके परमप्रेमास्पदे सच्चिदानन्दे परमब्रह्मणि लौकिकतायाः प्रवेश एव दुष्प्रवेशः । एतद् वस्तु यथायथं समवगन्तुं पूर्वं परा भक्तिः श्रीराधामाधवयोरर्जनीया । तत्प्राप्त्यनन्तरं तयोरगम्यं स्वरूपं ज्ञातं भवेत् । ततश्च तयोर्लीलाऽवगता भविष्यति । एतदर्थं निखिलमपि लौकिकं वस्तु परिहेयम्, 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज'—इति तत्प्रतिज्ञा-वाक्यं सततं ध्येयम् ।

श्रीराधामाधवयोर्वेदैरपि दुर्ज्ञेयम्, नेति नेति पदैरन्विष्यमाणं परया भक्त्यैव गम्यमानं परमं रहस्यं यावज्ज्ञातं न भवेत्, तावत् सर्वापि तयोर्लीला ग्राम्यकथेव प्रतिभायात् । यतो हि सकलेभ्योऽपि पुरुषार्थेभ्यो विलक्षणोऽयं योगिभिरपि दुरधिगमः पदार्थः । प्रथमन्तु गोपीरहस्यमेव दुर्बोधम्, राधा-रहस्यस्य तु कथैव का ?

साधारणानां जनानान्तु वार्ता दूरे तिष्ठतु, विदुषामपीदं रहस्यमद्यापि वर्तते यत् परमपुरुषार्थे मोक्षेऽपि निरभिलाषा श्रीराधा केवलं श्रीकृष्णस्य प्रेमाणमेवाभिलषति । सर्वं कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थे भगवति परमेश्वरे भक्तिर्भवेत् परं तस्याः फलं नाभिलष्येत । कीदृशीयं भक्तिः, कश्चास्या भक्तेः प्रकारः, कीदृशश्च त्यागः, सर्वमेतत् रहस्यमेव वर्तते ।

इदं त्वतीव रहस्यं यत् भक्तौ तस्यां परमाराध्यानां गोपीनामापाततः सर्वविधस्य शृङ्गारस्य भोगस्य च प्रतीतिर्भवति । परन्तु शृङ्गारेण तेन भोगेन च तेन गोपीनां स्वः कश्चन स्वार्थो नास्ति । केवलं परमप्रेमास्प-दस्य सच्चिदानन्दस्य श्रीकृष्णस्यैव सुखसमीहायामेव तासां प्रत्येकं श्वास-प्रश्वासयोरुपयोगः, मनसः सूक्ष्मातिसूक्ष्मवृत्तेः प्रयोगः, शरीरस्य सर्वस्याः क्रियाया विनियोगश्च स्वभावत एव दृश्यन्ते । परन्तु परमस्यास्य त्यागस्य भोगस्य च सहभावः प्राकृतप्राणिनां चेतांसि बलादान्दोलयतीति चित्रम् । आन्दोलनेऽस्मिन् तेषां कश्चन प्राक्तनः संस्कार एव हेतुः, किमत्र कर्त्तव्यम् ! अत एवाखिलब्रह्माण्डनायके परात्परब्रह्मणि निष्णातः परमहंसः श्रीशुकदेवः सन्निहितमृत्युं विज्ञातनिखिलधर्मरहस्यं परीक्षितं रासलीलां श्रावयन् पुल-कितकलेवरो हर्षाश्रुबिन्दुसमर्चितवामनयननीरजो गदगदगलः सकलकल्म-षापहारकं भुक्तिमुक्तिप्रदायकं गुह्यातिगुह्यं रासलीलारहस्यं प्रकाशयति ।

प्रेमलक्षणभक्तिसाम्राज्यसिंहासनमध्यासीनः श्रीचैतन्यमहाप्रभुर्गोपीनां श्रीराधायाश्च श्रीकृष्णविषयकं भावं स्मारंस्मारं बाह्यजगज्ज्ञानशून्यः, किम्बहुना, आत्मानमपि विस्मृत्यानन्दोदधौ निमज्जति ।

अद्वैतवादस्य डिंडिमघोषं विदधता ब्रह्मबोधोदधिकृतावगाहेन श्रीमधुसूदनसरस्वतीपादेनापि मुक्तकण्ठमुद्घोष्यते—

अद्वैतवीथीपथिकैरुपास्याः स्वानन्दसिंहासनलब्धदीक्षाः ।
शठेन केनापि वयं हठेन दासीकृता गोपवधूविटेन ॥

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियम्,
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते ।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरम्,
कालिन्दीपुलिनोदरे किमपि यन्नीलं महो धावति ॥

अत्र 'शठेन गोपवधूविटेन' इत्यनेन दास्यभावस्य पराकाष्ठा व्यज्यते । वस्तुतः प्रेमलक्षणायां भक्तौ दास्यस्य शरणागतेश्चाप्रतिमं मूल्यमस्ति । वस्तुतस्तद्विनाऽऽराध्यस्य प्राप्तिरेव न सम्भवति ।

अपरं चान्यत्रोक्तम्—

निगमतरोः प्रतिशाखं मृगितं मिलितं च तत्परब्रह्म ।
मिलितमिदानीमङ्के गोकुलपङ्के सहाक्षीणाम् ॥

मथितनिखिलपापतापो भक्तशिरोमणिर्मिथिलामिहिरः श्रीविद्यापतिरमलमनसा श्रीराधामाधवयोर्माधुर्यरसाप्लावितान् गुणान् गायं गायं परमां प्रीतिमाप्नोति । परन्तु चित्रमेतद् यदनेके विख्याता मनीषिणः प्रख्याताः कवयश्चापि दिव्यरसस्वरूपयोः श्रीराधाकृष्णयोर्मधुरां लीलां लौकिकनायकनायिकयोर्लीलामिव वर्णयन्तो मनागपि न संकुचन्ति । तथैव तयोरन्येऽपि भावा वर्णिता दृश्यन्ते आधुनिककाव्येषु । मन्ये, कवीनाममीषां श्रीराधाकृष्णयोर्लीलाया लौकिकदृशा वर्णनकलया साधारणजनेषु तथा दुष्प्रभावः पतितो येन सहृदयहृदयानां मनांसि भृशमुद्विजन्ति । तयोश्च पारमार्थिकं दिव्यातिदिव्यमलौकिकं स्वरूपं विस्मृत्य साधारणा जनाः पित्तदोषदूषितेन चक्षुषेव मलिनं निभालयन्ति ।

परमार्षदृष्टयो भक्तिरसोदधिक्षालितसकलकिल्बिषाः श्रीजयदेवप्रभृतयो भक्तशिरोमणयः श्रीराधाकृष्णौ साक्षात् परब्रह्म मत्वानतिशयमधुररसस्य दिव्यां धारां प्रवाहितवन्तः । परन्तु परमक्लेशास्पदमिदं यदमीषामपि भक्तानां काव्यानां लीलाचित्रणस्य चापि कुत्सितस्य कामस्य परिपाक

एवोपयोगो दृश्यते। श्रीराधामाधवयोः परमं पवित्रं दिव्यमनतिशायि च प्रेम कुत्सितवासनापूर्त्तावुपयुज्यमानं सम्प्रति दृश्यते। अत एव श्रीराधा-रहस्यं कुत्सितरहस्यमिव जनेषु प्रसिद्ध्यति।

कामः काममन्धो भवति, तस्य परमं लक्ष्यमिन्द्रियतर्पणमेव। अतः कामाग्निकवलितमानसो मनुष्यः स्वयं स्वस्य नाशस्य कारणं भवति। परन्तु शुद्धो लौकिकवासनाविरहितो दिव्यश्च स भगवत आनन्दस्वरूपमेव दर्शयति। लौकिककामादधः पातो भवति। भगवति प्रेम भगवदानन्दमा-स्वादयति। परमादर्शभूतं निष्कलङ्कं देवर्षिनारदादिभिरपि सततं समर्च्यं प्रेमसाम्राज्यं राधाभाव एव। अत एव स ध्येयो गेयः कीर्त्तनीयश्च।

अनेकैर्वीतरागैर्वीतकल्मषैर्मुनिभिः श्रीराधायाः प्रेमजलधौ निमग्नै-रनेके रत्नराशयोऽन्विष्टा भक्तजनेभ्यः समर्पिताः। तैश्च विरचिताः सन्त्य-नेके ग्रन्थाः पद्यमया गद्यमयाश्च। तेषां परिशीलनेन संसारदावानलेन भृशं भृष्टा जनाः परां शान्तिमनुभवन्तीति नास्ति शङ्कापङ्कावकाशः। श्रीराधा-याश्चरित्रचित्रणे न केवलं तेषां वीतरागाणां शुष्का कल्पना, न च विना मूलभित्तिं कल्पनाराजप्रसादनिर्माणम्। अपि तु समाधौ स्वसमस्तानुभूत्या यद् यत् साक्षात् कृतं तैः, तत्रैव लेखनी व्यापारिता। अत एव ते सर्वे सम्प्र-दायाचार्या वन्दनीयाः पूज्याः प्रातःस्मरणीया अनुसर्त्तव्या एव। तेषां सिद्धान्ता अवश्यमेवादरणीयाः, न च तत्र काचनापि विचिकित्सा कार्या।

इदमत्राकूतम्—समाधौ साधकैर्यदनुभूयते तदेव स्वलेखन्या प्रकाश्यते। तल्लेखनीनिर्मितः पन्थाः कदाचिद् भिन्नो भवति। तत्र गन्तृभ्यो य एव रोचते, तमेवाश्रयन्ते ते। न च तत्राग्रहः कर्त्तव्यो यन्मया गृहीत एव पन्थाः श्रेयस्करो नान्यः। यस्मै य एव रोचेत स एव श्रद्धया भक्त्या च प्रव-णेन मनसा सेवनीयोऽन्यश्च कदापि न तिरस्करणीयः। तत एव कल्याणं सम्पद्येत।

प्रेमतत्त्वम् : श्रीराधा

तपःस्वाध्यायनिरतैर्वीतकल्मषैर्महर्षिभिः प्रणीतानि सन्त्यनेकानि शास्त्राणि। तेषु वर्णितास्तेजस्विन इष्टफलप्रदा बहवो देवाः स्वरूपतः शक्तितः कर्मतश्च विस्तरेण निरूपिताः। तेषां प्रसादाय स्वस्वसमाधौ ते ते मन्त्राः, ते ते आराधनाप्रकाराः, ते ते जपास्तैर्लोककल्याणसम्पादनाया-न्विष्टाः। यतो हि 'मन्त्राधीना देवाः' इत्यभियुक्तोक्त्या तैस्तैर्मन्त्रैस्ते ते देवाः प्रसादयितुं शक्येरन्। तेषां प्रसादाच्च जनैः स्वाभीष्टं फलं प्राप्येत। अत एव विद्याकामैर्जनैः शिव उपास्यते 'विद्याकामः शिवं जपेत्'। शक्तिकामैश्च

देवी, दाम्पत्यप्रेमकामैः पार्वती । ब्रह्मतेजःकामैर्भगवान् भास्करः । कार्यसिद्धिकामैर्गणपतिः । एवमेव तत्तदुद्देश्येन ते ते देवाः समुपास्यन्ते[1] । बलबुद्धिविद्यातेजःशौर्यसौन्दर्यप्रभृतीनि वस्तूनि निखिलान्यपि प्रेमतत्त्वस्यैव विभूतयः सन्ति । अतः साधिते प्रेमतत्त्वे ता निखिला अपि विभूतयः साधकस्य पुरो नतमस्तका दासा इव तिष्ठन्ति । प्रेमतत्त्वमेव सर्वान् प्राणिनो वशीकर्तुं शक्नोति । प्रेम्णः सामर्थ्येन सर्वापि शक्तिः सर्वमपि सामर्थ्यं सर्वाश्च विभूतयो हस्तामलकवद्भवति । प्रेमतत्त्वमेव सर्वातिशायि विद्यते । अत एवातिकोमलकमलपाशबद्धमलिकुलं विवशं सत् सकलां निशां यापयति । तत्र तस्य सकलमपि चाञ्चल्यं शान्तिमेति । महामत्तो गजराजोऽपि स्वप्रियाप्रेमपाशनिगडितः साधारणमनुष्यस्य पारवश्यं स्वीकरोति । इदमेव सर्वं कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थं प्रेमतत्त्वं निखिलब्रह्माण्डनायकं सकलसामर्थ्यसम्पन्नं सर्वज्ञं श्रीकृष्णमपि वशीकरोति । अयञ्च प्रेमप्रभुः सेव्यानामपि सेव्यः । तञ्च प्रेमाणं साधयितुममोघो मन्त्रः श्रीराधाया अभिधानमेव । अतः श्रीराधाऽपरनामधेयं 'प्रेम' महामन्त्रं सकृदपि समुच्चारयितुर्मनसि समोऽपि पुरुषार्थो निष्फलतां याति । अर्थात् तस्य मनः समस्तेऽपि पुरुषार्थे न रमते ।

तात्पर्यमिदमत्र यद् यथा त्रिभुवनप्रकाशयितुर्भानोः समुदये सर्वेऽपि प्रकाशा मन्दतामुपयान्ति, तथैव श्रीराधानामोच्चारणे सर्वेऽपि पुरुषार्था विलयं प्रयान्ति । अत एव वीतरागा अमलमानसाः परमहंसा अपि समाधिमग्ना राधेति नाम सततं जपन्ति । अथवा ज्ञानिनां तेषां क्षीणकल्मषाणां वार्ता दूरे तिष्ठतु, मुनिजनसेवितपरागस्य सकलसम्प्रदायमहितस्य श्रीवृन्दावनस्य पशुपक्षिणोऽपि दुरितप्रशमनायाहर्निशं घासफलानि च भुक्त्वा तादृशमानन्दमनुभवन्ति, यो हि देवानामपि दुर्लभतामुपैति । प्रेमपदार्थो हि स्वयं गोप्यो भवति । तस्य मन्त्रस्तु नितरां गोपनीयतां भजति । अत एवोपनिषदादिषु अतीव गोप्यत्वेन तस्य निवेशोऽस्ति । यस्य तत्त्वं साधका भक्ता एव जानन्ति । यदमूल्यं द्रव्यं भवति, तस्य संरक्षणं लोकेऽतीव यत्नेन विधीयते । परमधनस्य तु कथैवान्या । परमधने यत्नतो रक्षितेऽपि सर्वदा जनानां तत्रैव दृष्टिर्भवति । श्रीराधां परमं धनं सर्वतो निश्चित्यैव तस्याः पादङ्कजपरागलुब्धास्तत्त्वज्ञा गोपयन्तः स्वमानसपञ्जरे यत्नाद् रक्षन्ति ध्यायन्ति च । त्रैलोक्यसाम्राज्यसम्राट् भगवान् श्रीकृष्णोऽपि तां परमं धनं मत्वा सदा ध्यायति । प्रियस्य वस्तुनश्चर्चा सर्वत्र नैव कर्त्तव्या, अपि तु मनसा मननीया । भगवान् व्रजेशनन्दनोऽपि स्वाभीष्टश्रीराधाया

---

१. श्रीमद्भागवतम्, स्कन्धः २, अध्यायः ३ ।

नाम स्पष्टं सर्वत्र नोच्चारयति, अपि तु वंशीध्वनिमिषेण जपति। मन्ये, 'श्रीराधा' नाममन्त्रस्य परमां रहस्यतां सम्यगवगत्यैव महामुनीन्द्रसेवित-सरसीरुहपादः परमहंसः श्रीशुकोऽपि श्रीमद्भागवतेऽस्य प्रेममहामन्त्रस्य श्रीराधानाम्नः स्पष्टमुच्चरणं नाकार्षीत्। किन्तु वृन्दावनीयासु तासु तासु लीलासु तस्य तथा संमिश्रणं यथा जले शर्करा न दृश्यते परं रसपातुः तस्याः स्वादः सम्यग् भवति। पयसि तस्य सारभूतं सर्पिर्विद्यमानमपि प्रत्यक्षं न दृश्यते, परन्तु पय इति समुच्चारणे घृतस्य विद्यमानता प्रतीयत एव। यदीदं ज्ञायेत यदत्र सर्पिर्नास्ति, तदा तत् केनापि न मृग्येत!

एवमेवोपनिषत्सु वेदान्तसारे श्रीमद्भागवते च ब्रह्मरूपस्य पयसो निरूपणे श्रीराधारूपस्य सर्पिषः सत्ताऽस्त्येव। अन्यथा पयसो नामापि कश्चन न गृह्णीयात्, क्रयणस्य तु का कथा। श्रीमद्भागवतेऽपि 'अमी' 'वहतो वधूम्' 'अत्रावरोपिता कान्ता' 'कामिन्याः' 'यां गोपीमनयत् कृष्णः' 'प्रियामाह स्कन्ध आरुह्यताम्' इत्यादिवाक्यैः श्रीराधैव संकेतिता। अत्र च शङ्का-पङ्कप्रक्षालनाय शोधपूर्णधार्मिकमासिकपत्रस्य 'श्रीसर्वेश्वरस्य' श्रीराधा-अङ्को[1] विशेषतोऽवलोकनीयः।

तस्या एव करुणामय्याः सकलब्रह्माण्डकारणीभूतायाः श्रीराधायाः पादपद्मे वाङ्मयी समर्चना कविना त्रयोदशसर्गात्मना काव्येनानेन विहिता, न तु स्वस्य महाकवित्वलाभाय। काव्येऽस्मिन् शिखरिणी-शार्दूलविक्रीडित-प्रभृतीनि प्रायश्चतुर्दश छन्दांसि प्रयुक्तानि एकसहस्राधिकश्लोकात्मकस्य काव्य-स्यास्य वैशिष्ट्यमिदमस्ति यत् ललितानामसमस्तानां पदानां सन्निवेशो महा-कविकालिदासस्य काव्यमनुहरति। कविरत्र श्रीराधास्तवनानन्तरं श्रीराधा-कुण्डस्य, श्रीराधासरसः, वरसानु (वरसाना) नगर्याः; तत्रस्यगह्वरवनस्य च, गोवर्द्धनगिरेश्च तथा चित्रणं करोति यथा ते सर्वेऽपि पदार्थाः पाठकानां दृष्टिपथे बलात् समुल्लसन्ति। कलिन्दगिरिकन्यायाः श्रीयमुनाया वर्णने तु कवेर्लेखनी तस्यास्तरङ्ग इव स्वच्छन्दं प्रवहति। तस्या निखिलमलापहा-रिणीत्वं तु भगवतीं भागीरथीमप्यतिशेते। तस्या अमलजलायाः श्यामात्वो-त्प्रेक्षा तु सचेतसां चेतांसि भृशं चमत्करोति। तरणिजाया ऐश्वर्यनिरूपणे कविस्तथा भक्तिप्रवणो भवति येन प्रार्थयते यत् 'हे तरणिजे, मृत्युकाले मम वदने द्वित्रान् बिन्दून् अवश्यं निक्षिपेः, येन यमयातना न भवेत्। यतो हि त्वं यमस्वसा'। रासलीलाया ललितं निरूपणन्तु तथा प्रतिभासयति यथा कविरयं तत्रोपविश्य वर्णयन् भवेत्। यद्यपि श्रीमद्भागवतवर्णनात्

१. वर्ष २३; अङ्क ७-१२।

किञ्चिदिव भिन्नमिदं वर्णनम्, तथापि आनन्दसन्दोहोत्पादकमवश्यमेव। निरूपणमिदं शास्त्रे नैपुणीमिव ललितकलानैपुणीमपि प्रख्यापयति।

स्थाने स्थाने आश्रमे वर्णिनां शास्त्रचर्चाप्रसङ्गे व्याकरणस्य न्यायस्य, वेदान्तस्य, योगस्य, किम्बहुना, साहित्यस्यापि सिद्धान्तनिरूपणं विदुषां मनो मोहयति। वरसानुवर्णनेऽनुरागवैराग्ययोः साधुसमन्वयः प्रेक्षावतां मानस-मयूरं नवनीरद इव नर्त्तयति।

श्रीराधाकृष्णयोरभेदप्रतिपादने दुरूहा उपनिषत्सिद्धान्ताः काव्य-शब्दैस्तथा समुपस्थापिता येन मन्दधियामपि त आञ्जस्येनावगता भवन्ति। प्रश्नोत्तरमुखेन कृष्णाकृष्णयोरैक्यसमर्थनं तु कवेरनुपमां काव्यचातुरीं शास्त्रचातुरीं च व्यनक्ति।

श्रीराधाकृष्णयोः सहचरीणां गोपीनामनन्यभावना सम्यक् समर्थिता। तयोस्तत्सेवा किञ्चित् फलमनपेक्ष्यैव वर्तत इति वर्णितम्। तासां शुद्धं चरितं लौकिकफलप्राप्तिसमीहा न परिलक्ष्यते।

शबरीणां शुद्धान्तःकरणस्य निरूपणन्तु कवेरस्य परमायाः प्रति-भायाः परां काष्ठां निर्दिशति, मनसो निर्मलत्वं भगवद्भक्तेषु श्रद्धातिशयञ्च द्योतयति। वस्तुतो भगवान् स्वापेक्षया स्वभक्तस्य कल्याणं विशेषतश्चिन्त-यति। तथा च भीष्मस्तुतिः—

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्त्तुमवप्लुतो रथस्थः।
धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः॥[1]

एवमेवान्येऽपि विषया मधुरकोमलपदसन्निवेशैस्तत्र तत्र दृश्यन्ते। अत्रानन्यशरणागतिर्भक्तेर्दास्यभावस्य च माहात्म्यं तत्र तत्र निभाल्यते। तत् सहृदया विद्वांसो दयया प्रेक्षेरन्।

अन्ते च—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

यज्ञशालासंस्कृतपाठशाला
मठियाशुक्लः, देवरिया

रामनारायणशुक्लः
प्रधानाचार्यः

---

[1] श्रीमद्भागवतम्, स्कन्धः १, अध्यायः ९, श्लोकः ३७

श्रीराधाचरितमहाकाव्यस्य

विषयवस्तुक्रमः

श्रीराधाचरिते

प्रथमः सर्गः

कदाचिद् रञ्जयन्तीं पदमनुपमालक्तकरसैः
कदाचिद् गुम्फन्तीमतिमसृणकेशेषु कुसुमम् ।
कदाचिच्चोज्झन्तीं पठनमिषकान्ताङ्कवसतिं
सदा वामां राधां परिकलयति स्वान्तमनिशम् ॥ १ ॥

अत्रादौ महाकविः श्रीराधाया बालक्रीडावर्णनमिषेण मङ्गलमाचरति--कदाचिदिति । श्रीराधा बाल्यावस्थायामवर्णनीयेनालक्तकरसेन स्वं चरणं रागवत् करोति, कदाचिच्च स्वकेशपाशेषु पुष्पाणि ग्रथ्नाति, कदाचिच्च पठनव्याजेन कान्तस्य श्रीकृष्णस्योत्सङ्गं विहाय कुत्रचिदन्यत्र गच्छति—इत्येवं विविधां केलिं विदधतीं लोकोत्तराह्लादिनीमतिकमनां राधां मे मनो नितरां भावयति । शिखरिणीच्छन्दः ॥ १ ॥

राधे तवैव पदपद्मपरागपुञ्जे
भृङ्गायतां शिर इदं विनतं मदीयम् ।
राधे तवैव मुखपार्वणचन्द्रबिम्बे
ज्योत्स्नाप्रियो भवतु चक्षुरिदं मदीयम् ॥ २ ॥

श्रीराधायां भक्तिप्रदर्शनम्—हे राधे ! तवैव चरणकमलयोः परागे भक्त्या प्रह्वं मे शिरः भ्रमरो भवतु । कार्ष्ण्यात् सततवर्तमानाच्च शिरो भ्रमरत्वेनोत्प्रेक्ष्यते । यथा भ्रमरा मधुलोलुपाः सौरभ्यात् कमलं न विजहति, तथैव मे शिरो जगदाश्रयत्वात्तव चरणं कदापि न जहातु । अहर्निशं प्रणमत्वित्यर्थः ।

एवं यथा चकोरः पूर्णिमाचन्द्रं सततं श्रद्धया विलोकयति, तथैव श्रद्धातिरेकात् सर्वकामप्रदत्वाच्च मे चक्षुस्तव मुखं सततं विलोकयेत् । आसर्गं वसन्ततिलकाच्छन्दः ॥ २ ॥

राधे तवैव शयनाय मनो मदीयं
तल्पायतां विरहबाष्पविधूतपापम् ।
त्वत्पादपङ्कजसमर्चननिर्मलो मे
पाणिः सुरासुरनुते व्यजनायतां ते ॥ ३ ॥

श्रीराधाया भावपूजनम्—राधे ! तव विरहजन्यबाष्पेण विधूतकल्मषम्, अत एव कामं निर्मलं मे मनस्तव तल्पं भवतु ।

हे सुरैरसुरैश्च स्तुते श्रीराधे ! तव पदसरोरुहस्य समर्चनेन निर्मलो मम करो व्यजनं भवतु । उभयत्र राधाविषयिणी श्रद्धैवामलत्वे हेतुः ॥ ३ ॥

रम्यान्तरोपवनवीथिविहारघर्मं
लोलालकालिपरिचुम्बितभव्यभालम् ।
चन्द्रावलीप्रभृतिमण्डितचक्रवालं
राधाननं भुवि विभाति परेन्दुबिम्बम् ॥ ४ ॥

रमणीयमध्यभागस्योपवनस्य रथ्यायां विहाराज्जनितश्रमजन्यस्वेदबिन्दुना स्विन्नम् । अनेन राधाया आननस्यामृतसूत्त्वम्, शरीरस्य कोमलातिशयत्वञ्च व्यज्यते । लोलैः कुन्तलैः, किञ्चिदाच्छादितभालम्, अनेन चन्द्रमसो लाञ्छनमुपमीयते । तारास्थानीयाभिश्चन्द्रावलीप्रभृतिभिः सखीभिः परितो मण्डितं राधाननं भुवि परं चन्द्रबिम्बमिव विभाति ॥ ४ ॥

देवर्षिमण्डलसमर्चितभूमिभागात्
पीयूषसारपरिकल्पितसिन्धुभागात् ।
किञ्जल्कवृन्दललितादिसखीसमेता
वृन्दावनादतुलपद्ममुदेति राधा ॥ ५ ॥

श्रीराधापद्मपरागस्पर्शेनातिपूतादत एव देवर्षिभिरत्यादरेण पूजितभुवः पीयूषसारनिर्मितसरसो वृन्दावनात् किञ्जल्कसदृशललिताप्रभृतिसखीसमेता निरुपमपद्मरूपा राधा समुदेति ।

वृन्दावनं स्वत एवाप्रतिमं स्थानम् । यस्य माहात्म्याद् देवा महर्षयः ऋषयस्तत्र नित्यं वासं विदधति समानभावेन । तत्रैव पीयूषसारेण कल्पितात् सरसोऽसाधारणपद्मरूपा राधा समुदेति । राधायाः पद्मरूपत्वं राधाप्रादुर्भावप्रसङ्गे स्फुटीभविष्यति । पद्मे तस्मिन् ललितादिसख्यः किञ्जल्कायन्त इति पद्याशयः ॥ ५ ॥

वृन्दावनेश्वरि तवैव पदारविन्दे
भृङ्गायमाणमनसो यदि कृष्णता स्यात् ।
कस्य प्रभाव इति मे वद दक्षिणे त्वं
गङ्गाम्भसाऽपि नहि पापमपाकृतं स्यात् ॥ ६ ॥

श्रीराधे ! तवैव, नत्वन्यस्य, पदकमले भक्त्या विनतस्य मे मनसो यदि कालुष्यं नापगतम्, तदा सदसद्विवेकसम्पन्ने ! त्वमेव वद, कस्यायं प्रभावः,

तव, मम मनसो वा ! नान्यस्य कस्यचन साक्षित्वमत्रापेक्ष्यते, सर्वं कर्त्तु-मकर्तुमन्यथा च कर्त्तुं तवैव सामर्थ्यात् ।

इतरासाध्यनाशस्य दुरितस्य यदि गङ्गाया अतिसमर्थेन जलेनापाकरणं न स्यात्, तदा तदन्येन केन स्यात्, नान्येन केनचनापि ॥ ६ ॥

राधानखाङ्कतिलकायितमाधवीकं
राधामुखेन्दुपरिभासिकुमुद्वतीकम् ।
राधामनोहरविहङ्गकलावलीकं
राधाविनोदविपिनं मनसा स्मरामि ॥ ७ ॥

पुष्पाणामवचये श्रीराधायाः, नखानां चिह्नानि तिलकस्थानीयानि यस्याम्, एवम्भूता माधवी यस्मिन्, मुखचन्द्रेण दिवापि विकासं प्राप्नुवन्ती कुमुदिनी यस्मिन्, मनसः प्रमदोत्पादकाः पक्षिणां कलरवा यस्मिन्, तद् श्रीराधाया अनुपमं विनोदविपिनं मनसाऽहं स्मरामि ॥ ७ ॥

किं तद् व्रतं भ्रमर साधु समाचरेस्त्वं
यद् राधिकाद्विगुणरेफपदाञ्चितोऽभूः ।
आख्याहि भद्र कृपया मुनिदुर्लभं तत्
येनास्मि तत्पदपरागलवो भवेयम् ॥ ८ ॥

भ्रमर, त्वमुत्तमफलदायकं पवित्रं किं तद् व्रतमाचरेः । यस्मिन्नाचरिते त्वं द्विरेफोऽभूः । भद्र, मुनिभिरपि दुर्लभं तद् व्रतं मामप्युपदिश । यस्योपासनयाऽहमपि श्रीराधायाः पदपङ्कजस्य परागलवो भवेयम् ।

तन्त्रशास्त्रे 'रेफ' इति अग्निबीजमिति श्रूयते । अतो यस्याभिधानं रेफघटितं भवेत्, स महातेजा भवति । अत एवैकरेफपदघटितराधापद-वाक्योऽर्थो जगत्पूज्योऽभूत् । भ्रमर, त्वया च किं व्रतमुपासितम्, येन ततोऽपि द्विगुणो रेफ आसादित इति निष्कर्षः ॥ ८ ॥

धन्यासि कीर्तितनये तव पादकञ्जे
श्रीशोऽपि पद्म इव चञ्चति चञ्चरीकः ।
भातीव नेत्रपटलेऽञ्जनसारभूतो
वेदान्तवेद्यनिरवद्यनिरञ्जनोऽपि ॥ ९ ॥

हे कीर्तिकन्ये ! राधे त्वमतीव धन्या, यतो हि निखिलैर्देवैः पूज्यः श्रीशोऽपि पद्मे पञ्चरीक इव तव पदे चञ्चति शब्दायते । तव गुणवर्णनेन त्वामनुरुणद्धीत्यर्थः ।

वेदान्तवेद्यो निरञ्जनोऽपि तव नयनकमलेऽञ्जनायते ॥ ९ ॥

देवाधिदेवमधुसूदनवन्द्यमानं
राधामहः किमपि तत्त्वमकल्प्यमानम् ।
श्यामेन तेन मुरलीमधुरं विनेदे
गौरेण तेन वृषभानुयशो वितेने ॥ १० ॥

देवानामपि देवेन श्रीकृष्णेनापि सततं वन्द्यमानं राधाभिधानं महस्तत्त्वं किमस्ति ? किमाकारकम् ?—इति कल्पयितुमपि दुश्शकम्; यतो हि तेन तत्त्वेन श्यामेन श्रीकृष्णेन सता मधुरं मुरली विनेदे, तेनैव तत्त्वेन गौरेण सता वृषभानोर्वरसानुराजस्य यशो वितेने । श्रीराधा वृषभानुतनयेति पुराणादौ श्रूयते ॥ १० ॥

धन्यास्त एव तरवस्तटभूविलासा
अर्चन्ति येऽनवरतं कमनीयपुष्पैः ।
नित्यं स्तुवन्ति वयसां मधुमत्तगीतै
राधासरः सरसिजावलिरम्यनीरम् ॥ ११ ॥

तीरे स्थितास्त एव तरवो धन्याः, ये सततं कमनीयपुष्पैः पक्षिणां मधुरगीतैश्च राजीवराजिराजितनीरं राधासरोऽर्चन्ति स्तुवन्ति च ॥ ११ ॥

वक्षोजकुङ्कुमकरम्बितकान्तनीरं
धम्मिल्लपुष्पसुरभीकृतकम्रकूलम् ।
शैवालनीलमणिमण्डितकुट्टिमाकं
राधासरो विजयतां जितमानसाभम् ॥ १२ ॥

स्नानसमये श्रीराधाया वक्षोजकुङ्कुमेन मिश्रितम्, अत एव कमनीयं जलं यस्य, एवम्भूतम्, केशपाशतः पतितैः सुमनोभरैः सुरभीकृतं कमनीयं कूलं यस्य, एवम्भूतम्, शैवालोपमनीलमणिना मण्डिता बद्धभूमिर्यस्य, एवम्भूतम्, जिता मानसस्य आभा=कान्तिर्येन, एवम्भूतञ्च श्रीराधासरोऽनुपमतां भजेत् ॥ १२ ॥

माद्यन्मतङ्गजविपाटनशैलभावं
वज्रायिताहिमदमर्दनपाणिपादम् ।
राधापदाब्जविरहद्रवतामुपेतं
राधासरः पदमवाप नु कृष्णतत्त्वम् ॥ १३ ॥

यस्य, मत्तस्य कुवलयापीडस्य हस्तिनो विपाटने शैलत्वमासीत्, यस्य च पाणिपादं कालियनागस्य मदमर्दने वज्रायितम्, तदेव कृष्णतत्त्वं राधा-

पदाब्जविरहजनिताग्निना द्रवतामुपेतं राधासर इति पदमवापदिति मे वितर्कः ।। १३ ।।

सौन्दर्यसारसकलावयवानवद्य-
श्छायातिरस्कृतमनोभवदर्पगर्जः ।
वीक्ष्यालकावृतमुखं वृषभानुजायाः
श्यामत्वमाप किमयं व्रजराजसूनुः ।। १४ ।।

सकलस्य सौन्दर्यस्य सारेण निर्मितैः सर्वावयवैः सुभगः, शरीरकान्त्या अधरीकृतः कामस्य सौन्दर्यमदो येन, स च श्रीकृष्णः श्रीराधायाः केशैः किञ्चिदावृतं मुखमवलोक्य स्वाभिलाषे निराशः सन् श्यामतामवाप ।

अत्रेदमाकूतम्—भगवतः श्रीकृष्णस्य श्यामतां कविरुत्प्रेक्षते-कदाचित् नटवरवेशः श्रीकृष्णो गोपालबालैरत्यन्तमुत्साहितः श्रीराधामुद्वोढुं वरसानुं प्राप्तो राधायाः सौन्दर्येण भग्नोत्साहः संवृत्तः । स्वकामनाऽनवाप्त्या निष्प्रभतां गतः । लोकेऽपि महातेजस्विनां पुरोऽल्पतेजस्वी निष्प्रभो भवतीति प्रसिद्धिः ।। १४ ।।

किं तेन वेदपदपूतमुखेन विद्वन्
राधा न येन सततं समुदीरिता स्यात् ।
वेदान्तवाक्यमननामलमानसैः किं
नाराधि यैर्मधुपतेर्मधुरापि राधा ।। १५ ।।

हे विद्वन् ! सततं येन 'राधा, राधा' इति नोच्चारितम्, सततं वेदाभ्यासात् परमपावनेन तेन मुखेन किम् ! न किमपीत्यर्थः ।

मधुपतेरपि मधुरा राधा यैर्नाराधि, वेदान्तवाक्यार्थानां मननेन निर्मलैरन्तःकरणैश्चः तैः किम् ! न किमपीत्यर्थः ।। १५ ।।

किं तैश्च काव्यमधुराक्षरसन्निवेशै-
र्यैः प्रस्तुता धनधिया धनिनां विलासाः ।
स्वो भाव एष महतां कविपुङ्गवानां
न स्मर्यते किमपि कामदुघैव राधा ।। १६ ।।

श्रीराधा गुणगणगणनां विहाय धनलिप्सया कोमलकान्तपदावलिभिर्धनिनां विलासाः कविभिः प्रस्तूयन्ते । परन्त्वत्र किं कर्त्तव्यमस्माभिः ! कविपुङ्गवानां स्वभावोऽयम् । 'स्वभावो हि दुरतिक्रमः' । श्रीराधैव कामदुघेति मोहात् तैर्मनागपि न स्मर्यते ।। १६ ।।

वृन्दावनं हसति माघवनीं वनीं तां
यत्र स्थिता न विबुधाः दधते प्रसादम् ।
राधापदाब्जमकरन्दरसावगाहो
मुक्तिं विलासलसितां लभतेऽत्र लोकः ।। १७ ।।

श्रीराधापदपरागपरीतं श्रीवृन्दावनं शक्रपतिकाममरावतीम्, शङ्कते तपस्विभ्य इति शक्रः, स पतिर्यस्याः सा ताम्, अथ चैश्वर्यमदमत्त उपेक्षित-सकलः पतिः यस्याः सा, ताञ्चामरावतीं हसति । यतो हि तत्र निवसन्तोऽप्यमराः 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति भिया, 'प्रमत्तः कदा किं कुर्यात्' इति भिया च कामं न प्रसीदन्ति ।

वृन्दावनं तु राघ्नोति = साघ्नोति सर्वं कार्यमिति सर्वकामदा राधा सा स्वामिनी यस्य तत्, स्त्रीतत्त्वात् अतिदयार्द्रहृदया, वात्सल्यस्नेहशालिनी 'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति' इत्यभियुक्तोक्त्यातीव सरला । अहैतुक्याः कृपायाः सम्पादिका ।

अतोऽस्मिन् वृन्दावने श्रीराधायाः कृपया तत्पादपङ्कजपरागरसे कृता-वगाहो लोको भुक्त्या सह विना प्रयत्नं मुक्तिं लभते । अन्यत्र मुक्तये तप उपासनीयं भवतीति उपहासे हेतुः ।। १७ ।।

वाञ्छामि नैव विपुलामपि राज्यलक्ष्मीं
बन्धाटवीं विषयवह्निपरीतपद्याम् ।
शान्तं मुनीन्द्रमहितं शिवमद्वितीयं
राधापदाब्जमनिशं हृदि चिन्तयामि ।। १८ ।।

हे श्रीराधे ! सर्वतो भावेन निर्बाधम्, अत एव महामुनीन्द्रामलात्म-परमहंसास्वादितरसं कल्याणकरमद्वितीयं श्रीराधाचरणकमलमहर्निशं मनसा चिन्तयन्नहं विषयवह्निना व्याप्तां बन्धायारण्यानीं विपुलामपि राज्य-लक्ष्मीं नैवाभिलषामि । एतेन रचयितुरनन्यशरणागतिर्व्यज्यते ।। १८ ।।

चीनांशुकाञ्चलविराजितचन्द्रबिम्बां
लावण्यलज्जितरतिं परिवीक्ष्य राधाम् ।
गोपाङ्गनावलितमन्मथमन्मथोऽपि
वंशीनिनादकलयाऽच्युततां जुगोप ।। १९ ।।

दुकूलेन विराजितं चन्द्रबिम्बमिव मुखं यस्याः, सौन्दर्येण तिरस्कृता रतिर्यया, रत्यपेक्षयाऽपि सौन्दर्यातिशयसम्पन्नेत्यर्थः । तथाभूतां श्रीराधां परितो वीक्ष्य व्रजाङ्गनामण्डलमण्डितः, मन्मथमन्मथः कामदेवादपि रमणीयः

श्रीकृष्णो वंशीवादने प्रदर्शिताभिरनेकाभिः कलाभिर्व्याजैः स्वस्याच्युतत्वं जुगोप।

सौन्दर्यातिशयशालिनीं श्रीराधां वीक्ष्य समुत्पन्नस्य स्वस्य सात्त्विकभावस्य व्रजाङ्गनानां सम्मुखे निगूहनायानेकाभिः कलाभिर्वंशी वादिता नटवरेण। ताभिश्च मुग्धास्ता अस्य च्युतत्वं न परिलक्षितवत्यः।

अनेन चातुर्येण न च्युतोऽच्युतः, तस्य भावस्तत्त्वं तस्य कथञ्चिद् रक्षितम्।

एतेन 'साक्षान्मन्मथमन्मथः' इति यदुक्तं व्यासेन श्रीकृष्णं वर्णयता, तत् सहृदयैर्भक्तैरेव वेद्यम्। नात्र परात्परब्रह्मणि भगवति विचिकित्सा विधातव्या॥ १९॥

अब्दानि यावदनुनीय पदारविन्दं
राधाधरामृतलवं विनिवेश्य वंशीम्।
कृष्णश्चकर्ष हृदयं व्रजवल्लवीनां
नो चेत् कथं मधुरिपोरधरेऽमृतं स्यात्॥ २०॥

अनेकानि वर्षाणि भगवत्याः श्रीराधायाः पदपद्मे चञ्चरीकायमाणस्तदधरसुधालवेन वंशीं पूरयन् वादयंश्च व्रजवनितानां मनांसि माधवो नटराजराजो व्यामोहयामास। अन्यथा मधुरिपोरस्याधरे मधु कथं स्यात्! न स्यादित्यर्थः।

एतेन 'रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैः' इति महर्षेर्व्यासस्य वचने विद्वद्भिरुपपत्तिरूहनीया, यतो हि 'व्यासस्य समाधिभाषा'॥ २०॥

तां भावयामि सततं व्रजवल्लवीनां
चाम्पेयकत्रकलिकां लवलीलतानाम्।
वेदैर्व्रजे स्तवभरैरुपगीयमानां
क्षीरोदधाविव बुधैः कमनेन्दिरां ताम्॥ २१॥

क्षीरोदधौ देवैः श्रुतिसुखैश्श्रुतिवचोभिः स्तूयमानां कामं कमनीयामिन्दिरामिव व्रजे विबुधैरुपश्लोक्यमानां लवलीलतास्वरूपाणां व्रजाङ्गनानां मध्ये चाम्पेयकुसुमकलिकां तां सुरपतिगुरुणापि यथायथं वर्णयितुमशक्यां श्रीराधां भावनया साक्षात् करोमि॥ २१॥

राधां तु यत्र सततं मृदु संलपन्तो
वाञ्छन्ति नापि विहगाः पदवीं मघोनः।
यस्मै च भूतिमहते स्पृहयन्ति देवा
राधावनं तदतुलं नु कदा भजेयम्॥ २२॥

यत्र विहगा अपि 'राधा, राधा' इति पदेन स्वं कण्ठं पुनन्तोऽतीव महनीयमपीन्द्रपदं नाभिलषन्ति, आप्तकामा अमरा अप्यभिलाषोपनीत-सकलवस्तुविलसितं यत् सदा कामयन्ते, तन्निरुपमं राधावनं प्राप्स्यामि कच्चित् ! कच्चित् कामप्रवेदने ।। २२ ।।

बन्धूकजातिकरुणावलिभव्यभागं
मन्दारमत्तमधुपावलिमुग्धगीतम् ।
आमुक्तमानसविलासमरालवासं
राधावनं रमयतां सुमनो मदीयम् ।। २३ ।।

बन्धूकजातिमल्लिकानामावलिभिर्भव्यो रमणीयो भागो यस्य, मन्दार-मकरन्दस्य पानेन प्रमदमाप्तानां मधुपानां मधुरं गीतं यत्र, अत्रानन्दाधिक्येन परित्यक्ता मानसविलासा यैः, तथाभूतानां मरालानां वासो यत्र, तथाभूतं श्रीराधावनं मम मनो रमयताम् । श्रीराधावनं विहाय मम मनोऽन्यत्र मा रंस्त ।

श्रीराधावनस्य निरतिशयविलाससामग्री हंसानां मानसपरित्यागे हेतुः ।। २३ ।।

मृद्वयाः शिरीषकुसुमादपि राधिकायाः
सान्ध्याभिषेककरणाय सरो गतायाः ।
चञ्च्वा चुचुम्ब वरटा पदमब्जबुद्धया
धन्या त्वमेव वरटेऽधिगतार्थगोत्रे ।। २४ ।।

शिरीषमृद्वी श्रीराधा यदा प्रातः स्नातुं राधासरो गच्छन्त्यासीत्, तदा वरटा तत्पदं कमलबुद्धया चुचुम्ब । प्रेम्णा पस्पर्शेत्यर्थः । दृष्ट्वेदं कविः साह्लादमुच्चैर्जगाद--हे अन्वर्थनामधेये वरटे ! त्वमेव धन्या, वयं त्वधन्याः । वरं श्रेष्ठं पदार्थमटति=अन्वेषयतीति वरटा, शकन्ध्वादित्वात् पररूपम् । जगतीतलेऽस्मिन् सर्वतः श्रेष्ठं श्रीराधापदम्, तत् त्वयाऽन्विष्टम् । अतोऽन्वर्थ-नामधेयता तवेति तात्पर्यम् ।। २४ ।।

राधेति तत्त्वमनिशं मनसा विभाव्यं
यस्माद् विभान्ति जगतो जननादिभावाः ।
कृष्णोऽपि तच्चरणपङ्कजचञ्चरीकस्-
तस्माच्च वीतरजसाऽपि विचिन्त्यते तत् ।। २५ ।।

यस्माज्जगत उत्पत्ति-स्थिति-प्रलया जायन्ते, तद् राधातत्त्वमेव चेतसाऽहर्निशं चिन्तनीयम् । वीतरागैरपि तदेव तत्त्वं समाधौ साक्षात्क्रियते;

यतो हि परब्रह्मापरपर्यायः श्रीकृष्णोऽपि तस्यैव राधापरपर्यायस्य तत्त्वस्य चरणे चञ्चरीकायते ॥ २५ ॥

एलालवङ्गकरवीररसालशालं
शेफालिकाबकुलजम्बुतमालमालम् ।
नारङ्गनीपनिचुलाकुलभूमिभालं
राधासरो रमयतां सुमनोमरालम् ॥ २६ ॥

यस्य परिसरभुवि एलालवङ्गकरवीररसालशालाः शालन्ते, यस्य च परिसरभुवि शेफालिकाबकुलजम्बुतमालानां माला राजन्ते, यस्य च परिसरभुवो नारङ्गनीपनिचुलैराकुलायन्ते, तद् राधासरः सुमनसां मनो मरालं रमयताम् । जगज्जालज्वालावलीढं मनस्तत्रैव शान्तिमेतु, नान्यत्रेति इच्छार्थे लोट् ॥ २६ ॥

कुन्दावलीदशनदीधितिदीपिताशा
तापिच्छगुच्छजघनावधिकेशपाशा ।
माद्यन्मधुव्रतनिषेवितपङ्कजाक्षी
वृन्दावनं सततमाश्रयते वनश्रीः ॥ २७ ॥

कुन्दावलीनां दशनावलीनाम् । अत्र कुन्दावलय एव दशनावलयः । दीधितिभिस्तेजोभिर्दीपिता आशा दिशो यया, तमाला एव जघनपर्यन्तं लम्बाः केशपाशा यस्याः, मत्तैर्मधुपैः संसक्तानि पङ्कजान्येवाक्षीणि यस्याः, तथाभूता वनलक्ष्मीर्वृन्दावनं सेवते ।

परमधाम्नो वृन्दावनस्य शक्तिमाहात्म्यात् सर्वदा सर्वर्तवस्तत्र विराजन्ते । अतोऽत्र वनश्रीः सकलसौन्दर्यसंवलिता सदैव राजत इति भाव. ॥२७॥

मालूरवामफलपीनकुचा नताङ्गी
कीरक्षताङ्कवरबिम्बफलाधरोष्ठी ।
पुष्पालिमण्डितमृणालशया मृगाक्षी
राधावनं सततमाश्रयते वनश्रीः ॥ २८ ॥

मालूराणां मनोहरैः फलैरेव पीनकुचैर्नतान्यङ्गानि यस्याः, शुकैः क्षतानि बिम्बफलान्येवाधरोष्ठो यस्याः, पुष्पैरलङ्कृता मृणाला एव हस्ता यस्याः, मृगाणामक्षीण्येव अक्षीणि यस्याः, तथाभूता वृन्दावनलक्ष्मीः सततं राधावनं सेवते ।

कीरक्षत' इत्यादिपदेन वनश्रियः 'पत्युपभुक्तता व्यज्यते । अन्यत् सर्वं पूर्वश्लोकव्याख्यातोऽवगन्तव्यम् ॥ २८ ॥

राधापदाम्बुजरसैर्विमलं मनः स्वं
कर्त्तुं व्रजे तृणलताखगभावमाप्य।
शान्ताः सुरा जहति मुक्तिपदाभिलाषं
द्राक्षामुपेक्ष्य न बुधा बदरीं लिहन्ति॥ २९॥

श्रीराधायाः पदपङ्कजमकरन्दैरात्मनो मनः पवितुं सुरास्तृणलतागुल्मपक्षिभावमापन्। ततश्च शान्तमनसस्ते स्वमुक्त्यभिलाषमपि जहुः। उचितमेतद् यतो हि—विवेकशीला गोस्तनीं विहाय बदरीफले नानुरज्येयुः॥ २९॥

योगी विभावयति योगपदानुभावं
भोगी विचिन्तयति तां पदवीं मघोनः।
भक्तः समाहितमना भजते तु राधां
संस्कार एव भवति प्रबलो विधाता॥ ३०॥

योगी सततं योगमेवानुध्यायति, भोगी संसारसुखमेव परमं प्रधानं मन्वानो मघोनःपदमभिलषति, भक्तस्तु परमहंसाराध्यचरणकमलां श्रीराधामेव भजते।

अत्र विवेकशीलैर्विद्वद्भिस्तटस्थतैवाश्रयणीया, यतो हि तत्तत्संस्कारवशान्निखिलोऽपि जनस्तत्तत् कार्यं सम्पादयति। संस्कार एव प्रबलो नियन्त्रको भवति॥ ३०॥

नाराधि येन रमणी रमणीयतान्ता
रासेश्वरी नटवरस्य च नाट्यशाला।
वृन्दाटवी सुरभिसूनमनोऽभिरामा
किं तस्य शास्त्रपरिशीलनपाटवेन॥ ३१॥

येन विदुषा, रमणीयताया अन्तो यत्र, ततोऽतिरिक्ते स्थाने तादृशी रमणीयता नावलोक्यते, तत्रैव रमणीयता समाप्तिमापदित्यर्थः। तथाभूता, अथ च नटवरस्य नाटयशाला, श्रीकृष्णस्तस्या एव पुरो नृत्यतीति श्रीराधा नाटयशालात्वेनोत्प्रेक्ष्यते, तथा रासेश्वरी श्रीराधा नाराधि, सुरभिकुसुमततिभिरतीव हृदयङ्गमवृन्दाटवीदर्शनेन चात्मा कृतार्थतां येन न नीतः, तस्य विदुषः सततशास्त्रपरिशीलनजन्यपुण्येन किम्! शास्त्रपरिशीलनं तस्य मुधैव।

शास्त्रचिन्तनस्य निरतिशयफलं जगत्कारणे परतत्त्वे भक्तेरुदयः। स एव यदि नाभूत् तदा तस्य शास्त्रपरिशीलनं जलताडनमेव ॥ ३१ ॥

नाराध्य पादयुगलं वृषभानुजाया
नाचम्य वारि विमलं बुध भानुजायाः।
नामृश्य पांसुमनघं व्रजराजवन्याः
शान्ति परां कथमिलाविभवैर्हि यायाः॥ ३२ ॥

हे बुध! वृषभानुजायाः श्रीराधायाः पादयुगं नाराध्य, भानुजाया यमुनाया निर्मलं नीरं नाचम्य नोपस्पृश्य, व्रजभूमेर्विमलं रेणुं शरीरे नोपलिप्य धरायाः सकलैर्विभवैः शान्ति न प्राप्नुयाः।

संसारविभवैरशान्ता दशा स्यात्, परा शान्तिः कथमपि न लभ्येत ॥ ३२ ॥

दिव्याङ्गनाकरकुशेशयसेविताङ्घ्रिः
शश्वन्निपीतकमलामधुराधरोऽपि।
आपीय रापदमहो चकितो मुरारिः
श्रुत्वा च धेति सखि धावति तद्दिशायाम् ॥ ३३ ॥

देवाङ्गनानां करकमलैः सेवितचरणकमलः, लक्ष्मीमधुराधरपानरतोऽपि श्रीकृष्णो 'रा' पदं श्रुत्वा चकितः सन् 'धा' पदश्रवणानन्तरं तस्यां दिशि धावति, यस्यां 'धा' पदं श्रूयते।

राधापदश्रवणानन्तरं भगवान् श्रीकृष्णस्तां प्राप्तुमतीवातुरो भवतीति राधाविषयिणी श्रीकृष्णस्य निरतिशया रतिर्व्यज्यते ॥ ३३ ॥

देहप्रभाविजितचम्पककम्रताकां
दीव्यन्मरीचिमुखमार्जितशारदाब्जाम्।
नेत्राभिपीतनलिनीकमनीयताकां
कृष्णप्रियां भवहराय नमामि राधाम् ॥ ३४ ॥

शरीरस्य कान्त्या चम्पकस्य कुसुमस्य कान्तिर्विजिता यया सा, सुवर्णवर्णेत्यर्थः। देदीप्यमानमुखकान्त्या शारदश्चन्द्रो जितो यया सा, नेत्राभ्यां तिरस्कृतं नलिन्याः सौन्दर्यं यया सा, तथाभूतां कृष्णप्रियां श्रीराधां भवनाशाय नमामि ॥ ३४ ॥

बिम्बाधरां कुटिलकुन्तलभूषितास्यां
काञ्चीकलापकमनीयकुमुद्वतीकाम्।
मञ्जीरमण्डितमनोहरपादपद्मां
भक्त्या नमामि वृषभानुसुतां ललामाम् ॥ ३५ ॥

बिम्ब इवाधरो यस्याः सा, कुटिलैः केशैरलङ्कृतमास्यं यस्याः सा। शारदे मुखचन्द्रे लम्बमानाः केचन केशाः कलङ्कभ्रमं जनयन्तः सौन्दर्यातिशयं वितन्वन्ति। काञ्चीकलापेन कटिभागस्योत्कृष्टा शोभा यस्याः सा, नूपुरेणालङ्कृतः पादो यस्याः सा, तथाभूतां वृषभानोर्ललामां सुतां भक्त्या नमामि ॥ ३५ ॥

चीनांशुकाञ्चललसद्भुजपार्श्वभागां
दीव्यद्द्विजावलिविमर्दितऋक्षमालाम्।
मुक्तावलीकलितकान्तभुजान्तरालां
राधां नमामि शिवदां भवभीतिबाधाम् ॥ ३६ ॥

दुकूलस्याञ्चलेन लसन् भुजयोः पार्श्वभागो यस्याः सा, दीव्यन्त्या दशनावल्या लज्जिता नक्षत्रमाला यस्याः सा, मुक्तामालया शोभितं वक्षःस्थलं यस्याः सा, तथाभूतां भवभीतिभीतिं कल्याणकरीं श्रीराधां नमामि ॥ ३६ ॥

मन्दारमाल्यकबरीजितपूर्णचन्द्रां
मन्दस्मितां वकुलचम्पककुन्दमालाम्।
ताटङ्कताडितकपोलसुपाटलास्यां
मूर्ध्ना नमामि मधुसूदनराध्यराधाम् ॥ ३७ ॥

गुम्फितमन्दारकुसुमैः केशपाशैर्विजितः पार्वणचन्द्रो यया सा, तां मन्दस्मितां वकुलचम्पककुन्दानां मालां पिदधतीं 'चञ्चलकर्णभूषणाघातेन पाटलमुखीं मधुसूदनेन जगद्गुरुणापि 'कृष्णं वन्दे जगद्गुरुम्' इति वचनात्, राध्यामाराधनीयां श्रीराधां नमामि ॥ ३७ ॥

शृङ्गारसिन्धुलतिकां नवनीतकायां
सिन्दूरविन्दुरविबिम्बविभातभालाम्।
केयूरमौक्तिकविभावितबाहुभागां
राधां नमामि सततं वरसानुराकाम् ॥ ३८ ॥

शृङ्गारसिन्धोः समुद्भूतां लतां नवनीतमृदुशरीरां रविबिम्बेनेव सिन्दूरबिन्दुना विभूषितमालां केयूरमुक्ताभिः शोभितभुजां वरसानुनगर्या राकां पूर्णिमां श्रीराधां नमामि ॥ ३८ ॥

दिव्याङ्गनाव्यजनचञ्चलचारुचेलां
शश्वद्विलासिनवयौवनकान्तदेहाम्।
गोपाङ्गनाविहितमण्डलरासमुख्यां
राधां नमामि वसुधातलकल्पवल्लीम् ॥ ३९ ॥

देवाङ्गनानां व्यजनवायुना चञ्चलमनोहरवसनां यौवनेन कान्त-कायां गोपाङ्गनापरिवेष्टितां रासमुख्यां वसुधातलस्य कल्पलतां श्रीराधामहं नमामि ॥ ३९ ॥

वीणां निधाय करपङ्कजमध्यभागे
श्लिष्टैः पदैर्मधुरताललयैर्विचित्रैः ।
राधा स्तवीति हृदये पुरुषं पुराणं
हे कृष्ण हे व्रजपते कमलापते हे ॥ ४० ॥

श्रीराधा करपङ्कजयोर्मध्ये वीणां निधाय मधुरैस्तालैः, लयैश्च, श्लेष-संवलितैः पदैश्च हे कृष्ण, हे व्रजपते, हे कमलापते—इत्थं हृदये पुराणं पुरुषं श्रीकृष्णं स्तौति ।

हे कृष्ण, हे माधव, पक्षे हे कृष्णहृदय हे व्रजपते हे व्रजभूमिस्वामिन्, पक्षे हे गोष्ठपते, रसानभिज्ञ आभीर इत्यर्थः । हे कमलापते हे लक्ष्मीपते, पक्षे त्वं कमलायाः पतिः, न तु ममेति व्यङ्ग्योऽर्थः । इत्थं श्लिष्टैः पदैः श्रीराधा श्रीकृष्णं स्तौति ॥ ४० ॥

अद्वैतमस्फुटमसौ मनसाऽप्यगम्यं
दिव्यं विचिन्तयति किं कदलीवनेऽन्तः ।
नित्यं निलिम्पनिचयैरपि हन्त कस्मिन्
राधाऽपि राध्यचरणा रमतेऽतिरम्ये ॥ ४१ ॥

रासलीलामध्य एवान्तर्हिते भगवति वासुदेवे तद्विरहक्लान्ता भगवती श्रीराधा चतुर्दश वर्षाणि कदलीवनस्य मध्ये तपश्चचार । तदेव वर्णयन् कविः कथयति—

असौ देवैरपि समाराध्यचरणा राधापि कदलीवने वाङ्मनोऽगोचरं मूर्त्तिरहितमद्वैतं तथापि दिव्यं किं वस्तु चिन्तयति !

आश्चर्यमिदं यत् त्रिभुवनराध्यापि राधा ततोऽप्यतिरमणीये कस्मिन् वस्तुनि रमते ! ॥ ४१ ॥

वृन्दावनेश्वरि तवैव पदारविन्दात्
प्राप्तं श्रियं वनमिदं भुवि राजतेऽलम् ।
घोराहिहालहललिप्तमुरारिपादे
लक्ष्मीर्लसेत् कथमहो अबला कृशाङ्गी ॥ ४२ ॥

हे वृन्दावनेश्वरि श्रीराधे ! तवैव करकमलात् शोभां समासाद्येदं वृन्दावनं सकलायां भुवि राजते शोभते । अन्यथा कालियनागदमने तद्विष-

व्याप्ते श्रीकृष्णपादे कृशाङ्गी अबला लक्ष्मीः कथं तिष्ठेत्, लसनस्य वार्ता तु दूरे तिष्ठतु । अतः

'वृन्दावनं सखि भुवो वितनोति कीर्ति,
यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ।'
(भा० द० स्क० २१ श्लो०)

इत्यस्येदं तात्पर्यम्—देवकीसुतेन भगवता वासुदेवेन पद्यते प्राप्यते यद् राधारूपमम्बुजम्, ततो लब्धा लक्ष्मीर्येन तद् वृन्दावनं भुवः कीर्ति वितनोति ।

श्रीराधाया अम्बुजत्वं तु—

देवर्षिमण्डलसमर्चितभूमिभागात्
पीयूषसारपरिकल्पितमध्यभागात् ।
किञ्जल्कवृन्दललितादिसखीसमेता
वृन्दावनादतुलपद्मुदेति राधा ॥

इत्यस्मादेव राधाचरितमहाकाव्याद् (१-५) अवगन्तव्यम् ॥ ४२ ॥

राधाऽभिगीतमनुमुग्धमना व्रजौका
आमुक्तमुक्तकवला हरिणाः समन्तात् ।
उत्कन्धरं शिखिकुलं वृषभानुजायां
वाग्बन्ध्यता तदपि भागवतेऽद्भुतेऽपि ॥ ४३ ॥

तस्मिन् तस्मिन् प्रसङ्गे श्रीराधायाः सुधामधुरं गीतमाकलय्य ब्रजवासिनो मुग्धमनसो निखिलविधिविरता अभवन् ।

हरिणाश्च किञ्चिद् भुक्तमपि तृणं परिहाय गीतमेवाद्रियन्ते स्म । मयूराश्च स्तब्धा ग्रीवामुन्नम्य स्थिता अभवन् । दशेयं पशूनामपि गीतश्रवणे समभूत् । परं चित्रमेतत् यत् 'भवन्ति भव्येषु हि पक्षपाताः' नीतिमिमां मनागपि न स्पृशतः परमोदारस्य महर्षेर्व्यासस्य शब्दशय्यासज्जिते सकल-काव्यकलाकलिते धर्मदर्शनविशदव्याख्यानविशिष्टे श्रीमद्भागवते 'राधा' इति परमानन्दसन्दोहजनकनामसंकीर्तने संकोचः सहृदयहृदयमुद्वेजयति ।४३।

वानीरजालविनिवारिततीरपङ्क
किञ्जल्ककुङ्कुमजलं करवीरकान्तम् ।
राधासरो विहगकूजितशस्तशब्दं
स्वागच्छतीव वृषभानुसुतां ललामाम् ॥ ४४ ॥

यस्य पङ्कास्तीरभागे विरूढैर्वेतसैः प्रक्षाल्यन्ते, यस्य जलं किञ्जल्कभूतैः कश्मीरजैर्मिश्रितम्, करवीरकुसुमैश्च यन्मनोहरम्, यस्य खगकुलकलरवा एव स्तुतिशब्दाः, तथाभूतं राधानामकं सरो वरसानुपतेर्वृषभानोर्मनोहरायाः कन्यायाः श्रीराधायाः स्वागतं व्याहरतीव।

लोकेऽपि कस्यचिन्महाजनस्य समागमे पानीयपुष्पफलैः प्रशंसावचनैश्च स्वागतं दृश्यते ॥ ४४ ॥

जम्बूरसालककुभा गिरिमल्लिकाद्याः
पुष्पप्रवालबलिभिः पुलिने विरूढाः।
संलब्धजीवनमहो हि सरोऽभ्यनन्दन्
प्रायो जडा अपि कृतज्ञधियो भवन्ति ॥ ४५ ॥

तटे विरूढा अर्जुनजम्बूरसालकुटजप्रभृतयस्तरवः फलपुष्पनवपल्लवोपहारवस्तुभी राधासरोऽभिनन्दन्ति; यतो हि तस्मादेव सरसो जीवनजलं समासाद्य जीवन्ति, अतस्तद्द्वारा तदभिनन्दनं समुचितमेव।

जडा अपि प्रायः कृतज्ञा भवन्ति। ज्ञानसम्पन्नानां मानवानां तु कथैव का! ॥ ४५ ॥

संमर्दितोन्नतवराहमदारिकूर्मा
नित्यं जनानुपदिशन्ति तटं श्रयन्तः।
राधापदाम्बुजरजोविरजास्तडागः
संसारसर्वसुखदो यमपाशमुक्तः ॥ ४६ ॥

यैः स्थूलवराहाणामौन्नत्यमदश्चूर्णितः, अर्थादतीव स्थूलाः, तटनिवासिनः कच्छपा जनान् नित्यमुपदिशन्ति यद् राधापदाम्बुजरजसा विरजास्तटाको भवतीति विरोधः। राधापदाम्बुजरजसा पूतो भवतीति परिहारः।

एवञ्च विरोधाभासालङ्कारः फलितोऽत्र ॥ ४६ ॥

आलम्बितानि सुरभीणि महीरुहेषु
धातुः सुधारसघटस्य विकल्पितानि।
मालूरपवित्रमफलानि मुदं वहन्ते
दृष्टान्त एष भगवानिह नीलकण्ठः ॥ ४७ ॥

वृक्षेषु लम्बमानानि सुरभीणि पक्वबिल्वफलानि विधातुः सुधारसभृतघटस्य विकल्पे परमानन्दं समुत्पादयन्ति। ननु सुधामयघटस्य विकल्पे श्रीफलं कथमुपयुज्यत इति चेत्, कविः समाधत्ते—'दृष्टान्त एषः' इति।

उल्बणविषपानानन्तरं भगवतः शङ्करस्य ज्वालाशान्तये बिल्वपत्राणि शिरसि स्थाप्यन्ते, बिल्वफलानि च भोक्तुं समर्प्यन्ते ॥ ४७ ॥

रम्ये सरःपरिसरे पनसा विशाला
नाकौकसामपि सुदुर्लभतामुपेताः ।
राधापदाब्जविरहात् परिशङ्कमाना
व्यामानुबद्धविटपाः कपयो विभान्ति ॥ ४८ ॥

श्रीराधायाः सरसः परिसरभुवि सुराणामपि सुदुर्लभा विशालाः पनसा जनानां मानसानि प्रसादयन्ति ।

मन्ये, श्रीराधायाश्चरणकमलस्य वियोगभिया भुजाभ्यां विटपानि दृढं परिगृह्णन्तः कपय एव भवेयुः ।

सरसः समन्तात् विशालाः पनसा अक्षिगोचरीभवन्ति ॥ ४८ ॥

लुप्तोपमा हरितराजिषु नागरङ्गाः
पीताङ्गिकापिहितकुञ्चितचक्रवालाः ।
हारीतरम्यपरिधानवनाङ्गनाया
आवर्जयन्ति हि कुचाः कविमानसानि ॥ ४९ ॥

सरसः परिभुवि हरितश्रेणिषु निरुपमा नागरङ्गा हारीतपक्षिहरितपक्षसदृशं शाटकं परिदधानाया वनश्रियः पीतचोलावनद्धा अत एवाकुञ्चितचक्रवाला उरोजा इव कवीनां मानसानि समाकर्षन्ति । कवितोन्मुखानि कवीनां मानसानि कुर्वन्तीत्यर्थः ॥ ४९ ॥

शाकुन्तसेवितरसप्रसवौघनीला–
श्छायानिवारितनिदाघमरीचिमालाः ।
जम्बूविशालतरवो जलदागमस्य
प्रीतिं परां वनभुवो जनयन्त्यकाले ॥ ५० ॥

शकुनिनिवहैरास्वाद्यमानरसैः फलैर्नीलाः छायाभिर्निवारिता निदाघस्य ग्रीष्मर्तोर्मरीचीनां माला यैस्ते, जम्ब्वा विशालाः शाला वनभुवो ग्रीष्मर्तावपि वर्षर्तोः परां प्रीतिं जनयन्ति ।

जम्बूतरवः फलच्छायाभिर्ग्रीष्मकालेऽपि जलदभ्रमं समुत्पादयन्तीति रहस्यम् ॥ ५० ॥

वामास्तनप्रथितवामफलावनम्रा
कासारसाररसकण्टकिताऽतिकम्रा ।
पीयूषहृद्यरसतोषितचित्तभावा
जम्बीरराजिरवनिश्रियमातनोति ॥ ५१ ॥

वामानां सुन्दरीणां स्तनैरिव प्रकाशमितैर्मनोहरैः फलैः किञ्चिन्नम्रा कासारपतिसमागमजन्यानुरागेण कण्टकवती नितरां कमनीया पीयूषेणेव हृद्यरसेन जनानां मानसं तोषयन्ती जम्बीरराजो राधाभुवः कान्ति सन्तनोति।

अन्यत्रापि वामानां विशाला वक्षोजाः प्रशस्यन्ते, वामाश्च प्रियसमागमे पुलकिता भवन्ति, अनुरागेण च प्रियान् सन्तोषयन्ति ।। ५१ ।।

शीतोष्णवर्षणसमुद्भवदुःखजालं
रम्भावनान्तमभितोऽविगणय्य नित्यम् ।
तीव्रं तपो विदधते महते फलाय
दिव्यं फलं जनिमता तपसैव साध्यम् ।। ५२ ।।

वनमभितः कदलीदलानि शीतोष्णवर्षाऋतुजन्यं निखिलमपि परितापं मनागपि मनसा नानुभवन्ति महते फलाय प्रसवा अस्माकं महान्तो भवन्त्वित्यर्थमुग्रं तप आचरन्ति । ततश्च फलतीदं यत् महते फलाय तप एवाचरणीयम् ।। ५२ ।।

माद्यन्मधुव्रतविलासविजृम्भिताङ्गास्
ताम्राक्षगीतविगलद्वनिताभिमानाः ।
आम्रा विनम्रविटपाः फलमञ्जरीका
भान्तीह भक्तजनभावितभूविभागाः ।। ५३ ।।

मत्तमधुकराणां विलाससम्भृताः, पिकानां मधुरगीतैः मानिनीनां रतिकाले मानभङ्गो येषु ते, फलमञ्जरीविलसिता अत एवानतशाखाः, भक्तैः सेविता भूविभागा येषां ते रसाला इह राधासरसः परिसरे नितरां भान्ति ।। ५३ ।।

शाखावलम्बितकुलायकुले शकुन्ताः
स्वादूनि बोधितरुपक्वफलान्यशित्वा ।
पर्णावलीविहितवाससुपर्ववृन्दाद्
राधैकतत्त्वमनिशं समधीयते व ।। ५४ ।।

शाखास्ववलम्बितानां नीडानां समूहे निवसन्तः पक्षिणः पिप्पलानां स्वादूनि पक्वानि फलानि भुक्त्वा प्रतिदलं निवासं विदधतां सुराणां वृन्दाद् राधारूपमेकतत्त्वमेवास्तीत्यधीयत इव । नियमपूर्वकमेवाध्ययनं विधेयम् । फलभक्षणेन नियमपालनं भवति । अत्रेवार्थे वशब्दो बोध्यः ।

श्रीक्षेत्रे वृन्दावनेऽस्मिन् पक्षिणोऽपि 'राधा, राधा' इति व्याहरन्तः श्रूयन्त इति रहस्यम् ।। ५४ ।।

पर्णैर्घनैर्विहितनीलदुकुलदूष्याश्
शाखासहस्रविनिवारितभूमिपाताः ।
वल्मीकमण्डितजटैर्मुनिभिः परीतास्
तापं हरन्ति जटिनो जटिलं जनानाम् ॥ ५५ ॥

येषां घनानि दलानि दुकूलदुष्यायन्ते, तानि च दुष्याणि पृथिव्यां न पतेयुरिति शाखासहस्रेणावलम्ब्यन्ते, अधश्च तपश्चरतां मुनीनां जटा वल्मीकैरभितो व्याप्ता दृश्यन्ते। तथाभूताः पर्कटीवृक्षा जनानां जटिलं घोरं पापं हरन्ति ।

प्रथमं तु पर्कटीवृक्ष एव देववृक्षः, तत्रापि तपस्विभिः परिवृतः, तत्रापि वृन्दावने वर्तमान इत्युत्तरोत्तरं पर्कटीवृक्षस्य पुण्यप्रकर्षो घोरमपि पापं नाशयतीति निष्कर्षः ॥ ५५ ॥

क्षिप्तास्तिला घनदलैर्नितरां निरुद्धास्
तेषां मनोरमतले न मनाक् पतन्ति ।
नाकौकसां युवतयो रमणैरशङ्काः
क्रीडन्ति कामवशगा रजनीधिया हि ॥ ५६ ॥

पर्कटीतरूणां घनानां दलानां माहात्म्यं स्तौति कविः—तद्वृक्षोपरि कैश्चित् क्षिप्यमाणास्तिला दलैस्तथा निरुध्यन्ते येन मनागपि अवनौ न पतन्ति। अत एव कामार्ताः सुरयुवतयो रजनीधिया युवभिर्निश्शङ्कं केलिं कुर्वन्ति ॥ ५६ ॥

राधापदाङ्कितरजः सिरसाऽभिमष्टुं
न्यग्रोहतीव तरुराट् सफलः सशाखः।
न्यग्रोधनाम तदिदं विदितं त्रिलोक्यां
कर्मानुरूपफलमेव जनोऽश्नुते हि ॥ ५७ ॥

श्रीराधापदस्पर्शेन पूतेन रजसाऽऽत्मानं पवितुं तरुवरो वटः सफलः सशाखो न्यग्रोहतीव नमतीत्यर्थः। अतस्तस्य न्यग्रोधनाम्ना लोके प्रसिद्धिः। अतः फलतीदं यज्जनः स्वकर्मानुरूपमेव फलं लभते। जनेन यथाशक्ति सत्कर्मैवानुष्ठेयम् ॥ ५७ ॥

नीपा निलिम्पनिचयैरभिनन्द्यमाना
गोपाङ्गनावसनवासितमध्यभागाः ।
किञ्चिद्विरुढरमणीस्तनमण्डलाभै
रोमाञ्चितैः फलचयैः परितो विभान्ति ॥ ५८ ॥

व्रजाङ्गनाभिरवलम्बितवसना अत एवानवद्यावयवा नीपवृक्षाः सुरैरभिनन्द्यमाना अन्तर्निगूढरमणाभिलाषजनितरोमाञ्चाञ्चितकुड्मलाकाररमणीस्तनोपमफलैः सर्वतः शोभन्ते ।

नितरां पीयते पापं येनेति नीपः । उपसर्गस्य दीर्घः ॥ ५८ ॥

श्यामावदातनवपल्लवमालिकानां
मध्येऽवलम्बितफलानि कदम्बकानाम् ।
नीलाम्बराभिसरणोत्सुककक्षलक्ष्म्या
भान्तीव कान्तकवरीश्रितहीरकाणि ॥ ५९ ॥

श्यामैरवदातैः किसलयैर्लसितानां कदम्बानां शाखास्ववलम्बितानि फलानि नीलाम्बराया अभिसरणोत्सुकाया अभिसारिकाया वनश्रियः कमनीयकेशपाशे हीरकाणीव प्रतीयन्ते ॥ ५९ ॥

खर्जूरराजिरबलामहमातनोति
यस्याः सुरा सुरतकेलिमुपस्करोति ।
गोपाङ्गनामधुररूपमतो दधाना
देवाङ्गना व्रजवनं पतिभिर्जुषन्ते ॥ ६० ॥

श्रीराधासरःपरिसरे खर्जूरराजिरबलानामुत्सवं विधत्ते । येषां खर्जूराणां रसरूपा सुरा सुरतक्रीड़ामुपकरोति। अतो देवाङ्गना धृतगोपाङ्गनारूपाः पतिभिर्वृन्दावनं सेवन्ते ॥ ६० ॥

स्कन्धे निधाय मधुरासवपूर्णकुम्भान्
राजिर्वशाजघनसन्निभलाङ्गलीनाम् ।
वृन्दाटवीविहरणे वृषभानुजायाः
श्वश्श्रेयसं वितनुते वयसां विरावैः ॥ ६१ ॥

कान्ताजघनोपमा नारिकेलतरवः स्कन्धे मधुरासवपूर्णकुम्भोपमानि नारिकेलफलानि निधाय श्रीराधावृन्दावनविहारसमये माङ्गल्यमातन्वन्ति। मधुरासवसम्भृतानि नारिकेलफलान्येव पानीयपूर्णकलशाः । यात्राकाले युवतिभिर्नीयमानजलपूर्णकलशदर्शनं मङ्गलाय सम्पद्यत इति शकुनशास्त्रम् ॥ ६१ ॥

स्निग्धैर्दलैर्ललितमेघविभावरीका
मुग्धव्रजावनिवधूकवरीविलासाः ।
प्रच्छायशीतलतलाश्रितकृष्णसाराः
श्यामाः करीरविटपा विपिने विभान्ति ॥ ६२ ॥

येषां स्निग्धानि पत्राणि मेघमेदुरविभावरीश्यामतामदं दलन्ति; मुग्धाया व्रजभूमिवनितायाः केशपाशायन्ते, येषां प्रच्छायशीतलभूमितले कस्तूरीमृगा विश्राम्यन्ति, ते श्यामाः करीरतरवो वृन्दावने लसन्ति ॥ ६२ ॥

येषां फलानि कटुतैलघटीश्रितानि
संस्कृत्य सैन्धवरसैरजमोदकाद्यैः ।
सन्ताप्य भानुभिरहो व्रजभूवधूट्यो
हैयङ्गवीनवितृषो बहुधा लिहन्ति ॥ ६३ ॥

येषां करीराणां फलानि घटे कटुतैले निधाय सैन्धवाजमोदकाद्यैः संस्कृत्य सूर्यकिरणैः सन्ताप्य दुग्धदधिनवनीतभक्षणादुद्विग्ना व्रजललनाः स्वादपरिवर्तनाय बहुधा लिहन्ति ॥ ६३ ॥

कृष्णानुरक्तमनसः फलपुष्पधूपाश्
चन्द्रानना व्रजवशाः कलिताभिषेकाः ।
तस्मिन् सुरानतसरोवरकान्तकूले
सम्भावयन्ति सततं सुरशाखिमालाः ॥ ६४ ॥

श्रीकृष्णानुरक्ताश्चन्द्रानना व्रजवनिताः सुराभिनन्द्यसरसि अभिषवं सम्पाद्य मनोऽनुकूले कूले सुरतरून् फलैः पुष्पैर्धूपैश्च मनोऽभिलाषसिद्धयेऽर्चन्ति ॥ ६४ ॥

पुष्प्यद्रसालशितपञ्चमबाणवित्तः
पीयूषर्वाषसुरभिः सुरभिः सुमौघैः ।
कामोत्सवाय वनिताः प्रमदाः प्रकुर्वन्
आत्मोदयेन विपिनं जुषते समन्तात् ॥ ६५ ॥

कुसुमितरसालमञ्जरीं तीक्ष्णं पञ्चमं बाणं हस्ते समादाय सुधामयैः कुसुमैः सुगन्धिः वसन्तः कामकेलिं सम्पादयितुं वनिता मदोन्मत्ता विदधत् सर्वतोभावेन वृन्दावनं सेवते । वृन्दावने वसन्तस्य वैभवं विलोक्यत इति भावः ॥ ६५ ॥

राधासरोविमलवारिलवाभिमृष्टो
बन्धूकनीरजजपालिपरागपुष्टः ।
शीतानुकूलपवनो हि रतोत्सवान्ते
संसेवते शबरवामदृशो वनान्ते ॥ ६६ ॥

श्रीराधासरसो निर्मलजललवानादाय, एतेन पवनस्य शैत्यं साधितम्, बन्धूकजातिजपापुष्पाणां परागैः पुष्टः, एतेन पवनस्य मान्द्यं सूचितम्,

तथाभूतः शीतलो मन्दः सुरभिः पवनो वनमध्ये सुरतान्ते शबरी सुरतजन्य-खेदमपाकरोति ॥ ६६ ॥

तस्मिन् मृगा मृगपतेः सखिभावमाप्ताः
सम्प्रीणयन्ति हरिणीर्हरितैस्तृणौघैः ।
संलालयन्ति च मुदा विविधैर्विलासैर्
वन्या अपि प्रणयिनो व्रजभूप्रभावात् ॥ ६७ ॥

श्रीराधाया अनुभावात् सर्वतो भावेनानवद्ये सकलललितकलाकलिते सुभगे वृन्दावने मृगा मृगपतेः सख्यमुपेता अतो निश्शङ्का हरितकवलैर्मृगीस्तृप्नुवन्ति । मनश्शङ्काक्रान्तत्वे सम्मदप्रवेशाभावः । विविधैश्च विलासैर्मृगीर्लालयन्ति ।

व्रजभुवोऽयं प्रभावो यद् वनवासिनोऽपि प्राणिनः प्रणये प्रवीणा दृश्यन्ते ॥ ६७ ॥

व्यायामधार्यकुचमण्डलमण्डिताभिः
क्रोडीकृता युवतिभिर्मधुघूर्णिताभिः ।
गीतैः सुधारसभरैर्विहगावलीनां
कृच्छ्रात्त्यजन्ति शयनं शबरा निशान्ते ॥ ६८ ॥

तिर्यक्ततयोर्विस्तृतयोः करसहितयोर्बाह्वोरन्तरं व्यायामः, 'अंकवारी' इति लोके प्रसिद्धिः, तेन ग्राह्येण कुचमण्डलेन मण्डितानाम्, एतेन स्तनानां स्थौल्यं लम्बता च प्रतीयते । सुराभिर्मत्तानां शबरयुवतीनां हस्तपाशे दृढ़ं बद्धाः, दृढमालिङ्गिता इत्यर्थः । खगकुलसुधामधुरं गीतमाकलय्य शबराः प्रभाते कष्टात् शयनं त्यजन्ति ।

कान्तानां दृढयाऽङ्कपाल्या निगडिताः शबराः सुरतश्रान्तानां शबरीणां निद्राभङ्गभिया यथाकथञ्चित् शय्यां जहति ॥ ६८ ॥

वन्यानि तानि मधुराणि फलानि भुक्त्वा
पीत्वा शुकाः सुरभि शीतलमच्छमम्बु ।
नित्यं दिशन्ति मनुजान् मुनिवृत्तिवित्ता
राधैव राध्यचरणा जगतीतलेऽस्मिन् ॥ ६९ ॥

मुनिवृत्तयः शुका वन्यानि मधुराणि फलानि भुक्त्वा शीतं निर्मलं राधासरसः पानीयं पीत्वा मानवानुपदिशन्ति यत् त्रिभुवने राधाया एव चरणमाराधनीयतां नेतव्यम् ।

एतेन राधाराधनेन सकलाः सुरा आराधिता भवन्ति, 'सर्वं पदं हस्तिपदे निमग्नम्' इति न्यायात् ॥ ६९ ॥

श्रोणिस्तनद्वितयभारवशाद् वधूटचो
मन्थानकृष्टिपरिसीमितपाणिपादाः ।
स्वेदोदविन्दुवदना नयनाभिरामा
घोषे दधीनि मृदुगीति विलोडयन्ति ॥ ७० ॥

जघनस्तनभागगौरवान्मन्थनदण्डरश्मिकर्षणे संकुचितहस्तपादाः, स्तनगौरवाद् यावदपेक्षितं तावद् हस्ताः पुरो न प्रसरन्ति, पादाश्च पश्चान्न प्रसरन्ति । श्रमाधिक्यात् अतिसौकुमार्यात् यासां चन्द्रमुखेषु स्वेदविन्दवो लसन्ति, तथाभूता नयनाभिरामा गोपवधूटचो गोष्ठे मृदु गायन्त्यो दधीनि मथ्नन्ति ॥ ७० ॥

कलितललितलीलं राधिकामाधवीयं
कुसुमिततरुवृन्दं भृङ्गझङ्कारवित्तम् ।
द्विजकुलकलगीतं धाम वृन्दावनाख्यं
हरतु हरतु पापं पावनं पावनानाम् ॥ ७१ ॥

राधामाधवयोर्ललितलीलाया मनोहरं पुष्पसमृद्धतरुविलसितं भ्रमराणां झङ्कारैर्युक्तं पक्षिणां कलरवैः सम्भृतं पवित्राणामपि पवित्रं वृन्दावनाख्यं धामास्माकं पापं शमयताम् ॥ मालिनीच्छन्दः ॥ ७१ ॥

तस्मिन् कान्तवने नवीनजलदश्यामश्च गोपैर्वृतः
शैलूषोचितवेषभूषितवपुर्गोचारणव्याजतः ।
निर्दिष्टे कमनीयकुञ्जकलिते नीपे नटो माधवो
वंशीवादनपाटवं वितनुते राधां हि संकेतयन् ॥ ७२ ॥

तस्मिन् वृन्दावनाख्ये मनोहरे वने वर्षणोन्मुखमेघ इव श्यामो नटवेषभूषितो नटो माधवो गोचारणव्याजतः कमनीयेन निकुञ्जेन वेष्टिते संकेतस्थलत्वेन निर्दिष्टे कदम्बतरुतले आगमनाय वंशीशब्देन श्रीराधां संकेतयति । शार्दूलविक्रीडितं छन्दः ॥ ७२ ॥

कान्ते कान्तवने विहारहृदया राधा परा भामिनी
सन्त्यक्ताखिलगेहदैनिकविधिः सम्भूषयन्ती वपुः ।
साकूतं जननीवचोऽन्यथयते मिथ्याभिशापादिना
राधामाधवयोर्विलासविपिनं भक्तान् सदा प्रीणयेत् ॥ ७३ ॥

परमोत्कृष्टा श्रीराधा यत्र कमनीये कान्तस्य श्रीकृष्णस्य लीलया लसिते श्रीवने लीलार्थं गन्तुमनाः स्वसद्मनो निखिलमपि दैनिकं कर्म परिहाय स्वशरीरं निरुपमवस्त्राभरणैरलङ्कुर्वन्ती 'किं तस्य नटस्य पार्श्वे गच्छसि' इति व्यञ्जनागम्यार्थकं साकूतं मातुर्वचः शपथादिना निगूह्य गच्छति, तत् श्रीराधामाधवयोर्विलासविपिनं श्रीवृन्दावनं धाम भक्तिरसाप्लुतान् विदुषस्तृप्नोतु। शा० वि० छन्दः ॥ ७३ ॥

उत्पन्नं श्रुतिसम्भदान् मधुरिपोर्वेणोर्निनादात् परात्
राधाया हृदयाब्जवेपथुततीः स्वेदद्रवानानने।
रोमाञ्चान् कनकाभवर्ष्मपटले सख्यः समीक्ष्याकुलाः
साकूतं परिसान्त्वयन्ति हि सखि ग्रीष्मः प्रचण्डोऽधुना ॥ ७४ ॥

श्रोत्रसुखकरात् श्रीकृष्णस्य वंशीनिनादात् श्रीराधिकाया हृदयपद्मस्य वेपथुपरम्परा मुखे स्वेदविन्दून् गौरशरीरे रोमाञ्चांश्च परिलक्ष्य, सर्वान् सात्त्विकभावान् परिलक्ष्येत्यर्थः, आकुलाः सख्यः 'हे श्रीराधे, सम्प्रति दुःसहो ग्रीष्मो भवति' इति निवेदयन्त्यः साकूतं परिसान्त्वयन्ति। शार्दूलविक्रीडितं छन्दः ॥ ७४ ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः।
श्रीराधिकाचरणचिन्तनचारुरूपं
काव्यं व्यधात् प्रथमसर्ग इतोऽयमस्य ॥ ७५ ॥

यस्य पिता श्रीचन्द्रशेखरशुक्लः, माता च श्रीमङ्गला, स श्रीकालिकाप्रसादशुक्लः श्रीराधाचरणचिन्तनरूपम्, अत एव चारुकाव्यं व्यधात्। यस्यायं प्रथमः सर्गः समाप्तिमगात्। वसन्ततिलकाच्छन्दः ॥ ७५ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये प्रथमः सर्गः समाप्तः ॥

द्वितीयः सर्गः

व्रजभूसरसी सरोजिनी वरसानुः स्वयमुद्गता पुरी ।
परितः परिपातुमीक्षणैर्विधिरेनां किमभूच्चतुर्मुखः ।। १ ।।

व्रजभूमौ सरस्यां सरोजिनीव वरसानुः (वरसाना) नगरी स्वयमुद्गता । न केनापि निर्मितेत्यर्थः । यां नयनैः सर्वतः परिपातुं समवलोकयितुमित्यर्थः, विधिश्चतुर्मुखोऽभूत् किम् !

वरसानोरेकस्य भागस्यावलोकनेऽपरो भागो नावलोक्यते । एवं द्वितीयस्य भागस्यावलोकने तृतीयो भागः । अतो विधिरेकस्मिन्काले चतुर्भागाणामवलोकनाय स्वसामर्थ्यात् चतुर्मुखोऽभूत् किमित्युत्प्रेक्षा । एतेन वरसानोर्निरतिशयसौन्दर्यं द्योत्यते । वियोगिनीच्छन्दः ।। १ ।।

सदनं बहुभूमिसंकुलं शशिकान्ताहृतसारसज्जितम् ।
शुचिमारकताश्मकुट्टिमं व्यतिशेते विबुधेन्द्रमन्दिरम् ।। २ ।।

शशिकान्तमणेः सारेण निर्मितानि, अमलमरकतमणिनिर्मितकुट्टिमैर्लसितानि बहुभूमिकानि सदनानि देवेन्द्रसदनमप्यतिशेरते ।। २ ।।

शशिकान्तमये शिरोगृहे गृहिणो भान्ति निशाकरागमे ।
द्रुतभित्तिपयःप्रवाहिते तटिनीनावि विलासिनो जनाः ।। ३ ।।

चन्द्रोदये द्रुतानां भित्तीनां जलप्रवाहे तरन्त्यां चन्द्रकान्तमणिमयद्वितीयभूमौ वर्तमानाः सदनस्था वनिताः पुरुषाश्च सरित्स्रोतसि नावि विहरन्तो विलासिन इव प्रतिभान्ति ।। ३ ।।

शिखरैः सितसौधशालिभिः पथि भिन्नाम्बुदवारिसेचिताः ।
तनुवस्त्रवृता व्रजाङ्गनाः प्रतिभान्तीव विविक्तवाससः ।। ४ ।।

शुभ्रप्रासादस्य शिखरैर्भिन्नादम्बुदान्निःसृतैर्जलैः पथि स्विन्नाः सूक्ष्मं वस्त्रं परिदधाना व्रजबाला निर्वसना इव लक्ष्यन्ते । एतेन प्रासादानामत्युत्कर्षत्वं व्यज्यते ।। ४ ।।

नगरी शरदिन्दुसन्निभैर्व्रजवामावदनैर्विराजते ।
वृषभानुसुतानुभावतो ध्रुवमिन्दुः शतविग्रहोऽभवत् ।। ५ ।।

वरसानुर्नगरी शारदचन्द्रसदृशैः, अतिकमनीयैर्मुखैरित्यर्थः । व्रजयुवतीनामाननैः शोभते । मन्ये, भगवत्या श्रीराधायाः प्रभावतश्चन्द्रोऽपि शतं शरीराणि धृत्वा नगरीमिमां प्रकाशयति ।। ५ ।।

सितहर्म्यविलम्बितोरणैः पुरि दम्भोलिमयैर्दिनोत्सवे ।
सुदती न जहौ शशभ्रमात् शशिनः कान्तभुजान्तरग्रहम् ॥ ६ ॥

वरसानुनगरे वणिजां प्रासादेषु हीरकमयैस्तोरणैरुपलक्षितापवरके शयाना काचन सुदती शशिनः शशभ्रमात् प्रियस्य भुजपाशबन्धं प्रातःकालेऽपि न मुञ्चति ।

प्रातरपि शशान् विलोक्येदानीं रजनी निश्शेषा नास्तीति शय्यां न जहातीत्यर्थः । दम्भोलिषु शशभ्रमः ।

एतेन वरसानोराढ्यत्वं सूचितम् ॥ ६ ॥

वनितास्तनकुङ्कुमद्रवैर्यमुना नित्यमहो कषायिता ।
सितरूपपयोनयं महामुनिमुद्वेजयतीव गौतमम् ॥ ७ ॥

व्रजवनितानां स्तनमण्डलेषु लिप्तस्य कुंकुमस्य क्षोदैर्नित्यं कषायिता कालिन्दी 'अभास्वरशुक्लरूपं जले' इति सिद्धान्तयन्तं महामुनिं गौतमं समुद्वेजयतीवेत्युत्प्रेक्ष्यते ।

सकलैश्वर्यसम्पन्नानां व्रजाङ्गनानां नित्यं यमुनास्नानं स्तनमण्डलेषु कुंकुमलेपश्च व्यज्येते ॥ ७ ॥

यदगारशुकोऽपि मानिनीं रतिकामोत्सवहृद्यवार्तया ।
प्रियभर्त्तुरलं प्रसादयन् निशि साचिव्यमुपैति नर्मणः ॥ ८ ॥

वरसानुनगरस्य विलासिनां गृहशुका अपि रतिकामयोरानन्दस्य ललितवार्तया मानिनीः प्रसादयन्तो नायकानां नर्मसाचिव्यं कुर्वन्ति ।

तथा च शुकानां शिक्षितत्वं नागराणां रतिप्रावीण्यञ्च प्रतीयेते ॥८॥

परिखां परितः सितत्विषा भृशमेतन्नगरं विराजते ।
वृषभानुयशः सविग्रहं जलधेर्मध्यतलादिवोद्गतम् ॥ ९ ॥

पुरः परिखां परितो वर्तमानायाः सितविद्युतः कान्तिभिः पुरमेतद् भृशं शोभते । मन्ये, वरसानोः स्वामिनो वृषभानोर्यशो जलरूपशरीरं धृत्वा समुद्रस्य मध्यतलादुद्गतमिव ।

नेयं परिखा, अपितु वृषभानोर्मूर्त्तं यश एव । कविसम्प्रदाये यशसः शुभ्रत्वस्य प्रसिद्धयोत्प्रेक्षेयम् ॥ ९ ॥

अलकैश्शनिराहुकेतवो रविचन्द्रौ नयनैश्च भूमिजः ।
प्रियनागजभालविन्दुना पुरि पीतैर्वसनैर्बृहस्पतिः ॥ १० ॥

दशनैरुशना इति ग्रहैर्वरसानोर्वनिता निषेव्यते ।
अनुभावविशेषशालिनां किमसाध्यं जगतीतलेऽखिले ।। ११ ।।
(युग्मकम्)

वरसानुपत्तने व्रजवनितानाम्, केशरूपेण राहुः, केतुः, शनिश्च, नेत्र-रूपेण रविचन्द्रौ, भाले सिन्दूरस्य विन्दुरूपेण मङ्गलः, पीताम्बररूपेण बृहस्पतिः, दशनरूपेण शुक्रः--इत्येवं निखिला अपि ग्रहा वनिताः श्रयन्ते ।। प्रभावविशेषशालिभिर्जगतीतलेऽस्मिन् असाध्यं किमपि नास्ति ।।१०-११।

विपणेर्धुतवर्णचूर्णकैः परिपीतांशुकपौरयौवतः ।
सततं कृतहोलिकोत्सवो वरसानुर्वृजिनं हरत्यहो ।। १२ ।।

तस्यां वरसानुनगर्यामापणे वायुना प्रसारितैः कुङ्कुमक्षौदैः पुर-युवतीनां वसनानि तथा पीतानि भवन्ति यथा ताः प्रतिदिनमकालेऽपि होलिकोत्सवं कुर्वन्त्यो भवेयुः । तथाभूता नगरी जनानां पापं हरति ।

एतेन वरसानुपत्तनस्य विपणिरतीव समृद्धा, तत्र महान्तश्च श्रेष्ठिनो निवसन्ति, महार्हाणि च वस्तूनि तत्र समुपलभ्यन्ते इति व्यज्यते ।। १२ ।।

धनिनां भ्रमतां विलासिनां पटपिष्टातकसौरभाभृता ।
श्रितकान्तविलाससौरभा प्रतिभातीव वधूः प्रतोलिका ।। १३ ।।

भ्रमतां धनिनां विलासिनां पटपिष्टातकस्य सौरभेण युक्ता वीथी विलासे कान्तस्य शरीरस्य सौरभेण युक्ता वधूरिव प्रतिभाति ।। १३ ।।

सदसद्विषयाङ्गुलिस्तनग्रहणैः पुंसवनस्यदर्भकाः ।
इह वामदृशः पयस्विनीः करकञ्जैर्दुहतेतरामहो ।। १४ ।।

दुग्धपानाभिलाषा अर्भका यासां ता वामनयनाः, सन्तो विषया असन्तो वा विषया या अङ्गुलयः, ताभिः स्तनग्रहणं येषां तैः कुशेशयैः करैः प्रशस्ता गा दुहते इत्याश्चर्यम् ।

यथा लम्बाः स्तनाः, तथाऽङ्गुलयोऽपि, रक्तवर्णताऽपि तेषां समानैव। अतस्तेषामभेदभ्रमः । सामुद्रिकशास्त्रलक्षितसुलक्षणा अङ्गुलयः । संमृद्धाः सुलक्षणाः कुसुमसुकुमार्योऽपि व्रजवामा गा दुहत इत्याश्चर्यम् ।। १४ ।।

वरणोपधिना हिमालयः प्रहरित्वं प्रययौ मुदा यतः ।
स इयाय नगाधिराजतां न सपर्या महतां मुधा क्वचित् ।। १५ ।।

हिमालयः प्राकारव्याजेन वरसानोर्नगरस्य प्रेम्णा प्रहरी समभूत् ।

अतः स श्रीराधायाः कृपातो नगाधिराजोऽभूत्, महतां सपर्या कदापि व्यर्थतां न याति ।। १५ ।।

पटुभिर्बटुभिर्हुतानलैः श्रुतिघोषैर्मधुबिन्दुवर्षिभिः ।
प्रतिशब्दितदिग्वधूमुखैर्जहति स्वापमहो हि नागराः ।। १६ ।।

हुतस्तर्पितोऽनलो यैस्तेषां कुशाग्रबुद्धीनां ब्रह्मचारिणां प्रतिध्वनितानि दिशां वधूनां मुखानि विवराणि यैस्तैः, सुधारसप्लावितैर्वेदघोषैर्वरसानुनगरे नागराः शयनं निद्रां विजहतीति भूरि भागधेयं नागराणाम् ।। १६ ।।

लसतीह विलास एकतस्तप उज्जृम्भत एव सर्वतः ।
अनुरक्तविरक्तभावयोः सहवासोऽप्रतिमः प्रतीयते ।। १७ ।।

वरसानुनगरे एकतो विलासो लसति, अपरत्र सर्वत्र तपसः प्राबल्यम्, विरुद्धधर्मयोरपि अनुरागवैराग्ययोः श्रीराधाया अनुभावतः सदाऽनुपमः सहवासो विद्यते ।। १७ ।।

सुरसद्मनि सामगीतयः प्रियहर्म्येषु विलासगीतयः ।
उटजा उपलैः कुशासनैः शुभसौधं मणिभिश्च भूषितम् ।। १८ ।।

सामान्येन निरूपितोऽनुरागवैराग्ययोः सहभावो विशेषेण निरूप्यते ।

क्वचिद्देवायतनेषु सामवेदस्य ऋचो मधुरेण स्वरेण गीयन्ते, धनिनां सद्मसु विलासगीतयो विलसन्ति । एवं क्वचित् पर्णशाला उपलैः (गोहरीति भाषायामुच्यते) कुशासनैश्च विभूष्यन्ते, प्रासादाश्च मणिभिर्मण्ड्यन्ते ।।१८।।

हुतहव्यसुगन्धशालितः क्रतुधूमः शरदम्बुदायते ।
पुरवासिविलासिसद्मनोऽगरधूमः सुरभिर्विजृम्भते ।। १९ ।।

एकतो हुतानां हव्यानां सौरभशाली यज्ञधूमः शरदोऽम्बुद इव नभसि शोभते । अपरतश्च विलासिनां पौराणां सद्मनः सुरभिरगरादिसुगन्धिद्रव्यधूमः सर्वतः प्रसरति ।। १९ ।।

तरवो मुनिवल्कलैर्वृताः कमनीयां द्युतिमाश्रमे श्रिताः ।
बहुवस्त्रदुकूलकान्तिभिर्विहसन्तीन्द्रपुरीं पुरीसभाः ।। २० ।।

एकत आश्रमे मुनीनां तरुवल्कलवस्त्रैस्तरवः कमनीयां कान्ति कलयन्ति । अपरतश्च बहुमूल्यानां दुकूलानां कान्तिभिर्वरसानुसदनानीन्द्रपुरीं विहसन्ति ।

अमरावत्यामपि तादृशी समृद्धिर्नास्ति, यादृशी समृद्धिरिहेत्युपहासहेतुः ।। २० ।।

गुरुभिः पटुशिष्यमण्डले परमाणुः परिचर्च्यते मठे ।
अणुयोगवियोगजो यदा द्व्यणुकोत्पत्तिलयौ प्रसाधितौ ॥ २१ ॥
प्रतियोगिसमानदेशकस्तदभावोऽपि हि संमतः सदा ।
परमाणुनिरंशतानये कथमास्था सुधियां भवेत्तदा ॥ २२ ॥

गुरुकुलेषु पटूनां शिष्याणां निलये गुरुभिः परमाणुर्विचारकोटिं नीयते यद् यद्यण्वोः संयोगाद् द्व्यणुकोत्पत्तिः, वियोगाल्लयश्च गौतमेन प्रसाधितौ, तर्हि प्रतियोगिसमानदेशः संयोगाभावोऽपि सम्मतः स्यात् । एवञ्च संयोगस्याव्याप्यवृत्तित्वाद् यत्किञ्चिद्देशेन संयोगः, यत्किञ्चिद्देशेन संयोगाभाव इति परमाणूनां सावयवत्वं सिद्धम् । 'यद् यत् सावयवं तत्तत् सर्वमनित्यम्' इति व्याप्त्या परमाणूनां नित्यतायां सुधियां कथमास्था भवेदिति भावः ॥ २१-२२ ॥

युवराजिभिरादृते महे नगरोद्याननिकुञ्जमण्डपे ।
परमाणुनिभोदराबला मदनानन्दमहो वितन्वते ॥ २३ ॥

नगरोद्यानस्य निकुञ्जमण्डपे युववृन्दैः प्रारब्धे मदनमहोत्सवे परमाणुसदृशोदरा अबला मदनानन्दं लभन्ते ।

यथा परमाणवोऽतीव सूक्ष्माः सन्ति तथैव वामानां कटिभागा अपि तनवः सन्ति । कटिभागस्य तनुत्वे तात्पर्यम्, नतु परोक्षत्वे ॥ २३ ॥

मुनिवृन्दमतुल्यकानने परमान्दमथो समाधिषु ।
वणिजाञ्चय आपणेषु च द्रविणानन्दमविन्दताधिकम् ॥ २४ ॥

अनुपमकानने समाधिषु मुनिवृन्दं परमानन्दम्, वणिग्वृन्दञ्चापणेषु द्रव्यानन्दं भजते । एवं त्यागभोगयोः सहवासः स्पष्टतया परिलक्ष्यते ॥२४॥

परमाणुनिरंशता यदा विबुधव्रातसमर्थिता सदा ।
असदंशकयोस्तयोस्तदा कथमार्यैरपि योग इष्यते ॥ २५ ॥

विदुषां निवहैरेकमत्या परमाणूनां निरवयवता साधिता चेत्, तर्हि निरवयवयोस्तयोर्द्वयोः संयोगस्तैरार्यैः कथमिष्यते ! ॥ २५ ॥

सुषमामतुलां निरीक्षितुं पुरि पत्या व्रजमागता पुनः ।
अतिनन्दनमयं त्वद्वथो अनुनीता न शची वनं जहौ ॥ २६ ॥

अनुपमां शोभां द्रष्टुं वरसानुं पुरन्दरेण साकं समागता अतिनन्दनम्, अत एवाद्वितीयं गह्वरं वनमनुनीताऽपि शची न जहौ । गह्वरस्य नन्दनवनापेक्षयापि सौन्दर्यातिशायित्वं व्यज्यते ॥२६ ॥

अनुमत्य शचीं पुरन्दरो व्रजसौन्दर्यविलीनमानसः ।
न ययावमरावतीं स्वविद् जनिमाक्षालितकल्मषो यथा ॥ २७ ॥

व्रजस्य सौन्दर्यस्य दर्शने दत्तावधान इन्द्रोऽपि शचीमनुमत्यापगतपाप आत्मविद् जीवो यथा पुनर्जननं न याति, तथैवामरावतीं न ययौ । एवञ्च वरसानोः सौन्दर्येणावर्जितमानसौ शचीपुरन्दरौ पुनः स्वपुरीं न ययतुः २७ ॥

विरहं प्रियभर्तुरक्षमा परिसोढुं दयितामरावती ।
प्रजिधाय सुरेन्द्रसन्निधावमरानात्मदशाविदो व्रजे ॥ २८ ॥

शक्रस्य विरहं सोढुमसमर्था प्रियाऽमरावती स्वदशाविदोऽमरान् सुरेन्द्रसन्निधौ प्रजिघाय ॥ २८ ॥

अमरा अमरावतीदशां गदितुं शक्रसमीपमागताः ।
व्रजदर्शनशान्तवासनाः स्वविधेयं नहि सस्मरुस्तदा ॥ २९ ॥

देवा उत्काया अमरावत्या दशां प्रतिपादयितुमिन्द्रसमीपमागता अपि व्रजदर्शनेन स्ववासनायाः शान्त्या शक्रसमीपे किं कथनीयमिति सर्वं विस्मृतवन्तः ॥ २९ ॥

परिहीनमिथोविरुद्धतं प्रतिपद्यप्रियगोपरूपताम् ।
क्रमतः सुरदैत्यराक्षसं वरसानौ हि निवासमादधौ ॥ ३० ॥

व्रजे श्रीराधायाः प्रभावाद् गोगोपरूपतां प्रतिपद्य परस्परं विरोधं त्यजन्तः क्रमेण सुरा दैत्या राक्षसा वरसानुनगरे निवासमादधुः ॥ ३० ॥

गुरुसद्मनि विप्रवर्णिनः प्रथयन्तः प्रतिभां पुरातनीम् ।
पदशास्त्रमधीयतेऽश्रमादजिनाषाढविभूतिभूषिताः ॥ ३१ ॥

गुरुकुले मृगचर्मदण्डभस्मभिर्मण्डिताः प्राग्जन्मार्जितां प्रतिभां प्रथयन्तोऽतीव प्रतिभासम्पन्ना ब्रह्मचारिणो व्याकरणशास्त्रं पठन्ति । 'नवनवोन्मेषशालिनी बुद्धिः प्रतिभा' । अल्पेनापि श्रमेण विशिष्टं ज्ञानमर्जयन्तीति भावः ॥ ३१ ॥

स्फुटतीह जगद् यतोऽखिलं निगमे ब्रह्म यदेव शब्द्यते ।
परमात्मपदेन गीयते तदपि स्फोटतया पदागमे ॥ ३२ ॥

गुरुकुले वर्णिभिरभिधीयते यद् यतोऽखिलं जगदिदं स्फुटति प्रकाशते यच्च निगमे वर्ण्यते, यच्च न्यायशास्त्रे परमात्मपदेन गीयते, तदेव व्याकरण-शास्त्रे स्फोटपदेन प्रतिपाद्यते ॥ ३२ ॥

विपणौ युगपद् विलोक्यते विविधं वस्तु सदैव नागरैः ।
विजितेन्द्रिययुक्तयोगिभिः सहसा विश्वमिवागतं करे ॥ ३३ ॥

नागरैरापणे सदैव सर्वं वस्तु विलोक्यते, यथा विजितेन्द्रियैरत एव युक्तयोगिभिः करे समागतं सर्वं वस्तु सहसैव विलोक्यते ।

"योगिनो द्विविधाः प्रोक्ता युक्तयुञ्जानभेदतः ।
युक्तस्य सर्वथा भानं चिन्तासहकृतोऽपरः ॥"

इति लक्षणलक्षितानां योगिनां सर्वदा सर्वस्य वस्तुनो भानं भवति । अनेनापणस्यैकस्यापि सकलवस्तुसम्पन्नत्वं व्यज्यते ॥ ३३ ॥

रविकान्तमणीविनिर्मितो वरणो भानुमरीचिभिः पुरः ।
परिखापरिवेषितोऽभितो वडवाग्निर्जलधाविवाबभौ ॥ ३४ ॥

सूर्यकान्तमणिभिर्निर्मितः सूर्यकिरणैः प्रदीपितो वरसानोः प्राकारोऽभितः परिखावेष्टितः समुद्रे वडवाग्निरिव शोभते ॥ ३४ ॥

तरसा विजिगीषया रवेस्तुरगाणां वरसानुवाजिनः ।
दशनैरतिचर्व्य सृक्कणी अवभिन्दन्ति महीं शफै रुषा ॥ ३५ ॥

वरसानुवाजिनः सूर्यस्य तुरगान् वेगेन विजेतुं दन्तैरोष्ठप्रान्तौ चर्वयन्तः खुरैः क्रोधेन पृथिवीं भिन्दन्ति ।

उत्तमाश्वानां चाञ्चल्यं सुलक्षणमित्यश्वलक्षणशास्त्रे निरूपितम् । चाञ्चल्यादेव ओष्ठप्रान्तयोश्चर्वणम्, महीविदारणञ्चेति तुरगाणामुत्तमता । वरसानौ उत्तमजातीया अश्वाः सन्तीति भावः ॥ ३५ ॥

वियति व्रजतोर्हरेर्हयान् उपरिक्षिप्तपदा निपात्य हि ।
अवसाययितुं जवस्मयं पुरि हेषन्त इवात्र वाजिनः ॥ ३६ ॥

आकाशमार्गे धावतः सूर्यस्याश्वान् निपात्य तेषां वेगदर्पान् नाशयितुं वरसानुनगरस्याश्वाः पदानि नभसि निक्षिप्य हिनहिनायन्ते । अश्वानाम् 'हिन हिनाना' इति लोके प्रसिद्धम् । परान् अश्वान् दृष्टवा हेषाकरणं वियति पादप्रक्षेपणश्चोत्तमाश्वानां जातिस्वभावः ॥ ३६ ॥

मदलोलुपषट्पदावलेर्मधुरामक्षि निमील्य गीतिकाम् ।
श्रवणैः पिबतो मुदा प्रगे करिणो गोचरयन्ति नागराः ॥ ३७ ॥

दानलुब्धानां भ्रमराणां मधुरं गुञ्जनं नेत्रे निमील्य कर्णैर्मुदा पिबतः, शृण्वत इत्यर्थः । गजान् नागरा वरसानुवासिनः प्रातः पश्यन्ति । प्रातर्हस्तिनो दर्शनं क्षेमाय कल्पत इति सामुद्रिकशास्त्रम् ॥ ३७ ॥

सुतदानकपोलपालयः स्तनितैस्तर्जितदिग्गजालयः ।
रदभीतसुरेन्द्रवारणा विरहिव्रातशुचे घनागमः ॥ ३८ ॥

गर्जनैस्त्रासिता दिग्गजालिर्यैस्ते, वहद् दानं कपोलपाली येषां ते, रदैर्भीतः सुरेन्द्रवारण ऐरावतो येषां ते, एवम्भूता वरसानुहस्तिनः प्रोषितभर्तृकाणां स्मरवेदनायै अकालमेघोदय इवाभवन् ।

वरसानौ लम्बदन्ता वहद्दानवारयोऽमरेन्द्रगजस्यापि भीतिदायका अतीव कृष्णा उत्तमहस्तिनः सन्तीत्यर्थः ॥ ३८ ॥

करिशावकशीकरैर्भृशं स्नपिताः स्मेरमुखा व्रजाङ्गनाः ।
कमनीयकरैः कपित्थकं कलभानां वदनेऽर्पयन्ति हि ॥ ३९ ॥

कलभानां शुण्डेभ्यो निःसृतविन्दुभिरार्द्रवसनाः स्मितानना व्रजवनिताः कोमलकरैः करिशावकानां मुखे कपित्थफलं समर्पयन्ति ।

एतेन व्रजवनितानां पशून् प्रत्यपि वात्सल्यं प्रतीयते ॥ ३९ ॥

प्रतिगोकुलमर्जुनार्जुनीसमजः शम्भुनगस्य मानसम् ।
क्षरता पयसा महीतले भृशमुद्वेलयतीव शाश्वतम् ॥ ४० ॥

गोकुले श्वेतगावो भूमौ प्रसरता पयसा शम्भुनगस्य हिमालयस्य मानसं नित्यमुद्वेलयन्तीव । श्वेतगवां समुदायो नगाधिराज इव, प्रवहद् दुग्धानि निर्झरप्रपात इव ॥ ४० ॥

सुरभीः स्नुतपीवरस्तनीर्व्रजबाला सततं गृहे गृहे ।
सुमचन्दनधूपदीपकैर्विधिनार्चन्ति सुधामयोक्तिभिः ॥ ४१ ॥

गोपाङ्गनाः प्रतिगृहं क्षरन्तः पीवराः स्तना यासां ताः, गाः पुष्पधूपदीपचन्दनैर्विधिना मधुरवचोभिरर्चन्ति । गावो व्रजे विशेषतः आद्रियन्ते ॥ ४१ ॥

पुरि पश्चिमरात्र उत्थिताः शिशवः क्षीरपिपासयाऽसकृत् ।
परितः परिवृत्य कीलकं सहसोत्पाटच ययुः स्वमातरम् ॥ ४२ ॥

वरसानुनगरे प्रातः क्षुधार्ता वत्साः क्षीरपिपासयाऽनेकवारं कीलकं परिवृत्य सहसोत्पाटच च स्वमातरं ययुः ॥ ४२ ॥

सुरभिः स्तनचक्रगौरवाच्चलितुं द्वित्रपदानि नाशकत् ।
रसनापरिलीढविग्रहं चललाङ्गूलमपाययच्च तम् ॥ ४३ ॥

सुरभिश्च स्तनस्य भारेण द्वित्राणि पदान्यपि चलितुमक्षमा जिह्वया वत्सस्य शरीरं लिहन्ती लाङ्गूलञ्च चालयन्ती तं वत्सं पाययति ॥ ४३ ॥

खुरधातसमुत्थरेणवो दिवसान्ते वनगोचराद् गवाम् ।
वृषभानुयशः सविग्रहं वियतो वक्षसि सन्दधौ पदम् ॥ ४४ ॥

दिनान्ते गोचरभूमेर्गोष्ठं समागच्छन्तीनां गवां खुराणामाघातेन मुत्थिता रेणवो धृतसमुज्ज्वलरेणु शरीरं वरसानुराजस्य यश एव नभस उरसि पादं सन्धत्ते। इमे न रेणवः, किन्तु वरसानुराजस्य यश एव ॥ ४४ ॥

यमुनापुलिने च शाद्वले रमणीयद्युतिलज्जिताम्बुदे।
विमले हरिदश्मभाजने धवलोघाः स्फटिका इवाबभुः ॥ ४५ ॥

दूर्वादलहरिते अत एव रमणीयया कान्त्या लज्जितो वर्षणोन्मुखः श्यामो मेघो येन, तस्मिन् यमुनातटे चरन्त्यः श्वेता गावो निर्मले हरिन्मणिपात्रे स्फटिकमणय इव भान्ति ॥ ४५ ॥

तरणेस्तनयां तमालजां द्युतिमाप्तां मुनिगोव्रजः स्थितः।
व्रजधामधरावमानिनो लघुरोमन्थमरेण दर्भति ॥ ४६ ॥

तमालतरुकान्ति प्राप्ताया यमुनायास्तटे स्थिता मुनीनां गावो व्रजभूमेरपमानकारिणो जनान् लघुलघुरोमन्थैर्भीषयान्ति।

यदि व्रजभूमेरवमाननां कुर्यास्त तदा युष्मान् चर्वयिष्याम इति ध्वनिः ॥ ४६ ॥

रविगौरकराप्तकान्तयः कपिशाध्न्याःकनकाम्वरा इव।
तटिनीतटसीमगा दधुर्वरसानोर्वरणस्य विभ्रमम् ॥ ४७ ॥

यमुनातीरे स्थिताः सूर्यकिरणानां कान्तिभृतोऽत एव कनकवसनाच्छादिता इव गावो वरसानुप्राकारस्य विलासं दधतीव।

श्वेता अनेका गावः सूर्यकिरणैर्विभाताः; सुवर्णनिर्मितो वरसानुप्राकार इति उत्प्रेक्षामूलम् ॥ ४७ ॥

पुलिनाम्बरवित्तविग्रहा मुनिवृन्दस्तुतपादपङ्कजा।
पशुपक्षिचयार्तिनाशना व्रजभूमिं श्रयते कलिन्दजा ॥ ४८ ॥

पुलिनमेवाम्बरम् तेन वित्तो युक्तो विग्रहः शरीरं यस्याः सा, मुनिभिः स्तुतं पादपङ्कजं यस्याः सा, पशूनां पक्षिणाञ्च पिपासाशमना यमुना व्रजभूमिं सेवते ॥ ४८ ॥

जनमारणसोदरांहसो निकुरुम्बं जलनीलिमच्छलम्।
इतरत्र विमार्ष्टुमक्षमा व्रजभूमिं यमुना हि सेवते ॥ ४९ ॥

जनानां मारणजन्यं सोदरस्य यमस्य पापपुञ्जं जलस्य नीलिमच्छलमन्यत्र क्षालयितुमसमर्था यमुना क्षालयितुं व्रजभूमिं सेवते।

यमुनाजलं नीलम्, यमुना च यमानुजा, व्रजे वहति चेतीयमुत्प्रेक्षा ॥ ४९ ॥

नवनीरदनीलविग्रहा घनतापिच्छकलापकुन्तला।
नलिनीदलनेत्रमण्डिता वृजिनं वर्जयते यमानुजा ॥ ५० ॥

नूतनमेघ इव नीलं शरीरं यस्याः सा, तमालदलान्येव नीलकेशा यस्याः सा, नलिनीदलेनैव नयनेन च मण्डिता श्रीयमुना पापं हरति ॥५०॥

विदिते विमले रवेः कुले जनिमाप्तस्य यमस्य कर्मणा।
अपवादभयेन निम्नगा मुनिवासां व्रजभूमिमागता ॥ ५१ ॥

सूर्यस्य प्रसिद्धे निर्मले कुले लब्धजन्मनो यमस्य कुत्सितकर्मणा जाताद् अपवादाद् भयेन निम्नगा सती यमुना मुनिवासभूतां व्रजभूमिमागता। यमुनानिम्नगात्वं यमस्य कुत्सितकर्मणः फलम् ॥ ५१ ॥

हरिचन्दनदामकुण्डला तटवानीरविशालकुन्तला।
करवीरकलापमालिनी यमुना भाति तमालशालिनी ॥ ५२ ॥

पारिजातकुसुमान्येव कुण्डले कर्णभूषणे यस्याः सा, तीरस्थिता वेतसा एव विशालाः केशा यस्याः सा, करवीरपुष्पाणां माला यस्याः सा, तमालैः शोभिता यमुना व्रजे भाति ॥ ५२ ॥

प्रियसारससारनासिका विकसद्वारिजवामलोचना।
कलशिञ्जितहंसनूपुरा यमुना भाति तरङ्गभंगुरा ॥५३ ॥

मनोहराः सारसा एव नासिका यस्याः सा, विकसन्ति वारिजान्येव वामे मनोहरे लोचने यस्याः सा, कलं मधुरं ध्वनिं कुर्वन्तो हंसा एव नूपुरे यस्याः सा, तरङ्गैर्मधुरा यमुना भाति ॥ ५३ ॥

चलतालतरङ्गभङ्गिभिर्वृषभानोस्तनयापदाङ्कितम्।
पुलिनं विमलं मुहुर्मुहुर्नमतीवारुणसारथेः सुता ॥५४ ॥

चलानां तालानामिव तरङ्गाणां विलासैर्वृषभानोस्तनयया श्रीराधया पादचिह्नितं निर्मलं तीरमरुणसारथेः सूर्यस्य सुता यमुना प्रणमतीव ॥ ५४ ॥

व्रजधाम विलोललोचना प्रियसन्देशहरा कलिन्दजा।
व्रजराजमहो अहर्निशं व्यथमाना प्रतिधाम पश्यति ॥ ५५ ॥

रासोत्सवान्तेऽन्तर्हिताय कृष्णाय प्रतिपादनीयं व्रजाङ्गनानां सन्देशमादाय कष्टमनुभवन्ती यमुनाऽहर्निशं भगवन्तं श्रीकृष्णं स्थाने स्थाने अन्विष्यतीत्युत्प्रेक्षा ॥ ५५ ॥

तरलोर्मिकरैः कुशेशयैरभयं साधुजनाय यच्छती ।
कमठैरसते च साध्वसं यमुना भाति विभावरीव सा ॥५६॥

पद्मैरेव चञ्चलतरङ्गहस्तैः साधुजनेभ्योऽभयं ददाना कच्छपैश्चासाधुजनेभ्यो भयं ददाना विभावरीव श्यामा यमुना नितरां विभाति ॥ ५६ ॥

वनितास्तनमण्डलच्युतैर्घुसृणैः साधु कषायितार्कजा ।
रमणी कमलोत्तरद्रवैः परिषिक्ताम्बरमण्डितेव सा ॥५७॥

स्नानकाले गोपाङ्गनानां स्तनेभ्यश्च्युतैः कुंकुमैः कामं कषायरागयुक्ता सा यमुना कुसुम्भरसरक्तं वसनं परिदधाना कान्तेव भाति ॥ ५७ ॥

विरहे प्रियमाधवस्य हि व्रजबालानयनाम्बुकज्जलम् ।
यमुनाजलमावहद् यशो भुवि लेभे जनमङ्गलं महत् ॥ ५८ ॥

प्रियस्य माधवस्य विरहे व्रजबालानां नयनेभ्यो निःसृतं सकज्जलमश्रु यमुनाजलरूपं यशो भुवि महते जनमङ्गलाय कल्पते ।

शोकाश्रु अमङ्गलाय कल्पते, किन्तु पुण्यश्लोकानां व्रजाङ्गनानामश्रु महते क्षेमायाभवदिति महान् प्रभावो भगवद्भक्तानाम् ॥ ५८ ॥

मणिमण्डिततीरकुट्टिमा शिखिशाखाविलसत्तटच्छटा ।
फलशालिकदम्बशालिनी यमुना भाति मलापहारिणी ॥ ५९ ॥

मणिभिर्मण्डितं तीरस्य कुट्टिमं बद्धभूमिर्यस्याः सा, शिखिभिर्मयूरैः युक्ताभिः शाखाभिर्विलसन्ती तटस्यच्छटा कान्तिर्यस्याः सा, फलयुक्तैः कदम्बैः शालिनी शोभायुक्ता, मलानामपहारिणी यमुना भाति ॥ ५९ ॥

व्रजभूमिनभोगसद्मनां मणिसोपानतटावमार्जने ।
सुभगत्वमवाप भानुजा सुरवन्द्यापि शिवा न जाह्नवी ॥ ६० ॥

व्रजभूमेर्गगनचुम्बिनां मणिनिर्मितसोपानानां मार्जने यमुनाया एव सौभाग्यम्, न तु देववन्द्यायाः शिवाया गङ्गायाः ॥ ६० ॥

मधुसूदनपादपङ्कजे विलयं यातु ममाखिलो भवः ।
तपसा द्रवतामुपागमन् नगजाता हि कलिन्दकन्यका ॥ ६१ ॥

मधुसूदनस्य चरणकमले मम सर्वाणि कर्माणि विलयं यान्त्विति तपोजन्येन तेजसा पर्वतकन्यापि कलिन्दजा जलरूपतां प्रापत् ।

पर्वतपुत्री प्रस्तरस्वरूपापि श्रीकृष्णचरणप्राप्तये तपसा द्रवीभूता तत्पादप्रक्षालनं करोतीति भावः ॥ ६१ ॥

मुरलीरवमुग्धमानसा विहगा देवमनुष्यदानवाः ।
अधुनापि मलापहं सुखं यमुनातीरमुपासतेऽद्वयम् ।। ६२ ।।

हे कलिन्दगिरिकन्ये, श्रीकृष्णेन वादिताया वंश्या रवैः प्रसीदच्चेतसो देवा दैत्या मनुष्याश्चाद्यापि पापापहारकमनुपमं तव तीरमुपासते ।। ६२ ।।

तव देवि अनन्यधन्यता कविवागीशगिरामगोचरः ।
मुनिदुर्लभतत्त्वमद्वयं पुलिने नृत्यति भानुजे मुदा ।। ६३ ।।

हे देवि भानुजे, देवान्तरेष्वविद्यमानायाः तव श्रेष्ठताया वर्णनं मया कथं कर्त्तुं पार्येत, या भार्गवस्य बृहस्पतेश्च गिरां विषयो नास्ति । यतो हि मुनिभिरपि दुर्लभमद्वितीयं श्रीकृष्णतत्त्वं तव तीरे नृत्यति ।।६३ ।।

हरिपादपरागरञ्जिता विनिवृत्ताखिलतर्षमानसाः ।
मुनयोऽपि तटं तवाभयं प्रतिपन्नाः किमपेक्ष्य भानुजे ।। ६४ ।।

हे यमुने, येषां मनसि कश्चनाप्यभिलाषो नास्ति, अत एव हरिपदपङ्कजरसतृप्ताः कृतब्रह्मसाक्षात्कारा मुनयोऽपि तवाभयं तटं किमपेक्ष्य सेवन्ते इति त एव जानन्ति । एतेन यमुनाया महत् महत्त्वं प्रतीयते ।। ६४ ।।

यमुनायाः श्यामत्वमुत्प्रेक्ष्यते—

वसनच्छलतो व्रजाङ्गनावरणं नीपतरौ मुरारिणा ।
अवलम्बितमेव भासते प्रतिबिम्बात्मतया तवाम्बुनि ।। ६५ ।।

हे भानुजे, भगवान् श्रीकृष्णो वस्त्रव्याजेन व्रजबालानामावरणं कदम्बतरावलम्बितवान् । तदेव वस्त्रं प्रतिबिम्बरूपेण तव जले प्रतिभासते । अत एव जले श्यामता प्रतीयते ।। ६५ ।।

वृषभानुसुतावनस्थली मम वारा विहतिं न चाप्नुयात् ।
इति चारुविचारभानुजा वरसानुं किल दूरतोऽनमत् ।। ६६ ।।

वृषभानुसुताया गह्वरं वनं कदाचित् मम वारिधारया क्षतिं न यायादिति निर्मलविचारेण यमुना वरसानुं दूरत एवानमत् ।। ६६ ।।

जलभङ्गमिषेण भानुजा व्रजभूमिं नमतीव दण्डवत् ।
अत एव तपस्विनोऽधुनाप्यनुकुर्वन्ति महात्मवर्त्मनाम् ।। ६७ ।।

जलतरङ्गव्याजेन भानुजा व्रजभूमिं दण्डवन्नमतीव । अत एव तपस्विनोऽधुनापि महाजनाचरितं वर्त्म दण्डवत्परिक्रमणं विदधति ।। ६७ ।।

विषयाद् विनिवृत्तमानसो मधुरं वारि सुधोपमं पिबन् ।
जनिमृत्युभयं न मन्यते कृतपुण्यो विरलस्तवार्कजे ॥ ६८ ॥

हे यमुने, तवामृतमिव मधुरं जलं पिबन्, अत एव विषयेभ्यो निवृत्तमना जननमरणभयं न मन्यते । तथाविधः कश्चनैव पुण्यशाली जनो विद्यते ॥ ६८ ॥

मलमार्जनमल्लवारयो विरलाः सन्ति महापगा भुवि ।
कलिकालियकालकूटतो जगतीं रक्षितुमर्कजेव का ॥ ६९ ॥

हे भानुजे, भुवि पापानामपाकरणे शक्तिसम्पन्नजला महानद्यः कियत्यः सन्ति ? तासु त्वमेकैव । कलेरशमनीयविषतो रक्षितुं जगतीं यमुनेव कान्या नदी ! न काचनापीत्यर्थः ॥ ६९ ॥

सदयेऽभयदे समृद्धिदे भवदे किन्न तनोषि भानुजे ।
अपवाद इहैव किन्त्वहं मम मोहो विलयं गतो न हि ॥ ७० ॥

हे दयाशीले, अभयदे, समृद्धिदे, संसारनाशिनि, यमुने, किन्न तनोषि, अर्थात् सर्वं करोषि । किन्तु अत्राहमेवापवादः, यतो हि मम मोहो विलयं न गतः ॥ ७० ॥

मृगपक्षिविपक्षिणां तृषं शमयत्यम्बु तवातिनिर्मलम् ।
जगदम्ब ममान्तिमे क्षणे वदने विन्दुमपि क्षिपेः स्वयम् ॥ ७१ ॥

हे मातः कलिन्दकन्ये, पशुपक्षिणां विपक्षिणामपि तृष्णां पिपासां तव निर्मलजलं शान्ति नयति । अतो मदीयापीयं प्रार्थनास्ति यन्ममान्तिमे क्षणे मुखे एकमपि विन्दुं स्वहस्तेन क्षिपेः ॥ ७१ ॥

सैषा महार्हमणिमण्डितवेश्मभागा
राधापदाङ्कपरिभूषितभूमिभागा ।
वाञ्छोपनीतवरसर्वसमृद्धिसारा
राधारसा विजयतां जितशक्रसारा ॥ ७२ ॥

महामूल्यमणिभिः शोभितानि सदनानि यस्याः सा, श्रीराधायाः पदकमलैरङ्कितो भूमिभागो यस्याः सा, इच्छामात्रेणोपस्थिता सर्वा श्रेष्ठा समृद्धिर्यस्याः सा, जिता अमरावतीसमृद्धिः यया सा, एवम्भूता श्रीराधाया धरा सर्वोत्कर्षेण वर्तते ॥ ७२ ॥

अजगरगणवीतं व्यालसिंहैः परीतं
खगकलकलरावं यक्षगन्धर्वगीतम् ।

मुनिकुलहुतहव्यं वर्णिवेदोच्चघोषं
हरतु हरतु पापं धाम वृन्दावनाख्यम् ॥ ७३ ॥

अजगरैर्व्याप्तं सिंहव्याघ्रादिभिः सेवितं पक्षिणां कलकलध्वनियुक्तं मुनीनां हुतद्रव्योत्थधूमैर्विराजितं ब्रह्मचारिणां वेदघोषैर्मुखरितं बृन्दावनं धाम पापं शमयतु ।

विरोधिनामपि समं समवाय इति धाम्नो माहात्म्यम् । मालिनीच्छन्दः ॥ ७३ ॥

श्रीराधिकाचरणपङ्कजरागजुष्टं
श्रीमाधवांघ्रिपदपूतपरागपुष्टम् ।
चन्द्रावलीमुखमरीचिविकासिताशं
वृन्दावनं हरतु मे भव पापजालम् ॥ ७४ ॥

श्रीराधायाश्चरणयो रागमिश्रितं श्रीकृष्णस्य चरणपवित्रपरागैर्युक्तं चन्द्रावलीमुखकान्तिभिर्विभावितं वृन्दावनं मे भवपापजालं शमयतु ॥ ७४ ॥

श्रीमत्सभापतिपदात्समधीत्य शास्त्रं
काव्यं व्यचिन्तयत यः कविपुङ्गवानाम् ।
तद्राधिकाचरणचिन्तनचारुकाव्ये
सर्गः प्रसादरचितेऽयमगात् समाप्तिम् ॥ ७५ ॥

सर्वतन्त्रस्वतन्त्रश्रीसभापतिशर्मोपाध्यायात् शास्त्रं समधीत्य कविपुङ्गवानां काव्यं व्यचिन्त्य च श्रीराधिकाचरणचिन्तनरूपं चारु काव्यं श्रीकालिकाप्रसादशुक्लो व्यधात् । यस्यायं द्वितीयः सर्गः समाप्तिमगमत् ॥ ७५ ॥

इति देवरियामण्डलान्तर्गत (देवपुरी) कुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये द्वितीयः सर्गः समाप्तः ॥



तृतीयः सर्गः

विविधरत्नविभूषितमण्डपे व्रजवनीवनिताननभासिते ।
सुरभिशीतलमन्दसमीरणे सुरसमीरितपुष्पसभाजिते ॥ १ ॥

अनेकै रत्नैर्विभूषितो मण्डपो यस्मिन्, व्रजवनितानामाननचन्द्रैर्भासिते, सुरभिशीतलमन्दसमीरणेन सेविते, सुरैः क्षिप्तैः पुष्पैः समर्चिते वृषभानुगृहाङ्गणे मधुरतत्त्वमतिरोहितमभूदिति पञ्चमेन पदयेनान्वयः ॥१॥

कुसुमिते व्रजभूमिमहीरुहे शकुनिकीर्त्तितकीर्तियशश्चये ।
अमरदुन्दुभिनादनिनादिते सुभगकिन्नरलास्यविलासिते ॥ २ ॥

व्रजभूमेस्तरौ कुसुमिते खगैर्गीते कीर्तियशश्चयेऽमरदुन्दुभिनादे प्रसरति मनोहरकिन्नरलास्यलसिते मधुरतत्त्वमतिरोहितमभूदिति पञ्चमेनान्वयः ॥२॥

सुरभिगोमयलिप्तमहीतले मणिसुमण्डितमण्डलमण्डिते ।
सुरवधूमृदुगीतकुलोदये प्रकृतिसर्वसमृद्धिसमेधिते ॥ ३ ॥

सुरभेर्गोर्गोमयेन महीतले लिप्ते मणिभिर्मण्डितं मण्डलं यस्मिन् तस्मिन् मण्डपे, अमररमणीभिर्गीतः कुलोदयः कुलाभ्युदयो यस्मिन् तस्मिन्, प्रकृतेः सकलया सम्पदा विभाविते, मधुरतत्त्वमतिरोहितमभूदिति पञ्चमेन पदयेनान्वयः ॥ ३ ॥

श्रुतिसुधोपमसामसमन्विते जलदहीरकतोरणरोचिते ।
व्रजवधूवरभूषणभूषिते मणिगणाश्रितवस्त्रवितानिते ॥ ४ ॥

श्रोत्रपीयूषसदृशेन साम्ना समन्विते, नवमेघसदृशेन हीरकतोरणेन दीप्ते, व्रजाङ्गनानां भव्यैर्भूषणैर्भूषिते, मणिभिर्जटितविताने, मधुरतत्त्वमतिरोहितमभूदिति पञ्चमेनान्वयः ॥ ४ ॥

प्रणतकिन्नरमागधवन्दितामलयशो वृषभानुगृहाङ्गणे ।
किमपि गौरमचिन्त्यमहो महो मधुरतत्त्वमभूदतिरोहितम् ॥ ५ ॥

किन्नरमागधादिभिः प्रणतस्य वृषभानोः सद्मनि गौरवर्णमनिर्वचनीयं महो मधुरतत्त्वमतिरोहितमभूत् ।

प्रथमश्लोकतः पञ्चमश्लोकपर्यन्तं कुलकम् ॥ ५ ॥

सुरगणेषु नुवत्सु मृदुस्तवैर्द्विजवरश्रुतिघोषसमन्वितैः ।
कलितकोमलकान्तपदैः पुनर्व्रजवधूवचनैरभिनन्दितम् ॥ ६ ॥

मधुरतत्त्वस्य श्रीराधारूपस्याविर्भावकाले देवाः स्तुवन्ति, विप्रा वेदघोषं कुर्वन्ति, व्रजाङ्गना; कोमलकान्तपदावलिभिरभिनन्दन्ति ॥ ६ ॥

प्रसरता महसा वरसानुभूरमृतवारिधिपूरनिमज्जिता ।
विमलभालतलं हरिदाननं विधुसहस्रकरैश्च विराजितम् ॥ ७ ॥

वरसानुनगरी प्रसरता तेजसा सुधासमुद्रे निमग्ना, दिशां मुखस्य निर्मलं भालतलं विधुसहस्रेण शोभितमिव ॥ ७ ॥

किमिति लोकमुदावहमद्भुतं कुतुकमेतदभूद् व्रजमण्डले ।
स्थितिलयादि यतस्तदिदं स्वयं वृषभभानुकुले हि महीयते ॥ ८ ॥

प्रसरति तेजसि व्रजमण्डले लोकस्यानन्दकरं किमिति कौतुकमभूत् । ततो यतो जगतः स्थिति प्रलयादि, तदिदं तत्त्वं वृषभानुकुले सम्प्रति महीयत इति नभसो मरुतां गिरः समुदभूवन् इति परेणान्वयः ॥ ८ ॥

इति गिरो नभसो मरुदुद्गताः समवधार्य मुदा व्रजवासिनः ।
कुसुमचन्दनकुंकुमदीपकैः प्रणतिपातमिदं समपूपुजन् ॥ ९ ॥

इति स्थितिलयादिपूर्वोक्ता नभसो देवगिरः श्रुत्वा व्रजवासिनः पुष्पधूपदीपचन्दनैः प्रणतिपुरस्सरं तत् तेजः समार्चिषुः ॥ ९ ॥

वृषभभानुरथ प्रणतः पुरः श्रुतिसुधावचनानि समार्पयत् ।
जगदिदं महसो हि विजृम्भितं तदपरं न हि किञ्चिदिति श्रुतिः ॥१०॥

तदनन्तरं श्रीवृषभानुः प्रणतः सन् कर्णमधुरं वचः पुरस्कृतवान् । एतच्चराचरं जगत् तेजस एव समुत्पद्यते, "एतस्माच्चिदात्मन आकाशः' इत्यादिश्रुतेः । तेजसोऽतिरिक्तं किञ्चिदपि नास्ति ॥ १० ॥

कतिचिदेव कणा महसस्ततो रविनिशाकरयोर्हि मरीचयः ।
उडुगणः कतमोऽभवदंशकः सुधिय एतदवन्ति यथार्थतः ॥ ११ ॥

तस्यैव महसः कतिचिदेव कणा रविचन्द्रयोर्मरीचयः, तस्यैव च महसः कश्चनांशो नक्षत्रगणः । एतत् सर्वं सुधिय एव यथार्थतोऽवगच्छन्ति ॥ ११ ॥

इदमहो अनिशं जठराग्निना जनिमतः परिपालयतेतराम् ।
जलधिमध्यतले वडवाग्निना जलचरानसतः परिशिक्षते ॥ १२ ॥

इदमेव महो नित्यं जठराग्निरूपेण जनान् परिपालयति । वडवाग्निरूपेण च जलधौ असतो जलचरान् तर्जयति यत् प्राणिनो न भीषयन्त्विति ॥ १२ ॥

विषयवारितमानसवृत्तयो विहृतकुण्डलिनीदलशक्तयः ।
विमलभालतले किल योगिनो नयनगोचरतां गमयन्ति तत् ।। १३ ।।

येषां मनांसि विषयेभ्यो निवृत्तानि, वीतरागा इति यावत्; कुण्डलिनी-चक्रभिदो योगिन एव विमले स्वभालतले तत्त्वं साक्षात् कुर्वन्ति, नान्ये ।। १३ ।।

विहितगन्धवहाग्रविलोचनाः पिहितवक्त्रगुहाः स्थिरविग्रहाः ।
समवलम्ब्य पुरश्च भुजान्तरं सततमेव महः समुपासते ।। १४ ।।

नासिकाग्रन्यस्तनयनाः पिहितमुखाः स्थिरशरीरा उरोऽग्रे समवष्टभ्य योगिनः सततं मह एव सेवन्ते । तथा च योगशास्त्रे—

'नासाग्रन्यस्तनयनः संवृतास्यः सुनिश्चलः" इति ।। १४ ।।

इदमसूंश्च विहाय लभेलिमं ज्वलनमेति पतङ्गचयोऽप्यतः ।
मनुजवृन्दमथापि तमोवृते पथि निरन्तरमेव हि धावति ।। १५ ।।

प्राणान् परिहायापि राधारूपं महोऽस्माभिः प्राप्तव्यमिति धिया पतङ्गा ज्वालां गच्छन्ति । तथापि मनुष्यास्तमोवृते पथि दिग्भ्रान्ता निरन्तरमेव भ्राम्यन्तीति महदिदमाश्चर्यम् ।। १५ ।।

कतिभिरेव कणैर्महसो हरे विषमलोचनता भुवि विश्रुता ।
अत इदं श्रुतयोऽभिदधत्यसौ दहति लोकममुं कतिभिः क्षणैः ।।१६।।

भगवति शिवे महसः स्वल्पैरेव कणैः जगति विषमलोचनता प्रसिद्धा । अतः स्मृतय इदं प्रतिपादयन्ति यत् भगवान् शङ्करो लोकममुं स्वल्पैरेव क्षणैः प्रज्वालयति ।। १६ ।।

मह इमेव जगत्प्रकृतिं विना शिव इति श्रयते शवरूपताम् ।
किमथवा श्रुतिवाक्यनिदर्शनैर्जगदिदं महसैव महीयते ।। १७ ।।

जगत्कारणं महोरूपम् 'इ' इति विना शिवोऽपि शवतामुपैति । अथवा निदर्शनरूपैस्तैस्तैः श्रुतिवाक्यैरलम्, इदं निखिलं चराचरात्मकं जगत् महसैव महीयते ।। १७ ।।

जगदिदं करणे हि चराचरं शमदमादिबलेन विलापयन् ।
महति तत्प्रकृतौ च महद् यमी महसि तां तदुपैति निरन्तरम् ।।१८।।

इदं चराचरं जगत् तत्करणे, करणञ्च महति, महच्च प्रकृतौ, प्रकृतिञ्च महसि विलापयन् यमी मह एव निरन्तरमुपैति । सर्वस्यापि मूलं मह एवेति रहस्यम् ।। १८ ।।

इति मनःप्रणिधानपुरस्सरं वृषभभानुरवर्णयताद्वयम् ।
अनुपमं श्रुतिसिद्धमदो महो मुखमृगाङ्कमनेष्ट च मौनिताम् ॥१९॥

वरसानुपतिः श्रीवृषभानुः समाधिनाऽनुपममद्वयं श्रुतिप्रतिपाद्यमदो राधारूपं महो व्याख्याय स्वीयं मुखचन्द्रं मौनितां नीतवान् ॥ १९ ॥

विरतवाचि तदा मुनिपुङ्गवे दशनदीधितिदीपितदिङ्मुखा ।
दलितचन्द्रमुखीकमनीयता वृषभभानुसखी न्यगदत्तदा ॥ २० ॥

अथ वृषभभानौ मानितां गते दशनदीधित्या दिशः प्रकाशयन्ती चन्द्रमुखीनां कमनीयतां दमयन्ती वृषभभानुसखी कीर्तिरगादीत् ॥ २० ॥

परममद्भुतमेतदहो सखे मदभिलाषमहं तनुतेऽधुना ।
स्फुरति खञ्जनवामविलोचनं स्रवति पीनपयोधरतः पयः ॥ २१ ॥

हे सखे वृषभानो, काममद्भुतमेतन् महो ममाभिलाषं सन्ततिप्राप्तिरूपं सम्प्रति वर्द्धयति । यतो हि मम दक्षिणेतरखञ्जनरूपलोचनं मे स्फुरति, पीनपयोधरतश्च पयः स्रवति । अस्मिन् महसि मेऽपत्यभावः समुत्पद्यत इति तात्पर्यम् ॥ २१ ॥

प्रियतमानुभवामि विलक्षणं मम भुजान्तरमेतदहो महः ।
नवसरोजवपुश्शिशुभावतः प्रविशतीव मनोऽवशतां नयत् ॥ २२ ॥

हे प्रियतम, अहं किञ्चिद् विलक्षणमनुभवामि यद् एतन् महो नवोद्गतकमलशरीरेण मम मनः पराधीनतां नयत् मे क्रोडं प्रविशतीवेत्याश्चर्यम् ॥ २२ ॥

समवधार्य निमित्तमनाविलं प्रियतमा वचनं परिचिन्तयन् ।
क्षणमवाप्य समाधिनिमग्नतां समलुलोकदतुल्यसरः पुरः ॥ २३ ॥

ततश्श्रीवृषभानुः शकुनं शुभं निश्चित्य प्रियतमाया वचनं विचारयन् क्षणं मनः समाधाय पुरोऽप्रतिमं सरोऽवलोकितवान् ॥ २३ ॥

विहगवृन्दनिनादनिनादिते पुलिनपादपमण्डलमण्डिते ।
विकचवारिजवारविभाविते विमलवारिणि हृद्यसरोवरे ॥२४॥

विहगानां कलरवैर्मुखरिते पुलिनतरूणां मण्डलेन शोभिते विकसितकमलैरपूर्वां शोभां सम्प्राप्ते विमलजलसम्भृते सरसि विचित्रं सरोरुहं वृषभानुरलोकतेति परेणान्वयः ॥ २४ ॥

प्रतिपलं नवतामिव सन्दधद् वलयितद्युतिसन्ततिसन्ततम् ।
कनकपीतपरागपरागतं समदषट्पदगुञ्जनगुञ्जितम् ॥ २५ ॥

प्रतिक्षणं नवीनमिव लक्ष्यमाणं मण्डलाकारकान्तिपरम्परया वृद्धं सुवर्णवर्णपरागैर्व्याप्तं समदानां भ्रमराणां गुञ्जनेन गुञ्जितं सरोरुहं वृषभानुरलोकतेति परेण सम्वन्धः ॥ २५ ॥

सततसौरभसम्भृतदिङ्मुखं धवलहंसकदम्बकरम्बितम् ।
नवपलाशसरोरुहमद्भुतं वृषभभानुरलोकत सस्मितम् ॥ २६ ॥

यस्य सततं निःसृतैः सौरभैः दिशो व्यापृताः, यच्च धवलानां हंसानां कदम्बैर्व्याप्तम्, नवपलाशयुक्तं विचित्रं कमलं वृषभानुः सस्मितमलोकत । त्रिभिर्विशेषकम् ॥ २६ ॥

अनुपमाम्बुजदीप्तिविमोहितः प्रमदवारिनिरुद्धविलोचनः ।
सुरसुरारिमुनीन्द्रसुदुर्लभं प्रकृतिसिद्धमिदं हि सरोरुहम् ॥ २७ ॥

निरुपमस्य कमलस्य दीप्त्या विमुग्धमानसः, हर्षाश्रुनिरुद्धलोचनः वृषभानुः सुरदैत्यमुनीन्द्राणामपि सुदुर्लभं सरोरुहमिदं स्वभावसिद्धम्, न तु केनापि निर्मितमिति व्यचिन्तयत् ॥ २७ ॥

किमिव कान्तमलौकिकमम्बुजं मम दृशौ सुधया परिषिञ्चति ।
हरति दुष्कृतमेकपदे वलात् शुभमुदर्कमहो तनुते भृशम् ॥ २८ ॥

इदमलौकिकं मनोहरं कमलं मम चक्षुषी सुधया परिषिञ्चति, मम निखिलमपि पापं हठाद् हरति, भाविनं शुभञ्च परिणामं सूचयति ॥ २८ ॥

इति तदा हृदि चिन्तयति क्षणं वृषभभानुमुनौ तरदम्बुजम् ।
उपतटं सरसोऽन्तरतः पुनः सपदि दर्शनगोचरतामितम् ॥२९॥

इत्थं विचारयति मुनौ वृषभानौ तदम्बुजं मध्यतस्तरत् सरसस्तटसमीपे दृष्टिविषयतामापत् ॥ २९ ॥

अथ समाधिसमाहितमानसो दिनकरार्घ्यकृताञ्जलिभाजने ।
शयितशावकमद्भुतमम्बुजं स्वयमितं चकितः स समैक्षत ॥३०॥

अथ समाधिस्थ; श्रीवृषभानुः सूर्यार्घ्यदानायाञ्जलिभाजने शयितशिशुकमलं स्वयं समागतं चकितः समवालोकत ॥ ३० ॥

सुकृतमूर्त्तिरिदं चरमे निशो जगदमङ्गलनाशविधायकम् ।
भुवनभासुरकीर्त्तिसमुज्ज्वलः शयन ऐक्षत भव्यमुखप्रभः ॥ ३१ ॥

भुवनविदितकीर्त्तिः साक्षाद् धर्ममूर्त्तिः प्रसन्नवदनो वृषभानुर्निशान्ते कमलमिदं स्वप्ने दृष्टवान् ॥ ३१ ॥

अथ सुषुप्तिसमाधिपरो वृषो विदितसंसृतिकारणकारणः ।
मधुरमागधमङ्गलनिःस्वनैरुषसि भानुभिरब्जमिवोदितः ॥ ३२ ॥

अथ प्रगाढनिद्रास्वरूपे समाधौ निमग्नः संसारकारणकारणज्ञः श्रीवृषभानुः प्रातर्मधुरैर्मागधानां मङ्गलगीतिध्वनिभिः सूर्यकिरणैः कमलमिव निद्रां तत्याज ॥ ३२ ॥

ऋषिसहस्रतपःफलमद्वयं कमलिनीकुलवल्लभविम्बकम् ।
अलिकुलालकपाशविभूषिते प्रकृतिभालतले तिलकायते ॥ ३३ ॥

अद्वितीयं मुनिसहस्रस्य तपसः फलं कमलिनीकुलवल्लभस्य विम्वं भ्रमरकुलेनैव केशपाशेन विभूषिते प्रकृतिभालतले तिलकवद् विभाति । प्रातःकालः संवृत्त इत्यर्थः ॥ ३३ ॥

इतः कतिपयैः श्लोकैः प्रातर्वर्ण्यते—

उडुगणः सुगणो रमणीकुलं दरदलत्कमलैर्विमनायते ।
कुमुदराजिरियं न हि राजते विरहिणीव विभारहितानना ॥ ३४ ॥

नक्षत्राणि अनायासेन संख्यातुं शक्यन्ते, रमणीवृन्दमीषद्विकसत्-कमलैर्भाविविरहाशङ्कया दुःखमनुभवति, कुमुदराजिः सम्प्रति शोभां नाधत्ते, यथा प्रभाशून्यानना विरहवेदनानना रमणी ॥ ३४ ॥

शकुनिमंगलगीतिजयध्वनिः प्रकृतिकल्पितपङ्कजमाल्यकः ।
उडुगणान् परिहूय करेऽनले परिणयत्युषसं वरभास्करः ॥ ३५ ॥

पक्षिणां कलरव एव जयध्वनिर्यस्य सः, प्रकृत्या कल्पितं कमलमाल्यं यस्य स वरो भास्करो नक्षत्रगणानेव लाजान् किरणेऽनले हुत्वा उषसं परिणयति ॥ ३५ ॥

तिमिरकज्जललिप्तमुखं भुवः कनककान्तकरैर्मृदु संमृशन् ।
कुसुमहासकरो वटुभिः स्तुतो जलधिमध्यतलादयते रविः ॥ ३६ ॥

भुवोऽन्धकारकज्जलैर्लिप्तमाननं कनककमनीयैः किरणैर्मृदु आमृशन् कुसुमाना विकासं कुर्वन् ब्रह्मचारिभिः स्तूयमानश्च रविः समुद्रमध्यादुदयमयते ॥ ३६ ॥

निविडनैशतमस्ततिसंवृतामनुशयाश्रुकणाप्तवसुन्धराम् ।
मुनिमुखोदितवेदपुरस्कृतः कनकवस्त्रकरैरवतंसति ॥ ३७ ॥

निशि निविडैरन्धकारैः संछन्नां शोकाश्रुविन्दुव्याप्तां पृथिवीं मुनि-समुच्चारितवेदवाक्यैरर्चितो भानुः कनककरैर्वसनैर्भूषयति ॥ ३७ ॥

उदयशैलशिरोऽपि विभासयन् उदधिवारि करैरनुरञ्जयन् ।
निशिचरान् नितरामतितर्जयन् रविरुदेति जनानभिसान्त्वयन् ॥३८॥

उदयाचलमपि प्रकाशयन् जलधिजलमपि किरणैरनुरञ्जयन् निशिचरान् कामं भीषयन् जनान् सान्त्वयंश्च रविरुदेति ।। ३८ ।।

व्रततिराजिरियं कुसुमाञ्जलिं पुलकिता मृदुहस्तदलैः प्रगे ।
तरणिपादयुगे धरणीमिते लघु समर्पयते विनता भृशम् ।। ३९ ।।

इयं लतापङ्क्तिः पृथिवीं प्रातः सूर्यकिरणे सम्प्राप्ते पुलकिता कोमलपल्लवकरैः भृशं विनता कुसुमाञ्जलिं शीघ्रं समर्पयति ।। ३९ ।।

मुनिकुलाहुतहव्यसमुद्गतां सुरभिधूमततिं पवनेरिताम् ।
विपिनधान्यजमण्डरसभ्रमाद् वनभुवो लिहते मृगशावकाः ।। ४० ।।

प्रातर्मुनिभिर्हुताद् हव्यात् समुत्पन्नां पवनेन विशकलितां सुरभिधूमततिं नीवारस्य मण्डरसस्य भ्रान्त्याऽऽरण्यकाः मृगशिशवो लिहते ।।४०।।

व्रजवधूततयो व्रजमण्डले निशि समुत्सुकवत्सगवावलिम् ।
मुरजदोहरवार्पिततालयुङ्मधुरगीतिभिरादुहते पयः ।। ४१ ।।

व्रजमण्डले व्रजवधूततयो वत्सेभ्य उत्कण्ठायुक्ता गा मुरजदोहस्य शब्दैस्तालैः सह मधुरगीतिभिः पय आदुहते ।। ४१ ।।

अपि रथाङ्गवयाः सरसीतटे कलरवैर्वयसामनुमोदितः ।
विधिवशाद् विरहाकुलमानसामनुनयत्यधुना निजभामिनीम् ।।४२।।

तडागतटे चक्रवाकोऽपि पक्षिणां कलकलध्वनिभिः समर्थितो दैवयोगाद् विरहविपन्नां स्वस्त्रियं सम्प्रति काममनुरुणद्धि ।। ४२ ।।

कलितकौतुककौशिककामिनी भटवधूरिव भीतिविवर्द्धिनी ।
विधिविडम्बनया तरुकोटरे पिहितनेत्रमुखी परिताम्यति ।। ४३ ।।

निशि कृतकौतुका कौशिककामिनी वीराङ्गनेव भीतिदायिनी दैवयोगात् सम्प्रति वृक्षकोटरे नेत्रे मुखञ्चाच्छाद्य विषीदति ।। ४३ ।।

विवसनां नवयौवनमण्डितां कुमुदिनीमुपभुज्य निशाकरः ।
मुनिसमागमभीतिपलायितो जलधिमध्यतले परिलीयते ।। ४४ ।।

प्रसृतपुष्पवसनां नवयौवनोन्मत्तां कुमुदिनीं निशाकर उपभुज्य सम्प्रति सन्ध्योपासनार्थं मुनीनां समागमभीत्या पलायितो जलधौ स्वं तिरोदधाति ।। ४४ ।।

गगनभालतले पदमार्पिपत् सरसिजश्रियमेकपदेऽहरत् ।
विभरयं स विलोपमितोऽधुना निकृतिनीतिरनर्थकरी सदा ।। ४५ ।।

यो विधुर्निशि गगनभालेऽपि पदं न्यस्तवान्, कमलानां लक्ष्मीं सहसा च हृतवान्, सोऽयं विधुः सम्प्रति नाशमितः । परापकारनीतिः सदाऽनर्थंकरी भवति ॥ ४५ ॥

नियतिकल्पितवस्तुविभासिनीं सहचरीं रजनीं प्रकृतिं सतीम् ।
अवसिताखिलभोग इवोडुराट् परिजहाति पुमान् तदसाम्प्रतम् ॥४६॥

नियत्या प्रकृत्या कल्पितानां वस्तूनां प्रकाशिनीं सतीं प्रकृतिं सहचरीं रात्रिं सम्पादितसर्वभोगः पुरुषः इव चन्द्रो जहातीति न युक्तमिदम् ॥ ४६ ॥

नववधूस्तनभारनिपीडितः प्रियतमाकरपाशनियन्त्रितः ।
विधिवशात् परिरम्भसुखं त्यजन् युवजनः शपते विधयेऽधुना ॥४७॥

अधुना प्रातःकाले नवाया वध्वाः प्रौढस्तनभारेण पीड़ितः प्रियतमायाः करपाशेन निगडितो युवजनः आलिङ्गनसुखं परिजहत् ब्रह्मणे उपालम्भं ददाति यत् कथं प्रातःकालोऽभूत् ॥ ४७ ॥

विरहिणीपरितापकरान् करान् प्रतिनिबध्य दृढं निजरश्मिभिः ।
हिमकरो हरिणा भगणान्वितो जलतलेऽकरुणं विनिपात्यते ॥४८॥

प्रोषितभर्तृकाणां कष्टकरान् करान् स्वकिरणैः विनाश्य सूर्यः चन्द्रं नक्षत्रसहितं जलधौ निर्दयं निपातयति ॥ ४८ ॥

अभिदिनं परितप्तकृषीवलान् निशि वधूदृढपाशभुजान्तरे ।
अरुणकान्तकरैः शयितान् सुखं नवफलाय विबोधयते रविः ॥ ४९ ॥

निखिलमहो धर्मैः परितप्तान् कृषीवलान् निशि वध्वा दृढ़पाशे वक्षसि सुखं शयितान् रविररुणकमनीयकरैः नूतनसस्यफलदानाय विबोधयते ॥ ४९ ॥

अरुणभावृतनूतनशावकं लघुगृहाङ्गणतल्पनिवेशितम् ।
अनभिलक्ष्य पलं गृहिणी गृहे गृहजनैः परिहस्यत उन्मनाः ॥ ५० ॥

गृहस्य लघौ प्राङ्गणप्रदेशे शय्यायां शयानं शावकं सूर्यकिरणमावृतं तयोस्तादात्म्यात् गृहिणी नाभिलक्ष्य क्षणमात्रमुत्सुका गृहसदस्यैः परिहस्यते ॥ ५० ॥

निवसथच्छदिषि प्रसृतां लतां प्रसवपुष्पकदम्बकरम्बिताम् ।
अभिषुणोति नवा प्रमदा जलैः प्रकृतिकल्पितपद्मरसैरिव ॥ ५१ ॥

पुष्पफलानां समूहैः संभृतां सद्मनः पटले प्रसृतां लतां नवा बाला सूर्यकिरणसंकीर्णैर्जलैः कमलरसैरिव सिञ्चति ॥ ५१ ॥

समदसारसलम्बविकूणिका कमलकान्तमुखो लतिकालका ।
दिनकरार्पितकानकशाटिकां परिदधाति वधूरिव वापिका ।। ५२ ।।

समदाः सारसा एव लम्बा नासिका यस्याः सा, कमलान्येव कान्तं मुखं यस्याः सा, लता एव अलका यस्याः सा, दिनकरस्य करान् एव सुवर्णमयीं शाटिं वापी वधूरिव परिदधाति ।। ५२ ।।

समज एष गवाञ्च बुभुक्षितो धृतकडङ्गरमावपनं महत् ।
न गणयन् दृढशृङ्खलबन्धनं त्वरितमभ्ययते प्रतिपालकम् ।। ५३ ।।

गवां समजो बुभुक्षितो दृढलौहबन्धनं प्रतिपालकं च समुपेक्षमाणः पलालपूर्णं महद् भाण्डं त्वरितं गच्छति ।। ५३ ।।

तदधुना विधुना रजनी गता द्युमणिना सदुषाः समुपागता ।
शयनमाशु जहाहि जगत्पते न हि समः समयः सकलोऽयते ।। ५४ ।।

तस्मात् सम्प्रति विधू रजनी चास्तं गतौ, सती उषाश्च रविणा साकं समुपस्थिता, अतो हे स्वामिन्, शय्यां शीघ्रं त्यज, सम्पूर्णः समयः समानो न भवति ।। ५४ ।।

इति वशंवदमागधबोधितः प्रियजनानुगतो वरसानुपः ।
सविधि सान्ध्यविधिं समुपासितुं मुनिजनानुगतां सरसीं गतः ।।५५।।

इत्थं मागधैः प्रतिबोधितः प्रियजनैरनुगम्यमानो वृषभानुः सन्ध्याविधिं समुपासितुं मुनिजनैर्व्याप्तां सरसीं गतः ।। ५५ ।।

समवगाह्य सुखं विमले जले सितदुकूलविभूषितविग्रहः ।
तिलकभासितभालतलप्रभः सरसि भानुमतेऽर्घ्यमुपाहरत् ।। ५६ ।।

निर्मले जले स्नात्वा शुभ्रं क्षौमं धृत्वा भाले च तिलकं कृत्वा सरसि सूर्यायार्घ्यं प्रादात् ।। ५६ ।।

अथ समर्चितदेवविभावसुर्व्रजहृदब्जविकासविभावसुः ।
वृजिनवर्जितनिर्मलमानसः समवलोकत कञ्जमलौकिकम् ।।५७।।

अर्घ्यदानानन्तरं सूर्योपस्थानकृत् व्रजहृदयकमलविकासकरः पापशून्यमानसो वृषभानुरलौकिकं कमलमद्राक्षीत् ।। ५७ ।।

हरिणचम्पककान्तिशरीरभां स्फुरितकोटिकलाधरदीधितिम् ।
वदनवर्जितशारदचन्द्रिकां नयननिन्दितनीलसरोरुहाम् ।। ५८ ।।

गौरचम्पकस्य कान्तिरिव शरीरकान्तिर्यस्यास्ताम्, देदीप्यमाना कोटिकलाधरस्य दीधितिरिव दीधितिर्यस्यास्ताम्, मुखेन तिरस्कृता शारद-

ज्योत्स्ना यया ताम्, नयनाभ्यां निन्दितं सरोरुहं यया तां काञ्चिद् बालिकां समैक्षतेति पञ्चमेनान्वयः । पञ्चभिः कलापकम् ॥ ५८ ॥

अधरबिम्बफलां शुकनासिकां कुटिलकुन्तलभारवृताननाम् ।
द्विजविनिर्जितकुन्ददलश्रियं मधुरहासविभासि सरस्तटाम् ॥५९॥

बिम्बफलाधरां शुकनासिकां कुटिलानां कुन्तलानां भारेण किञ्चिदावृतमुखीं कुन्दपुष्पदशनां मन्दस्मितेन विशोभि सरसस्तटं यस्यास्तां बालिकां समैक्षत ॥ ५९ ॥

नवकुशेशयकान्तकरद्वयां किसलकोमलपादतलान्विताम् ।
जघनजृम्भितविग्रहविभ्रमां नखमयूखविलुप्तरविप्रभाम् ॥ ६० ॥

सद्योविकसितकमलकरां किसलेनेव कोमलेन पादतलेन युक्तां जघनेन विकसितः शरीरस्य विलासो यस्यास्ताम्, नखकान्त्या विलुप्ता बालरविप्रभा यस्यास्तां बालिकां समैक्षत ॥ ६० ॥

कनककुण्डलमण्डनमण्डितामतुलदामजिताभभमालिकाम् ।
विशदनूपुरकुण्डलितेन्दुकां वसनदीधितिहेममयापभाम् ॥ ६१ ॥

सुवर्णस्य कुण्डलेन मण्डितां निरुपमेन दाम्ना नक्षत्रगणस्य कान्ति जयन्तीं मनोहरमञ्जीरेण चन्द्रं कुण्डलयन्तीं वसनकान्त्या सरसः जलं कनकरसयन्तीं बालिकां समैक्षत ॥ ६१ ॥

इतिगुणां प्रभुशक्तिसमन्वितां मधुरराधपदेन विभूषिताम् ।
अमरवामवधूपरिवीजितां तदनु तत्र समैक्षत बालिकाम् ॥ ६२ ॥

पूर्वोक्तगुणयुक्तां प्रभुशक्तिसम्पन्नां देवाङ्गनाभिः परिवीजितां बालिकां पश्चाद् विलोकितवान् ॥ ६२ ॥

अनुपमच्छविमोहितमानसः प्रमदवाष्पजलाकुलितेक्षणः ।
निजसमुज्ज्वलभाग्यमभिष्टुवन् सपदि तच्चरणं स मुदाऽनमत् ॥६२॥

श्रीराधाया असदृशकान्त्या मुग्धमानसः प्रमदाश्रुव्याप्तलोचनः स्वं समुज्ज्वलं भाग्यं प्रशंसन् श्रीवृषभानुः मुदा तस्याश्चरणमनमत् ॥ ६३ ॥

अभिनमन्तमथाभयमुद्रया परमभागवतं परितोष्य तम् ।
सरसिजासनसंस्थितबालिका वच उदाहरतेदमनुत्तमम् ॥ ६४ ॥

अथाभयमुद्रयाऽभिनमन्तं परमभागवतं तं वृषभानुं सन्तोष्य कमलासने संस्थिता सा बालिका वक्ष्यमाणमिदमनुत्तमं वच उदाहार्षीत् । ६४ ॥

यत इदं जगतः स्थितिसंभवौ नियतकालसमापितकर्मणः ।
प्रविलयोऽपि च यत्र समर्थितः परमदुर्लभतत्त्वमहं हि तत् ॥ ६५ ॥

अस्य जगतो यस्मात् उत्पत्तिस्थिती, नियतकाले भुक्तकर्मणश्च यस्मिन् प्रलयोऽपि मुनिभिः समर्थितः, तत् परमं दुर्लभं तत्त्वमहमेव ॥ ६५ ॥

परसमाधिसमाहितमानसैः क्षपितकल्मषयुक्तजनैरहो ।
परमतत्त्वमिदं नहि दृश्यते तव तु भागवतस्य पुरःस्थितम् ॥ ६६ ॥

परसमाधिना समाहितानि संयतानि मानसानि येषां तैः, अत एव पापशून्यैर्युक्तयोगिभिरपि परमतत्त्वमिदं न हि द्रष्टुं शक्यते, परन्तु परमवैष्णवस्य तवाग्रे समुपस्थितमेव ॥ ६६ ॥

किमपि तत्त्वमचिन्त्यमनुत्तमं तदतिरिक्तमिहास्ति न किञ्चन ।
यदिति वेदवचः परिभाषते तदहमेतदुपास्व यथाविधि ॥ ६७ ॥

किमपि अचिन्त्यमनुत्तमं तत्त्वमस्ति, इह तदतिरिक्तं न किञ्चिदस्ति इति यद् वेदवचः प्रतिपादयति, तत् तत्त्वमहमेव। तत्त्वमेतद् विधिनोपास्व ॥ ६७ ॥

गिरमिमामभिभूतसुधारसां समवधार्य मुनिर्वरसानुपः ।
झटिति तां कमलासनबालिकां सदनमानयताप्रतिमप्रभाम् ॥ ६८ ॥

सुधारसं तिरस्कुर्वन्तीं पूर्वोक्तां गिरं निशम्य मुनिर्वरसानुराजो वृषभानुः शीघ्रं कमलासनस्थितामसदृशीं बालिकां स्वगृहमानीतवान् ॥ ६८ ॥

पथि तदा मरुतां सुमनोभरैः स्तुतिवचस्ततिभिश्च विवर्द्धितः ।
पुरजनानतिभिः स समादृतो मुदमविन्दत युक्तसुदुर्लभाम् ॥ ६९ ॥

तदा कमलासनाया बालिकायाः सदनानयनकाले देवानां पुष्पवृष्टिभिः स्तुतिवचनैश्च गीयमानः नगरजनानां प्रणतिभिश्च समाद्रियमाणो वृषभानुर्युक्तयोगिभिर्दुर्लभां मुदमापत् ॥ ६९ ॥

व्रजमहीमहिमानमलौकिकं प्रथयितुं निखिले वसुधातले ।
परमतत्त्वमहो मम भाग्यतो गृहमिदं पवितुं समुपागमत् ॥ ७० ॥

अखिलेऽपि वसुधातले व्रजस्य महत्त्वं प्रथयितुं मम भूरिभाग्यत इदं गेहं पवितुं परमतत्त्वमिदं समुपागमदिति 'इदमुदीर्य' इत्यग्रिमेण श्लोकेन सम्बन्धः । युग्मकम् ॥ ७० ॥

इदमुदीर्य तदा लघुभाषिणी दयितमौलिधृतां शुभलक्षणाम् ।
निजकराब्जपुटे परिगृह्य तां मधुरमङ्कमरोपयदादरात् ॥७१॥

तदा मधुरभाषिणी कीर्तिः पूर्वोक्तां गिरमुक्त्वा प्रियतमस्य शिरसि स्थितां सर्वलक्षणलक्षितां तां कन्यां स्वकरकमले गृहीत्वाऽत्यादरात् स्वं कल्याणक्रोडमारोपयत् ॥ ७१ ॥

धन्यासि कीर्ते स्पृहणीयदिष्टे निरञ्जनं ब्रह्म तवाङ्कपालौ ।
कन्यास्वभावेन विराजतेऽलं समुद्गता देवगिरस्तदैताः ॥ ७२ ॥

स्पृहणीयभाग्ये हे कीर्ते, त्वं धन्यासि, यतो हि निरञ्जनं ब्रह्म तवाङ्कपालौ कन्यात्वेनालं विराजते । तदैता देवगिरः प्रादुरभूवन् ॥ ७२ ॥

ज्योत्स्नाभिः कुमुदावलीव विकसन्नेत्रानना भामिनी
कीर्तिः प्रस्नुतपीवरस्तनमुखी वात्सल्यभावात् तदा ।
निर्दिष्टा हरिणीव लोलनयना पत्युः शुभाशंसनैस्
तल्पे रत्नसमुज्ज्वले सितपटे प्रासूषुपद् बालिकाम् ॥७३॥

चन्द्रकिरणैः कुमुदपङ्क्तिरिव प्रफुल्लनयनवदना वत्सलत्वात् क्षरत्पीवरस्तनी मृगीव लोलनयना पत्युः शुभाशीर्वचनैर्निदिष्टा कीर्तिः उज्ज्वलोत्तरीये रत्नप्रकाशप्रकाशिते तल्पे तां बालिकां स्वापयामास ॥ ७३ ॥

भाभिर्भूषितसूतिकागृहभुवं संलालयन्ती सुतां
दासीनिर्मितयक्षकर्दमरसैः संलेपयन्ती मुदा ।
कान्तं कान्तमुखं सुधाद्रवसमैर्गीतैस्तदा तन्वती
कीर्तिः कीर्तितकीर्तिरिन्दुवदना प्रीतिं परां विन्दति ॥ ७४ ॥

तेजोभिः सूतिकासदनं प्रकाशयन्तीं सुतां लालयन्ती, दासीभिर्निर्मितविशिष्टलेपैः संयोजयन्ती, सुधासमैर्मधुरैर्जन्मोत्सवगीतैः कान्तं प्रसन्नमुखं विदधती गीतकीर्तिः कीर्तिः शशिवदना परां प्रीतिं प्राप्नोति ॥७४ ॥

विद्वद्वन्दितचन्द्रशेखरसुधी रामाञ्चिता मञ्जुला
यं धीरं सुषुवे प्रसादपदकं श्रीकालिकाख्यं सुतम् ।
तत्काव्ये वृषभानुजास्तुतिमये राधापदप्राप्तये
तार्तीयीकतया गतः परिमितिं सर्गः समाप्तिं श्रितः ॥ ७५ ॥

यस्य पिता श्रीचन्द्रशेखरः माता च मञ्जुला, तेन श्रीकालिकाप्रसादशुक्लेन श्रीराधापदप्राप्तये प्रणीते श्रीराधास्तुतिमये काव्ये तृतीयः सर्गः समाप्तिमगमत् ॥ ७५ ॥

इति देवरियामण्डलान्तर्गत (देवपुरी) कुशीनगरदक्षिणसार्द्धक्रोशत्रयपरिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन प्राप्तस्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यातसम्पादितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते श्रीराधाचरितमहाकाव्ये द्वितीयः सर्गः समाप्तः ॥

चतुर्थः सर्गः

धन्या धरा धन्यतमा च कीर्तिर्धन्यो व्रजोऽयं वरसानुराजः ।
वयं च धन्या व्रजवासिनो यन्नि रञ्जनं ब्रह्म हि लालयामः ॥ १ ॥

इयं धरा धन्या, कीर्तिश्च धन्या, अयं व्रजोऽपि धन्यः, श्रीवृषभानुमुनिरपि धन्यः, वयं व्रजवासिनोऽपि धन्याः, यतो हि श्रीराधारूपं निरञ्जनमपि ब्रह्म क्रोडे लालयामः ॥ १ ॥

योगीश्वरो वा जदीश्वरो वा यत् तत्त्वमेकं स्पृहयत्यजस्रम् ।
अकारणं संसृतिकारणं तद् व्रजौकसां खेलति घोषधूलौ ॥ २ ॥

यदद्वितीयं तत्त्वं योगीश्वरो जगतामधीश्वरो वा नित्यं द्रष्टुं वाञ्छति, तत् स्वयं कारणशून्यं तथापि जगतः कारणं व्रजे गोष्ठे रमते । महद् भागधेयं व्रजवासिनाम् । प्रकर्षविवक्षायाँ तत्त्वमेकमित्यत्र द्वितीया ॥ २ ॥

निवृत्तरागैः सनकादिसिद्धैः तपांसि तप्त्वा शरदः शतानि ।
यन्मृग्यमासीत् तदनन्तवस्तु कीर्त्यङ्कपालौ रमते व्रजेऽस्मिन् ॥ ३ ॥

अनेकानि वर्षाणि तपांसि विदधद्भिरत एव वीतरागैः सनकादिभिः यद् गवेषणीयमासीत्, तदेव तत्त्वं वृषभानुपत्न्या अङ्के व्रजे खेलति ॥ ३ ॥

हृदाऽप्यगम्या वचसाऽप्यवर्ण्या वेदान्तवेद्या हि चिदात्मशक्तिः ।
गोपाङ्गनाऽऽन्दोलितपद्मनालैः क्रीडत्यहो क्रीडनकैरतत्त्वैः ॥४॥

वेदान्तवाक्यैरवगन्तुमशक्या मनसा वचसाप्यगम्या चिदात्मशक्ति व्रजाङ्गनाचालितैरतत्त्वैः पद्मनालैः क्रीडनकैः क्रीडतीत्याश्चर्यम् ॥ ४ ॥

वक्षोजभारानतपूर्वकाया नितम्बगुर्वी गमनेऽक्षमापि ।
अपूर्वकन्याजननोत्सवाय व्यापारयमास निजं वपुष्पकम् ॥ ५ ॥

वक्षोजस्य भारेणातः पूर्वकायो यस्याः सा, नितम्बेन गुर्वी, अत एव गमनेऽसमर्थापि, अपूर्वकन्याजननोत्सवे निजं शरीरं योजयामास ॥ ५ ॥

व्रजाङ्गना मौक्तिकमण्डितान्या भ्रश्यद्दुकूलाञ्चलकेन भूमिम् ।
संमार्जयन्ती च मणिप्रदीपैर्विद्योतयामास समग्रसौधम् ॥

मौक्तिकमालाभिर्मण्डिता काचनान्या व्रजाङ्गना लघु लघु गमनाद् भ्रश्यतो दुकूलस्याञ्चलेन धरां परिमार्जयन्ती मणिप्रदीपैः सकलं प्रासाद प्रकाशयामास ॥ ६ ॥

कपोलपालौ नवपत्रलेखां प्रस्वेदयन्ती नवयौवनाङ्गी ।
माणिक्यमुक्तामणिभिर्विचित्रं पदे पदे स्वस्तिकमातनोति ॥ ७ ॥

कन्याजननोत्सवे काचन यौवनसम्पन्ना व्रजाङ्गना कपोले कृतां नवपत्रलेखां श्रमाधिक्यात् समुत्पन्नैः स्वेदैः विमृशन्ती माणिक्यमुक्तादिमणीभिः स्थाने स्थाने स्वस्तिकं निर्माति विलक्षणम् ॥ ७ ॥

काचित् सुकेशी विपरीतवेशा व्रजाङ्गनाहास्यपदं भजन्ती ।
गीतं सुधासारमुदाहरन्ती तनोत्यहो हीरकतोरणानि ॥ ८ ॥

काचन गोपी अत्युत्कण्ठया यस्य भूषणस्य यदुचितं स्थानं ततोऽन्यस्मिन् स्थाने स्थापयन्ती, अतोऽन्यासां गोपीनामुपहास्यतां व्रजन्ती सुधासारं गीतं समुद्गिरन्ती हीरकतोरणानि तनोतीत्याश्चर्यम् ॥ ८ ॥

तामिन्दिरां वर्णयितुं न शक्तो दृढप्रयत्नोऽप्युशना व्रजस्य ।
सरोजकन्याजननोत्सवस्य व्रजाङ्नासज्जितवस्तुराशेः ॥ ९ ॥

कमलकन्याजन्मोत्सवकाले व्रजाङ्गनाभिः सज्जितानां व्रजे वस्तुराशीनां शोभां महता प्रयत्नेनापि वर्णयितुं भार्गवोऽप्यनीशः, किमुतास्मादृशैर्वराकैः ॥ ९ ॥

गृहे गृहे वन्दनमालिकालिः स्थले स्थले स्वस्तिकमण्डलालिः ।
जने जने मङ्गलभव्यवेशः तौर्यत्रिकं चारु पदे पदे च ॥१०॥

प्रतिगृहं वन्दनमालिकाभिः शोभमानमासीत्, प्रतिस्थानं स्वस्तिकैश्च समलंकृतमभूत्, सर्वोऽपि जनो माङ्गलिकालङ्कारालंकृतः समपद्यत, स्थाने स्थाने च गीतवाद्यादिकं समायोजितमासीत् ॥ १० ॥

आश्लिष्य वीणां जघनस्थितां स्वां पयोधराभ्यां परिपीडयन्ती ।
पङ्केरुहैरङ्गुलिभिः सुकण्ठी निनादयत्येकरसाऽपरापि ॥

अपरा काचन व्रजाङ्गना स्वकीयां वीणां जघनस्थितामालिङ्ग्य पीनपयोधराभ्यां संमर्दयन्ती सुकण्ठी एकताना पद्मांगुलिः वादयति ॥ ११ ॥

काचिच्च वंश्या मधुराधराभ्यां पीयूषपूरैश्शुषिरं प्रपूर्य ।
हरत्यहो निस्वनरश्मिबन्धैश्चेतांसि यूनां श्रुतिसन्धिलातः ॥१२॥

काचिच्च गोपाङ्गना मधुराधराभ्यां निःसृतैः सुधाप्रवाहैर्वंश्याश्छिद्रं प्रपूर्य मधुरशब्दरश्मिभिः कर्णकुहरद्वारा प्रविष्टैर्यूनां मनांसि हरति ॥ १२ ॥

श्लथत्प्रवेणीकुसुमावलीका. स्विद्यल्ललाटाब्जकराङ्गुलीका ।
दृढांगिकानद्धपयोधरैका भङ्ग्या मृदङ्गं मुखरीकरोति ॥१३॥

शिरसश्चाञ्चल्येन वेणीतः कुसुमानि यस्या विकीर्णानि, वादनकाले श्रमाधिक्यात् यस्या ललटेऽङ्गुलीषु च स्वेदबिन्दवोऽधिकाः, दृढचोलया यस्याः पयोधरौ पिनद्धौ, सा काचन गोपी कलया मृदङ्गं वादयति ॥ १३ ॥

तपोधनानां सरलस्वभावा वल्कानि वासांसि शमोचितानि ।
बाला दधानाः फलिनीप्रसूनैः पदानि रज्यन्ति कुतूहलेन ॥ १४ ॥

सरलस्वभावा अतीव लोकानभिज्ञा मुग्धास्तपस्विनां कुमार्यस्तपोवनोचितानि वल्कलरूपाणि वस्त्राणि परिदधानाः श्यामापुष्पैः कौतुकेन स्वानि पदानि रज्यन्ति । सरोजकन्याजननोत्संवं सम्मानयन्तीत्यर्थः ॥१४॥

शिरीषसूनान्यवतंसयन्ति श्रुतौ विसं कङ्कणयन्ति पाणौ ।
केशेषु कुन्दं कलयन्ति कामं यथा तथा स्वं परिमण्डयन्ति ॥ १५ ॥

तास्तापसकन्यकाः शिरीषपुष्पैः कर्णौ भूषयन्ति, मृणालतन्तुना पाणी अवतंसयन्ति, केशान् कुन्दैरलङ्कुर्वन्ति, एवं लोकानभिज्ञत्वाद् येन केनापि स्वं भूषयन्ति ॥ १५ ॥

साम्नां सुधासारसुवर्षिसूक्तैर्हिस्राः समे संयमिनो बभूवुः ।
मृगाः प्रभुक्तान्कवलांस्त्यजन्ति प्रमोदसन्दोहनिमग्नभावाः ॥१६॥

मुनिभिर्गीतैः साम्नः सुधावर्षिभिः मन्त्रैर्वन्या हिंस्रा समेऽपि जन्तवो हिंसापराङ्मुखा अभूवन् । मृगाश्च कन्याजननानन्दोदधौ निमग्नमानसाः प्रथमं भुक्तानपि कवलान् त्यजन्ति ॥ १६ ॥

रम्भातरूणां ततयः समन्ताल्लसन्ति कुटचाः शमिनां वराणाम् ।
अनार्तवी पुष्पफलागमानां समृद्धिरप्येकपदे चकास्ति ॥

मुनीनां कुटीरस्य समन्ताद् रम्भावृक्षाणां पंक्तयो विभान्ति, पुष्पाणां फलानाञ्चाकालेऽपि सहसोद्गमोऽभूत् ॥१७ ॥

अशोकवृक्षावलिपाटलाभप्रसूनमाला लसिताऽग्निशाला ।
गवाज्यहव्योद्गतधूमजालैः सन्ध्यावधूमञ्चयते सखीव ॥ १८ ॥

अशोकवृक्षाणां रक्तपुष्पमालाभिश्शोभिताग्निशाला गवां घृतहव्योत्थितधूमैः सन्ध्यावधूं सखीवाञ्जयते ॥ १८ ॥

जातिप्रियङ्ग्वोर्नवमालिकाया वक्षोजगुच्छानपि यूथिकायाः ।
मनाक् स्पृशन्नाश्रमभूमिभीतः स्नातः सरस्यां पवनः प्रवाति ॥१६॥

जातेः प्रियङ्गोर्नवमालिकाया यूथिकायाश्च गुच्छस्तनान् स्पृशन् पुनस्तपोवनभूरियमिति कृतस्य पापस्य प्रशमनाय सरसि स्नातः पवनः प्रवहति । अर्थात् तदा शीतो मन्दः सुगन्धिश्च वायुर्वाति ।। १९ ।।

वयोऽनुरूपैः कलशैः किशोर्यः पानीयमानीय कुटीं कराभ्याम् ।
तपस्तरूणां च तलानि सम्यक् लिम्पन्ति गव्यैर्महतोत्सवेन ।।२०।।

तापसकन्यका अवस्थानुकूलैर्लघुभिः कलशैः जलमाहृत्य पर्णकुटीं तपोवनस्य तरूणां तलानि च महता समुल्लासेन गोमयैः साधूपदिहन्ति २०।।

एलालवङ्गैः परिवासिताशे वासन्तिकावेष्टितभूविभागे ।
घने वने कान्तकदम्बकुञ्जे जन्मोत्सवं प्रारभते मुनीशः ।। २१ ।।

एलालवङ्गानां सौरभैर्दिक्षु व्याप्तासु वासन्तिकापरिवारिते भूमिभागे घने वने रम्यकदम्बानां लतागृहे मुनीशो जन्मोत्सवं प्रारभते ।। २१ ।।

मध्येनिकुञ्जं परिबध्य दोलां मन्दारहारैर्लसितान्तरालाम् ।
आरोप्य भक्त्याद्भुतबालिकां तां तपस्विकन्या मृदु दोलयन्ति ।।

पारिजातकुसुमैः सज्जितां दोलां निकुञ्जमध्ये संस्थाप्य तत्र तामलौकिकीं सरोजबालां भक्त्या समारोप्य च तापसकन्यका शनैश्शनैः दोलयन्ति ।।

कदम्बशाखास्ववलम्बितां तां दोलाञ्च दोर्भ्यां परिगृह्य बालाः ।
प्रसूनहस्ता मधुरस्वरैस्ता गायन्ति नृत्यन्ति परिभ्रमन्ति ।।

कदम्बशाखासु तामवलम्बितां दोलां हस्ताभ्यां गृहीत्वा बाला हस्ते पुष्पाण्यादाय मधुरकण्ठैर्गायन्ति नृत्यन्ति परितो भ्रमन्ति च ।। २३ ।।

तामिंगुदीस्नेहभरेण बालामभ्यज्य पद्मासववासितेन ।
जलेन सम्यक् परिषिच्य मन्त्रैर्लिम्पन्ति वन्या अपि यक्षपङ्कैः ।।२४।।

इंगुदीतैलेन बालाया अभ्यङ्गं कृत्वा पद्मरसवासितेन जलेन च स्नपनं विधाय वन्या अपि तापसकन्यका मन्त्रैर्यक्षकर्दमैः सम्यक् लेपं कुर्वन्ति ।।२४।।

वृन्दावने मण्डलितेऽतिरम्ये यमानुजाश्यामपयःप्रवाहैः ।
निवेशने चाश्रमशान्तभूमौ जन्मोत्सवोऽजन्मन एव चित्रम् ।।२५।।

यमुनायाः श्यामपयसः प्रवाहैः परिवेष्टितेऽत एवातिरम्ये वृन्दावने ग्रामटिकायां शान्ते च तपोवने ऽजन्मनोऽपि जन्मोत्सवो भवतीति चित्रम् ।।

लग्ने शुभे द्वादशके दिने सन्नक्षत्रयोगग्रहसम्परीते ।
आशासु सर्वास्वपि निर्मलासु प्रारम्भभागादभिधानकर्म ।। २६ ।।

सेशुभे लग्ने द्वादशे दिव शोभने नक्षत्रे ग्रहे च सर्वासु दिक्षु निर्मलासु सतीषु नामकरणसंस्कारः प्रारब्धोऽभूत् ।। २६ ।।

देवर्षयो युक्तमहर्षयोऽन्ये विद्यानदीष्णा अपि भूमिदेवाः ।
ये श्रोत्रिया ब्रह्मविदां वरेण्याः कन्याभिधानोत्सव आगमंस्ते ।।२७।।

तस्मिन् कन्याया नामकरणसंस्कारे देवर्षयो युक्तयोगिनो विद्वांसो विप्रा ब्रह्मज्ञानिनां श्रेष्ठाः पंक्तिपावनाश्च समागताः ।। २७ ।।

पारे सरय्वाः परमे पवित्रे कूले कुटीरे परमर्षिगर्गः ।
योगासनासीन उपेत्य वृत्तंव्रजं समुत्कः प्रययौ जवेन ।। २८ ।।

सरयूनद्याः पारे कामं पवित्रे तटे कुटीरे योगासनासीनः समुत्को महर्षिगर्गः कन्यानामकरणस्य वृत्तान्तमवबुध्य वेगेन व्रजं ययौ ।। २८ ।।

दृष्ट्वाऽऽगतं योगबलान्मुनीन्द्रं नंनम्यमानं सुरवेदविद्भिः ।
अभ्यर्च्य गन्धैः सुरशाखिपुष्पैरवीविशत्तं वरसानुभूपः ।।२९।।

योगमार्गेण तत्र प्राप्तं देवब्राह्मणैः प्रणम्यमानं तं ब्रह्मर्षिगर्गं चन्दन-कल्पवृक्षपुष्पैः सम्पूज्य वृषभानुरासनमुपवेशितवान् ।। २९ ।।

त्रिकं गतायाः प्रभया जटाया आनाभि कूर्चस्य च लम्बितस्य ।
सदः पयःपूरमिवावतीर्णं कुर्वन् बभौ पावन एष पङ्क्तेः ।।

पृष्ठभागे कटिं प्राप्ताया जटायाः, नाभिं यावल्लम्बितस्य कूर्चस्य प्रभाभिश्च सभां पयःप्रवाहे स्नातामिव कुर्वन् एष पंक्तिपावनो गर्गः शुशुभे ।। ३० ।।

ऊर्ध्वद्विपुण्ड्रोज्ज्वलितोरुभालः कृष्णाजिनालंकृतवामभागः ।
स कुण्डिकामण्डितसव्यहस्तो वृषीं समाभूषितवान् विधिज्ञः ।।३१।।

विधिवेत्ता स मुनिर्गर्गः ऊर्ध्वाभ्यां द्वाभ्यां पुण्ड्राभ्यां प्रकाशित-विशालभालः कृष्णमृगचर्मणा शोभितवामभागः, कमण्डलुना मण्डितदक्षिण-पाणिः आसन्दीं समलमकार्षीत् ३१ ।।

यज्ञोपवीतोपनतोन्नांसो वृन्दावलीश्यामितकम्बुकण्ठः ।
वैकक्षवल्कोल्लसितोरुवक्षाः कटेश्च मौञ्ज्या जितकानकाभः ।।

स मुनिः यज्ञोपवीतेनोन्नतस्कन्धः, तुलसीमालया श्यामितकण्ठः वल्क-लोत्तरीयेण लसितविशालवक्षाः, कटेर्मौञ्ज्या कनकप्रभां लुम्पन् वृषीं भूषितवानिति पूर्वेण सम्बन्धः ।। ३२ ।।

भूदेवदेवव्रजवासिवन्द्यः पृष्टः स भाग्यं नवजकन्यकायाः।
विश्वं बिभर्त्ति प्रभया स्वया या तस्याश्चितो भाग्यफलं वदानि ।।

द्विजदेवव्रजवासिभिर्वन्द्यः स मुनिः सरोजकन्याया भाग्यं पृष्टः चिन्तयति यत् या स्वप्रभया विश्वं पालयति, तस्याश्चिच्छक्तेरहं भाग्यफलं वदानि। प्राप्तकाले लोट्। तस्या भाग्यफलं गदितुमवसरः प्राप्तः ।। ३३ ।।

देवर्षिवृन्दैरभिनन्द्यमानं वाण्या न वर्ण्यं व्रजभागधेयम्।
ब्रह्मर्षिभिर्यन्मनसाप्यगम्यं तत् तत्त्वमेकं रमतेऽत्र तल्पे ।। ३४ ।।

देवर्षिभिरपि प्रशस्यमानं व्रजस्य भागधेयं वाचा वर्णयितुं न शक्यते, यतो हि यत्तत्त्वं ब्रह्मर्षिभिर्मनसापि प्राप्तुं दुश्शकम्, अद्वैतं तत् तत्त्वं व्रजेऽत्र शयने खेलति ।। ३४ ।।

प्रणम्य दोर्भ्यां कृतसम्पुटाभ्यामानम्य मूर्द्धानमतीव भक्त्या।
बालाभिधानच्छलतो मुनीन्द्रो वाचं स्कीयां हि पुपाव सम्यक् ।।

महामुनिर्गर्गो भक्त्या शिर आनम्य सम्पुटितकराभ्यां प्रणम्य च सरोजकन्याया नामकरणमिषेण स्वीयां वाचं सम्यक् पुपाव ।। ३५ ।।

अमोघशक्त्या रसरूपया यद् राध्नोति विश्वं विविधस्वरूपम्।
माया धवस्यापि मनोऽभिलाषं राधामतश्शब्दविदो विदन्ति ।।३६।।

विश्वमिमं विविधस्वस्वरूपं रसस्वरूपयाऽमोघशक्त्या लक्ष्मीपतेः कृष्णस्य चाभिलाषं यस्माद्धेतोः बालेयं साधयति, अत इमां वैयाकरणा राधामभिदधति ।। ३६ ।।

शक्तिं परां शान्तिमथो समृद्धिं राति स्वभक्ताय जनाय शश्वत्।
दधाति जीवान् यदनन्यभावान् राधामतः शब्दविदो वदन्ति ।।

यतः स्वभक्ताय शक्तिं शान्तिं समृद्धिञ्च निरन्तरं राति ददाति, देवानन्यान् विहाय स्वैकतानान् जीवान् प्रेम्णा पुष्णाति, विपदो रक्षति, अत इमां शाब्दिका राधामामनन्ति ।। ३७ ।।

यत्तेजसाऽद्योतत घोषभूमिस्तद् वह्निबीजं रमतेऽत्र बाला।
तेनैव जीवन्ति जनास्त्रिलोक्यां राधामतस्तन्त्रविदो वदन्ति ।।३८

यस्य तेजसा व्रजभूरियं प्रकाशते, तद् वह्निबीजं बालेयमत्र रमते। तेनैव वह्निबीजेन विश्वस्मिन् विश्वे जना जीवन्ति। अतो रं वह्निबीजमादधातीति व्युत्पत्त्या राधां तन्त्रविदो वदन्ति ।। ३८ ।।

समाहितैर्वेदविदः वरेण्यैस्तत्सत्तया संसृतिसत्त्वधीभिः ।
आराध्यते सच्चिदनन्तभावाद् वेदान्तिनोऽतो निगदन्ति राधाम् ॥

समाधिमग्नैर्वेदविदां श्रेष्ठैः तत्सत्तया संसारस्य सत्तां मन्वानैः सच्चिदानन्दरूपेण साऽऽराध्यते, अतस्तां वेदान्तिनो राधामामनन्ति ॥ ३९ ॥

सांख्यैश्च योगैः पुरुषप्रकृत्योर्भावेन संराध्यत एतदेव ।
कर्मेति बुद्ध्या किल जैमिनीयैराधामतः शास्त्रविदो वदन्ति ॥४०॥

सांख्यशास्त्रविद्भिर्योगविद्भिश्च पुरुषप्रकृतिरूपेण, मीमांसकैः कर्मबुद्ध्या एतदेव तत्त्वं समाराध्यते। अतो राधामिमां शास्त्रविदो वदन्ति ॥ ४० ॥

संसारबीजं मनुते मुनीन्द्रस्तर्कैकसारः कणभक्षपादः ।
तद्वत् समाम्नाति तदक्षपादो राधामतः शास्त्रविदो वदन्ति ॥४१॥

तर्कैकरसिकौ कणादगौतमौ संसारबीजत्वेनैतदेव तत्त्वं समुपासाते, अतः शास्त्रकुशला राधामेनां वदन्ति ॥ ४१ ॥

विज्ञानभेदं सुगतैकभक्ता घने वने सद्मनि देवतानाम् ।
तदेव तत्त्वं समुपाश्रयन्ते राधामतस्तत्त्वविदो वदन्ति ॥ ४२ ॥

घनेऽरण्ये सुराणां सद्मनि च सौगता विज्ञानभेदेनैतदेव तत्त्वं समुपासते। अतो राधामिमां तत्त्वज्ञा वदन्ति ॥ ४२ ॥

योगेन साक्षात्कृतसर्वभावा महर्षयस्तेऽद्वयतत्त्वमेतत् ।
स्वस्वानुभूत्या प्रवदन्ति शास्त्रे सिद्धान्तरूपेण पदैः समर्थैः ॥ ४३ ॥

एवं योगेन सर्वज्ञा महर्षय एतदद्वयतत्त्वं स्वानुभवप्रामाण्येन सम्यगर्थप्रतिपादकैः पदैः सिद्धान्तरूपेण व्याख्यातवन्तः ॥ ४३ ॥

इत्थं व्रजेशस्य गुरोर्निदेशादन्वर्थतां यत् तरणं भवाब्धेः ।
राधापदे श्रोत्रसुधाप्रवाहः प्रवाहितस्त्वेकपदे जगत्याम् ॥ ४४ ॥

एवं वृषभानोर्गुरोर्गर्गस्यानुज्ञया भवसागरस्य तरणमन्वर्थतां यद् गच्छत् कर्णपीयूषप्रवाहो राधापदं झटिति लोके प्रवाहितः ॥ ४४ ॥

रसस्वरूपा कमनीयरूपा गोपाङ्गनामण्डितरासमध्ये ।
गोविन्दवंशीरवहृष्टरोमा रासेश्वरीयं भविता गुणौघैः ॥ ४५ ॥

रसरूपा कमनीयकान्तिः श्रीकृष्णस्य वंशीरवेण पुलकिता व्रजाङ्गनाभिर्मण्डिते रासमध्ये राधेयं स्वगुणानां वैशिष्ट्येन रासेश्वरी भविष्यति ।४५।

अस्याः सरोजे नयने स कृष्णो निरञ्जनं ब्रह्म सदञ्जनं स्यात् ।
विज्ञानभूता च सुखैकसारा कृष्णापदेन व्यपदेक्ष्यते सा ॥

सच्चिदानन्दरूपाया अस्या नयनसरोजे निरञ्जनं ब्रह्मापि कृष्णोऽञ्जनं स्यादितीयं कृष्णापदेनापि व्यवह्रियमाणा भविष्यति ॥ ४६ ॥

इत्थं प्रणम्याद्भुतशक्तिरूपां व्रजस्य भाग्याद् रमणीस्वरूपाम् ।
दुर्गाभिधां दुर्गतिवारणात् तां योगेन गर्गः स्वकुटीं प्रपेदे ॥

व्रजस्य भाग्याद् रमणीशरीरधारिणीं दुर्गतिनाशनाद् दुर्गाभिधानां विलक्षणशक्तिरूपां तां नवकन्यां प्रणम्य मुनिर्गर्गः सरयूतीरे स्वकुटीं योगमार्गेण प्रस्थितः ॥ ४७ ॥

अद्यैव साफल्यमितं वपुर्मे नेत्रोत्पलाभ्यां प्रमदाश्रुयुग्म्याम् ।
समर्च्य पादं वृजिनापहारं व्रजेशलक्ष्म्या जितपङ्कजाभम् ॥ ४८ ॥

श्रीवृषभानुसुतायाः कमलकान्तिजयिनं पापापहारिणं पादं हर्षाश्रुपूर्णाभ्यां कमलनयनाभ्यां समर्च्य 'मे शरीरमिदं सफलतामद्यैव प्राप्तम्' इति चतुर्थेन सम्बन्धः । चतुर्भिः कलापकम् ॥ ४८ ॥

व्रजेद् व्रजं पावनपावनानां सुदुर्लभां कीर्तिमतः परं तत् ।
रजांसि यस्यामरदुर्लभाभ्यां राधापदाभ्यां परितः श्रितानि ॥४९॥

यस्य व्रजस्य रजांसि देवैरपि दुष्प्रापाभ्यां श्रीराधापादाभ्यां परितः पूतानि सन्ति, तद् व्रजं निरतिशयपवित्राणां सुदुर्लभां कीर्तिमतः परं प्राप्स्यति ॥ ४९ ॥

वागिन्द्रियं त्विन्दतु मे कथन्नो अपाणिपादस्य हि पाणिपादम् ।
अकर्णनेत्रस्य च कर्णनेत्रं लोकोत्तराभां श्रयते समन्तात् ॥५०॥

मम वागिन्द्रियं किञ्चित् प्रतिपादयितुं कथन्न समुत्सहेत । यतो हि हस्तचरणशून्यस्यापि हस्तौ पादौ, श्रोत्रनेत्रशून्यस्यापि कर्णौ नेत्रे चालौकिकीं कान्ति सेवन्ते ॥ ५० ॥

सञ्चिन्तयन्नात्मनि राधिकाया अलौकिकोदात्तगुणानशेषान् ।
आनन्दवाष्पैर्जयतीव गर्गो गङ्गावहद्वारिनगाधिराजम् ॥५१॥

श्रीगर्गः श्रीराधिकाया अशेषान् लोकोत्तरान् गुणान् मनसि विचारयन् आनन्दाश्रुप्रवाहैः गङ्गाप्रवाहयुक्तं नगाधिराजं जयतीव ॥ ५१ ॥

कन्याभिधानोत्सवतृप्तदृष्टीन् समागतान् ब्रह्मविदां वरेण्यान् ।
सत्कृत्य गन्धैर्वसनैर्दुकूलैः प्रस्थापयामास वशी व्रजेशः ॥

ततो जितेन्द्रियो वृषभानुः कन्याया नामकरणोत्सवदर्शनेन तृप्त-
चक्षुषः समुपस्थितान् ब्रह्मवादिनो गन्धैर्दुकूलैश्च सम्पूज्य प्रस्थापया-
मास ॥ ५१ ॥

वेदान्तिने विप्रगणाय धेनूः सुवर्णशृङ्गाः शफबद्धहंसाः ।
संभूषिताभूषणवस्त्रमाल्यैर्ददौ मुदा भक्तिभृतान्तरात्मा ॥ ५३ ॥

भक्तिसमन्वितो वृषभानुः सुवर्णशृङ्गा रजतबद्धखुरा भूषणवसन-
मालाभिः समलंकृता गा वेदान्तिभ्यो विप्रेभ्यो ददौ ॥ ५२ ॥

ज्ञातीः समस्ता मुदिता निकामं भोज्यैः पदार्थैर्मधुरैर्विभिन्नैः ।
महार्हरत्नावलिमाल्यवस्त्रैः सन्तोषयामास कृताञ्जलिः सः ॥

कृताञ्जलिः स वृषभानुः विचित्रैर्भोज्यैर्मधुरैः पदार्थैः मुदितमनसो
दायादान् महामूल्यरत्नवस्त्रमाल्यैः सन्तोषयामास ॥ ५४ ॥

भृत्यान् विनम्रान् सुतनिर्विशेषान् द्रव्यैरलङ्कारशतैर्विशेषान् ।
आज्यप्लुतं मोदकपायसान्नं प्रीत्या कर्णेहत्य समाशिशत् सः ॥५५॥

सुतसदृशान् भृत्यान् द्रव्यैर्भूषणैश्च सत्कृत्य घृताक्तं मोदकं पायसञ्च
आतृप्ति प्रीत्या भोजितवान् ॥ ५५ ॥

द्वीपान्तरादागतवत्सु देवा भक्ता न जग्मुः सुभगं स्वधाम ।
राधापदद्वन्द्वसमर्चनायां जन्मानि स्वीयानि समर्पयन्तः ॥ ५६ ॥

अन्येभ्यो द्वीपेभ्यः समागतेषु केचन देवा भक्ताः श्रीराधाचरणसेवा-
यां स्वीयानि समर्पयन्तः सुभगमपि धाम न जग्मुः ॥५६ ॥

अन्यान् नदीष्णान् मृदुगीतनृत्ये कुप्यैरकुप्यैर्वसुभिश्च वाचा ।
निवेदयामास कृतज्ञतां स्वां कृतज्ञता सत्पुरुषस्वभावः ॥

संगीतादिषु कुशलान् अन्यान् सुवर्णरजतभिन्नैः कुप्यैः सुवर्णरज-
तादिभिरकुप्यैश्च धनैर्वाचा च स्वकृतज्ञतां वृषभानुर्निवेदयामास । कृत-
ज्ञताप्रकाशनं सत्पुरुषाणां स्वभाव एव ॥ ५७ ॥

इत्थं समान् देवमहर्षिमुख्यान् सम्बन्धिनो ग्रामनिवासिनश्च ।
यथायथं भूषणगन्धमाल्यैः सत्कृत्य सम्यग् विससर्ज भानुः ॥

श्रीवृषभानुरेवं देवान् महर्षीन् सम्बन्धिनो ग्रामवासिनश्च भूषण-
वसनपुष्पमालाभिर्यथायोग्यं सत्कृत्य स्वस्वस्थानं प्रति विससर्ज ॥ ५८ ॥

पक्षे सिते भाद्रपदे मनोज्ञेऽजनिष्ट राधाऽष्टमपुण्यतिथ्याम् ।
लक्ष्मीरिवाब्धौ वृषभानुगेहे जनेषु चर्चेयमभूद्व्रजेऽपि ॥ ५९ ॥

मनोहरे भाद्रपदस्य शुक्ले पक्षेऽष्टमे पुण्ये तिथौ जलधौ लक्ष्मीरिव श्रीराधाऽजनि वृषभानुगृहे इति चर्चा व्रजे जनेषु प्रावर्तिष्ट ॥ ५९ ॥

वातायनेनापि पयोदभद्रो धारानिपातैश्चपलासिताब्जैः ।
घण्टानिनादैः स्तनितैश्च मन्दैर्नीराजनं चाप्यभिषेचनं हि ॥६०॥

पयोदोऽपि जलैर्विद्युत्पद्मैरम्बुर्दस्य मन्दैर्गर्जनैः घण्टानिनादैश्च गवाक्षद्वारा नीराजनमभिषेकञ्च समर्प्य इति वक्ष्यमाणेन श्लोकेन सम्बन्धः ॥ ६० ॥

समर्प्य राधापदचारुपद्मे प्रयाति तुष्णीं व्रजपुण्यधाम्नः ।
सद्वंशजातौ महनीयकीर्तिर्निर्व्याजमर्च्यान् भजति स्वभावात् ॥

श्रीराधाया मनोहरे चरणकमले पूर्वोक्तश्लोके प्रतिपादितं नीराजनं समर्प्य व्रजधामतो विना याञ्चां तुष्णीं प्रयातः । सद्वंशजातः पुण्यश्लोको जनः किमपि फलमसमीहमानोऽपि पूज्यान् पूजयति ॥ ६१ ॥

ततः सरित्तीरतमालवाला राजीवराजीतभुजान्तराला ।
भृङ्गावलीचित्रकशालिभाला शरद् व्रजं याति नवीनबाला ॥६२॥

वर्षासमाप्त्यनन्तरं सरितां तीरे तमाला एव वाला यस्यां तथाभूता, कमलानां राजिभिः पंक्तिभिरितं व्याप्तमन्तरालं यस्याः सा, भृङ्गावलीभिरेव चित्रकैः शाली शोभमानो भालो यस्याः सा, तथाभूता नवीनबालेव शरद् व्रजं प्रविशति । शरदः प्रादुर्भावोऽभूत् ॥ ६२ ॥

कलिङ्गकादम्बकदम्बकाया सरित्सरोनिर्मलपेयतोया ।
वाणिज्यसन्नद्धवणिङ्निकाया शरद् व्रजं याति मनोजमाया ॥६३॥

हंसकलिङ्गशरीरा सरितां सरसां निर्मलं पेयं तोयं यस्यां सा व्यापाराय तत्परो वणिजां निकायो यस्यां सा, मदनशक्तिरूपा शरद् व्रजं प्रविशति ॥ ६३ ॥

विकसितकुमुदानां सौरभैर्मत्तचित्तं
द्विजकुलमपि कीर्तिं शारदीं मञ्जु गाते ।
दयितलपनलिप्तं संलिहाना मरन्दं
विविधरतिविलासैः संलसन्ति भ्रमर्यः ॥ ६४ ॥

विकसितानां कुमुदानां सौरभैः प्रसीदच्चेतो मधुरं परागं लिहन्तश्च भ्रमरा मधुरं गुञ्जारवं कुर्वन्ति। दयितानामधरे संलग्नं परागं स्वादयन्त्योऽनेकधा रतिक्रीडाभिर्भ्रमर्यः शोभन्ते ॥ ६४ ॥

बिशदजलदमाला मक्तकीलालजाला
गगनविमलभाले लोककल्याणपक्षा।
व्ययितसकलकोषो विश्वजित्सप्ततन्तु–
र्विलसति नरलोके चक्रवर्तीव सम्यक् ॥ ६५ ॥

विश्वजिति अध्वरे निश्शेषितकोषजातो लोके नरपतिरिव लोककल्याणदक्षा वृष्टजलसमूहा निर्मलमेघमाला गगनविमलभाले सम्यग् विलसति ॥ ६५ ॥

अवनिनववधूटीं मण्डयन्ती समन्ता द्
रजतमयदुकुलैः शीतरश्मेर्मयूखैः।
अभिशरणपथाङ्कापन्नपङ्कं कलङ्कं
दवयति परितापैस्तिग्मरश्मेश्शरच्छ्रीः ॥ ६६ ॥

चन्द्रमसः शुभ्रैर्दुकूलैरवनिं नवां वधूटीं भूषयन्ती शरद् अभिसरणमार्गस्य पङ्ककलङ्कं सूर्यस्य तापैर्दवयति। वर्षर्तोः प्रभावात् तृणादिभिर्युक्ता सम्प्रति तेषां विगमात् वधूटचां नवत्वम् पङ्कादिना मार्गावरोधाऽभिसरणे काठिन्यमासीत् ॥ ६६ ॥

विमलविपिनलक्ष्मीर्यौवनं भासयन्ती
कुचनवकलिकाभिर्मल्लिका यूथिकानाम्।
व्यजनयति धरित्रीं शारदानां नवानां
सुरभिकुसुमवातैर्वारणाह्वानदक्षैः ॥ ६७ ॥

स्तनैर्मल्लिकानांयूथिकानां च नवकुड्मलैर्निर्मलवनलक्ष्म्या यौवनोद्गमं लक्षयन्ती, सप्तपर्णानां नवानां गजमदवदुत्कटगन्धपुष्पस्पर्शिपवनैर्धरां शरदः श्रीः सेवते ॥ ६७ ॥

हिमनिकरनिपातान् मानसामुक्तमाना
युवतिततिकटाक्षैरुत्पलैरर्च्यमानाः।
मुखकलितमृणाला विष्किरैर्वर्द्धमाना
व्रजविपिनमिदानीं कामयन्ते मरालाः ॥ ६८ ॥

शरत्प्रारम्भतो हिमानीपातेन मानसे रोगोत्पत्त्या ततो विरक्ता मराला व्रजभुवमाप्नुवन्ति, मध्येमार्गञ्च युवतीनां कटाक्षैः कमलैः सम्भा-

व्यन्ते, अर्थाद् युवतिभिः सादरं वीक्ष्यन्ते, पाथेयरूपेण मृणालं गृह्णन्तो वयोभिः स्वागम्यन्ते ।। ६८ ।।

धवलकुसुमकाऽऽशालम्बमुक्ताकलापा
विलसितगति कूजद्धंसमञ्जीरपादा ।
अमलपुलिनवासाः सारसोदग्रनासा
विलसति नवबालाऽगस्त्यवालावतंसा ।। ६९ ।।

श्वेतकाशपुष्पाण्येव लम्बा मुक्ता कलापा यस्याः सा, विलासपूर्णगतिकाः कूजन्तो हंसा एव नूपुराः पादे यस्याः सा, अमलं पुलिनमेव वस्त्रं यस्याः सा, सारसा एव उन्नता नासा यस्याः सा, अगस्त्यपुष्पमेव वालेषु भूषणं यस्याः सा, तथाभूता नवीना बाला शरद् विलसति ।। ६९ ।।

कलमकलितवप्रे वल्लरी मोदमाना
भृशमवनतमध्या कुब्जलीलां दधाना ।
शुकमुखधृतवृन्ता पद्मरागस्थिता सा
कनकरसमयीवाभाति कामस्य शक्तिः ।। ७० ।।

शालिक्षेत्रे नतमध्या वल्लरी मोदमाना कुब्जविडम्बनां करोति । सा च शुकचञ्च्वा धृता पद्मरागमणिपात्रे स्थिता सुवर्णरसनिर्मिता कामस्य शक्तिरिव भाति ।। ७० ।।

व्रजविधुवदनाभ्यः शिक्षितुं नेत्रभङ्गिं
सततमभिपतन्तो भूतले खञ्जरीटाः ।
विरहिहृदयदारा हारिहारीतरावा
दिशि दिशि शरदोऽलं लक्षयन्तीव लक्ष्म ।। ७१ ।।

खञ्जनपक्षिणो व्रजाङ्गनाभ्यो नयनविलासं शिक्षितुं भूतले कामं पतन्ति, विरहिणो हृदयस्य विदारका मनोहराणां हारीतानां कलरवा दिशि दिशि ? शरदोऽलं शोभां प्रकाशयन्ति ।। ७२ ।।

व्रततिततिविलम्बापीनकूष्माण्डवक्षाः
किसलयदलकान्तालक्तकारक्तपादा ।
मसृणमसृणवल्कालाबुलम्बप्रकोष्ठा
विहरति शरदः श्रीरिन्दिरेवाद्वितीया ।। ७२ ।।

लतावृन्देषु लम्बा आपीनाः कूष्माण्डा एवं वक्षो यस्याः सा, नव पल्लवा एव मनोहरा अलक्तकैः रक्ताः पादा यस्याः सा, कोमलवल्कालाबुरेव

लम्बः प्रकोष्ठो यस्याः सा, तथाभूता शरदः श्रीः द्वितीया इन्दिरेव विहरति ॥ ७२ ॥

शमितदिवसतापा मल्लिकामोदमुग्धा
मलयजरसलेपा चन्द्रिकाचारुहासा।
कुमुददशनपंक्तिः शारदी सैव रात्रि-
र्दलितमदनकामो माधवोऽप्यत्र मुग्धः ॥ ७३ ॥

शमितो दिवस्य तापो यत्र सा,मल्लिकानामामोदै र्युक्ता, चन्दनरसस्य लेपो यस्यां सा,च न्द्रिकायाश्चारुहासो यस्याः सा, कुमुदानां दशनानां पंक्तिः यस्याः सा, तथाभूता सैवेयं रात्रिः यत्र कामदेवस्य कामदमनो माधवोऽपि मोहं गतः ॥ ७३ ॥

वरवृषभपुरस्का लम्बितप्रातरशाः
कलधूतलघुदण्डा ईषया मण्डितांसाः।
विगतसकलदोषाः कर्षकास्त्यक्तयोषा
उषसि झटिति वप्रं ग्राम्यगीताः प्रयान्ति ॥ ७४ ॥

सकलां निशं दयिताभिः परिसमाप्य वृषभवरं पुरस्कृत्य प्रातराशं समादाय लघुदण्डं करे धृत्वा हलीषया मण्डितांसाः प्रातः मधुरं गीतं गायन्तः कर्षकाः हल्यक्षेत्रं प्रयान्ति ॥ ७४ ॥

कुचयुगपरिणाहा धर्मसन्तप्तरामाः
श्रममलिनमुखाभाः काण्डलावासमर्थाः।
परिगतपरिणामं शालिजालं लुनन्ति
प्रकृतिविलसितं हा जीविका जीविताधिः ॥ ७५ ॥

विशालस्तनाः श्रमेण मलिनवदना धर्मसन्तप्ता अत एव काण्डलावेऽक्षमा रामाः पक्वं शाल्यन्नं लुनन्ति। जीविका जीवनव्याधिरिति प्रकृतेः कुत्सितो विलासः ॥ ७५ ॥

अभिनवकलमानामोदनं मण्डमिष्ठं
घृतदधिपरिषिक्तं सर्षपस्नेहपक्वैः।
शरदि कृषकवृन्दं सार्षपैर्भूरिशाकै-
रशननवनपूर्वं भूरि भुङ्क्ते हि धन्यम् ॥ ७६ ॥

मण्डमधुरं नवानां शालीनां घृतदधिमिश्रतमोदनं सर्षपतैलपक्वैः सर्षपशाकैः सह भोजनप्रशंसापूर्वकं धन्यं कृषकवृन्दं शरदि भूरि भुंक्ते ॥ ७६ ॥

सुरभितघटभूमी रागमूलैः प्रसूनै स्
तुहिनकरसुधाक्तैः पारिजातः प्रसीदन् ।
अवनिजननदात्रीमर्चतीव प्रभाते
विजहति न हि विज्ञा जातुचित् पूज्यपूजाम् ॥७७॥

यस्य परिसरभूमिः सुरभिकुसुमैर्व्याप्ता, प्रसीदन् स परिजातः चन्द्रमसः सुधासिक्तै रागमूलैः पुष्पैः जन्मदात्रीं भुवं प्रभातेऽर्चतीव । चतुराः पूज्यानां पूजां कदाचिदपि न त्यजन्ति ॥ ७७ ॥

इत्थं मनोहरमरीचिदुकूलवासा
वानीरवारकटिलम्बितकेशपशा ।
आलम्बिवल्लरिकपोलगकर्णपूरा
राध्या शरद् यजति लोकहिताय राधाम् ॥७८॥

मनोहरकिरणा एव वासो यस्याः सा, वेतससमूहा एव कटिपर्यन्तं प्रसृताः केशा यस्याः सा, वल्लरय एव कपोलं गताः कर्णपूरा यस्याः सा तथाभूता राधनीयापि शरद् लोककल्याणाय राधां यजति ॥ ७८ ॥

विद्वद्वन्दितचन्द्रशेखरसुधीः प्रासूत यं मङ्गला-
नन्तानन्दसरस्वतीपदयुगाम्भोजप्रसादोदयात् ।
श्रीराधाचरणाब्जचिन्तनफले श्रीजानकीजानिना
काव्ये तेन कृते समाप्तिमगमत् सर्गस्तुरीयोद्भुतः ॥७९॥

पिता श्रीचन्द्रशेखरशुक्लो माता च मङ्गला यं श्रीकालिकप्रसाद शुक्लं पुत्रं प्रासूत, तेन जानकीजानिना श्रीराधाश्चरणकमलचञ्चरीकेण दण्डिस्वामिश्रीमदनन्तानन्दसरस्वतीपदकमलप्रसादात् कृते श्रीराधाचरितमहाकव्येऽद्भुतस्तुरीयः सर्गः समाप्तिमगमत् ॥ ७९ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये चतुर्थः सर्गः समाप्तः ॥

पञ्चमः सर्गः

कपोलपालिं नवनीतकोमलां
प्रभातभानुद्रवरागनिर्मिताम् ।
समामृशन्ती मृदुपाणिपल्लवै-
र्व्यचिन्तयत् कापि विहस्य वल्लवी ।। १ ।।

नवनीतकोमलां प्रातःकालिकसूर्यस्य द्रवरागेण निर्मितां श्रीराधायाः कपोलपालिं स्पृशन्ती काचिदाभीरी मन्दस्मिता वक्ष्यमाणं व्यचिन्तयत् ।।१।।

अनन्यसाधारणरूपमीदृशं
विधिर्विधातुं प्रभवेन्न कर्हिचित् ।
प्रकम्पहस्तस्थविरस्य तूलिका
न चित्रयेच्चित्रमभीष्टलक्षणम् ।। २ ।।

श्रीराधाया अन्यत्र दुर्लभमीदृशं रूपं विधातुं विधिः कदापि न प्रभवेत् । यतो हि तादृशमद्भुतं रूपं विधातुमभीप्सितोऽपि वृद्धस्यात एव प्रकम्पकरस्य विधेस्तूलिका अभीष्टं चित्रं चित्रयितुं न शक्नोति ।। २ ।।

अकारणं वस्तु भवेद् यदीदृशं
जनैर्हि यत् स्थूलदृशापि दृश्यते ।
तदा कथं गौतम आकुलोऽभूज्
जगद्विधातुस्त्वनुमानसाधने ।। ३ ।।

यत् स्थूलदृशापि जनैर्द्रष्टुं शक्यते, तद् वस्तु यद्यकारणं भवेत्, तदा महर्षिगौतमः कार्यत्वहेतोर्जगतः कर्तृत्वेनेश्वरमनुमातुं कथं प्रयतते ।। ३ ।।

न तर्कपक्षा अधिगन्तुमीशते
रहस्यमेतन्नितरां विपश्चितः ।
पतञ्जलेर्भाष्यवगाहमन्तरा
न जातुचित् पाणिनितत्त्वमद्भुतम् ।। ४ ।।

तर्करसिका विपश्चितो भक्तिमन्तरा राधातत्त्वं ज्ञातुं समर्था न भवेयुः । यथा महर्षिपतञ्जलिप्रणीतस्य भाष्यस्यालोडनं विना महर्षिपाणिनिविरचितस्य व्याकरणस्य तत्त्वमद्भुतं ज्ञातुं कदाचिदपि न समर्था भवन्ति ।। ४ ।।

न लौकिकी धीरनुमातुमीश्वराप्यलौकिकं वस्तु सहस्रसाधनैः ।
रसान्वितं रीतिगुणोज्ज्वलं यथा कवेर्वचोऽलंकृतिभावभावितम् ॥

सहस्रसाधनसम्पन्नापि लौकिकी बुद्धिरलौकिकं पदार्थमनुमातुं न शक्नोति, रीतिगुणालङ्काररससमन्वितं महाकविविरचितं काव्यमिव ॥५॥

यथा तथा व्याप्तिबलाद् विकल्पने महाबुधोऽपि निपतेदसंशयम् ।
असत्पथोपार्जितबान्धवावनिः कुरूद्वहानां निधनाय कल्पिता ॥

येन केन प्रकारेण व्याप्तिबलाद् यस्य कस्यापि वस्तुनो विकल्पने महाविदुषामपि विनिपाते संशयो नास्ति । यतो हि असत्पथेन गमने कस्यापि कल्याणं न भवति । यथा असत्यमार्गेण अवाप्ताऽवनिः कौरवाणां नाशायैव समपद्यत ॥ ६ ॥

उदन्वतो गूढतलं विगाहते न यष्टिहस्तो निपुणोऽपि नाविकः ।
न गम्यतां शास्त्रकृतां गतं यकं कथं हि तन्मन्दमतिर्वगाहताम् ॥

समुद्रस्य गभीरं तलं कुशलोऽपि नाविको यष्टिभिर्वगाहितुं न शक्नोति । अचिन्त्यमपरिमेयं यत् तत्त्वं शास्त्रकृतामप्यस्ति, तत् तत्त्वं मन्दमतिना कथं ज्ञातुं शक्यते ॥ ७ ॥

स्मिताननां तां करतालिकाभिः काचित् किशोरीं व्रजधामलक्ष्मीम् ।
विबोधयन्ती मधुरं त्ववोचत् कृष्णां कथं त्वामगदत् स गर्गः ॥

ईषद् विहसन्ती काचन व्रजबाला करतालिकाभिः व्रजधामलक्ष्मीं श्रीराधां विबोधयन्ती मधुरं जगाद यत् स गर्गो नामकरणसंस्कारसमये त्वां कृष्णां कथमगदत् ? ॥ ८ ॥

गौराङ्गि हैमावयवानवद्ये मुखत्विषा त्रासितपर्वचन्द्रे ।
क्षौमैर्दुकूलैः परिदीपिताशे कृष्णां कथं त्वामवदन्मुनीशः ॥ ९ ॥

हे गौरवर्णे स्वर्णवर्णैरङ्गैर्मनोहरे, मुखकान्त्या निन्दितपूर्णचन्द्रे, क्षौमैर्वसनैः प्रकाशितसर्वदिक्के, स मुनीशो गर्गस्त्वां कस्मात् कारणात् कृष्णां जगाद । तव कृष्णाभिधाने कापि युक्तिर्नास्ति ॥ ९ ॥

कृष्णा यदि त्वं कबरीकृपातो ज्योत्स्ना कथं नाननचन्द्रबिम्बात् ।
करारविन्दात् कमलाऽद्वितीया प्रियंवदा वा मधुराभिलापात् ॥

हे किशोरि, यदि केशपाशस्य कारणात् त्वं कृष्णा, तदा मुखचन्द्रकारणात् ज्योत्स्ना कथं न ! करकमलात् कारणात् अद्वितीया कमला कथं न, अथवा मधुरभाषणात् प्रियंवदा कथं न ! ॥ १० ॥

बिम्बाधराद् बिम्बफलाभिधाना मृणालहस्ताच्च मृणालिनी वा ।
कुन्दद्विजेभ्यो नवकुन्दमाला नीलाब्जनेत्रान्नलिनी नवा वा ॥

हे किशोरि, त्वं बिम्बाधरोष्ठाद्बिम्बाभिधाना कथं न मृणालहस्ताच्च मृणालिनी कथं न, कुन्ददशना त्वं कुन्दमाला कथं न, नीलकमलनयना त्वं नूतना नलिनी कथं न ! ॥ ११ ॥

शङ्खानुकारात् कलकम्बुकण्ठी पीनस्तनात् स्तन्यसुधोदकुम्भी ।
गतेर्विलासाद् गजगामिनी वा कटीरसौक्ष्म्याच्च कृशोदरी वा ॥

कण्ठस्य शङ्खाकारत्वात् कम्बुकण्ठी, पीवरकुचात् सुधोदकुम्भी, गमनविभ्रमाद् गजगामिनी, कटिलाघवात् कृशोदरी वा त्वं कथन्न व्यवह्रियसे ! ॥ १२ ॥

रम्भा परा वा जघनस्वभावात् पदारविन्दात् स्थलपद्मिनी वा ।
त्वं माधवी दिव्यशरीरकान्त्या किञ्चात्र युक्तिर्मुनिपुङ्गवस्य ॥

जघनात् द्वितीया रम्भा, पदकमलात् स्थलपद्मिनी, दिव्यदेहात् माधवी वेति तव नाम मुनिना कथन्न कृतम् ! ॥ १३ ॥

तर्कैकजालग्रहिलस्वभावा मात्सर्यमुत्सार्य महानुभावाः ।
कृष्णाभिधानस्य रहस्यमेतत्तदा वियद्वागिति संचकाशे ॥ १४ ॥

अयि तर्कजालजटिलस्वभावा महानुभावाः, मत्सरशून्याः श्रीमन्तः सन्तः 'कृष्णा' इत्यभिधानस्य रहस्यमवगच्छतेति नभोवाणी पूर्वोक्तविनोदपरम्परायां मग्नायां व्रजाङ्गनायां सत्यां संचकाशे ॥ १४ ॥

गुणैरुदारैर्महतो मुरारेर्मनः समाक्रक्ष्यति बालिकेयम् ।
कृष्णस्तदारात् किल कृष्णकान्तिः कृष्णामतस्तामवदन्मुनीशः ॥

इयमप्रतिमप्रभावा किशोरी परमोत्कृष्टलावण्यादिगुणैः श्रीकृष्णस्यापि चेतः समाक्रक्ष्यति, कृष्णश्च तस्या दूरे मलिनकान्तिः, समीपे च कर्षककान्तिः स्यादिति मुनीशो गर्गस्तां कृष्णामगादीत् । 'आराद् दूरसमीपयोः' इति कोषः ॥ १५ ॥

ततश्च जाता जगती समस्ता तस्यां विलीना परिभुक्तभोगा ।
सा सच्चिदानन्दमयाद्वितीया कृष्णामतस्तां मुनिराजुहाव ॥

तस्या एव सर्वा जगती समुत्पन्ना भोगं परिसमाप्य तस्यामेव लीयते, सा चाद्वितीया सच्चिदानन्दस्वरूपा, अतो मुनिर्गर्गस्तां 'कृष्णा' इति नामधेयेन व्याहरत् ॥ १६ ॥

भूमिः प्रजानां कविता कवीनां वेदान्तवेद्या परभक्तिगम्या ।
ततोऽपरं शास्त्रविरुद्धतत्त्वं कृष्णामतस्तां मुनिराबभाषे ॥ १७ ॥

सैव जनानामुत्पत्तिस्थानम्, कवीनां सरसकाव्यभूमिः, उपनिषद्भिर्ज्ञेया, परया भक्त्यैव गम्या, ततोऽपरं तत्त्वं शास्त्रविरुद्धम् । अतो मुनिस्तां कृष्णामगादीत् ॥ १७ ॥

भृङ्गायिता पद्मपदे तदीये चकोरिता चन्द्रमुखेऽकलङ्के ।
केशायिता मूर्धनि कान्तकृष्णः कृष्णामतस्तां मुनिराज आख्यत् ॥

अस्या बालायाः पदकमले श्रीकृष्णो भृङ्ग इव, निष्कलङ्के चन्द्रमुखे चकोर इव, शिरसि केश इव भविता । अतः स मुनिर्गर्गः इमां कृष्णामवदत् ॥ १८ ॥

ऋतम्भरा कृष्णमयी सदा सा कृष्णस्तदाराधनमग्नचेताः ।
तयोरभेदः श्रुतिशास्त्रसिद्धः कृष्णामतस्तामगदन्मुनीन्द्रः ॥१९॥

इयं सदा सत्यस्वरूपा श्रीकृष्णस्वरूपा, कृष्णोऽपि तन्मय एव, तयोः कृष्णाकृष्णयोरभेदः श्रुतिशास्त्रसम्मतः । अतो मुनिस्तां कृष्णामवदत् ॥

इति नभसि समुद्गतं सुराणां श्रुतिमधुरं वच आकलय्य कीर्तिः ।
चकितहरिणवामपङ्कजाक्षी सदनविधिं दधिमन्थनं विहाय ॥

पूर्वोक्तं देवानामाकाशभाषितं कर्णमधुरं वचनं कीर्तिः श्रुत्वा चकिता हरिणीव मनोहरकमलनयना गृहकार्यं दधिमन्थनं परित्यज्य शयनीयमाजगामेति परेणान्वयः । त्रिभिः विशेषकम् ॥ २० ॥

करकमलगृहीतमन्थदण्डात् स्रुतदधिबिन्दुसुषिक्तबद्धविश्वा ।
त्वरितगमनविस्खलत्पदाब्जा श्रमजलबिन्दुविभासिभालभागा ॥

यस्याः करकमलेन गृहीतात् मन्थनदण्डात् स्रुतस्य दध्नो बिन्दुभिः सुषिक्ता बद्धा भूर्यया सा, शीघ्रगमनेनेतस्ततो भवत् चरणकमलं यस्याः सा, स्वेदबिन्दुभिर्विभासी भालभागो यस्याः सा, तथाभूता कीर्तिः शयनीयमाजगाम ॥ २१ ॥

परिपतितदुकूलवामवर्ष्मा श्लथदलकावृतवक्त्रचन्द्रलक्ष्मीः ।
परिजनपरिवारिता समन्ताद् विकचमुखी शयनीयमाजगाम ॥२२॥

मनोहरशरीरात् पतद् वसनं यस्याः, शिथिलकेशपाशेनावृता मुखचन्द्रलक्ष्मीर्यस्याः, तथाभूता, परिजनैः समन्तादनुगम्यमाना प्रसन्नवदना सा कीर्तिः श्रीराधायाः पार्श्वेऽगमत् ॥ २२ ॥

निरुपमशयनीयसुप्तबालां विधुवदने विनिवेशिताङ्गुलिं ताम् ।
शिरसि मृदुकरेण सम्मृषन्ती व्रजललना परिचुम्ब्य लोकलक्ष्मीम् ॥

अतुले शयनीये सुप्तां मुखचन्द्रे धृताङ्गुलिं लोकश्रियं तां बालां शिरसि कोमलकरेण सम्मृषन्ती व्रजललना सा कीर्तिः परिचुम्ब्य मधुरमुवाचेति परेणान्वयः । युग्मकम् ॥ २३ ॥

परिजनपरिवीजिता नताङ्गी शुभदशनैर्हि दिशोऽपि भासयन्ती ।
सरसिजपदमादरात् स्पृशन्ती मधुरमुवाच तदीयमाशु कीर्तिः ॥

परिजनवीजिता दन्तैर्दिशोऽपि प्रकाशयन्ती नतशरीरा कीर्तिः बालिकायाः कमलपदमादरात् स्पृशन्ती मधुरमाशु जगाद ॥ २४ ॥

त्वमिति यदपि भूतजातमूलं सुरवचनादनुभावतोऽपि सिद्धम् ।
तदपि मदभिलाष एष विज्ञे तव शिशुखेलमहं विलोकयेयम् ॥२५॥

यद्यपि त्वं सकलप्राणिमूलमिति देववाण्या अनुभावतश्च सिद्धम्, तथापि हे सकलतत्त्वज्ञे, तव बालक्रीडामहं पश्येयमिति ममाभिलाषः । तं त्वं पूरयेत्यर्थः ॥ २५ ॥

तव च ललितधूलिधूसराङ्गं विधुविशदं वसनं ममानुकूलम् ।
मलिनयतु सुरीसुरेशकाम्यं शमयतु सोमविभेव देहतापम् ॥२६॥

अतिमनोज्ञं चन्द्रोज्ज्वलं मम वसनं धूलिधूसरं शचीन्द्राभ्यामपि स्पृहणीयं तवाङ्गं मलिनं करोतु । चन्द्रप्रभेव मम शरीरतापञ्च शमयतु । इच्छार्थे लोट् ॥ २६ ॥

विलसितगमनञ्च मन्दहासं तव नवकुड्मलकान्तदन्तपङ्क्तिम् ।
कुटिलमलकमाननावतंसं मुदितमनाः सदने निभालयेयम् ॥२७॥

तव विलासगतिं मन्दं हसितं नवकुड्मलमिव कान्तं दशनदलं मुखभूषणं कुटिलं केशञ्च प्रसीदच्चेता अहं स्वसदने कदा पश्येयम् ! आशंसायां लिङ् ॥ २७ ॥

किमपि किमपि वल्गु मन्दमन्दं क्रमरहितं वचनं निगूढभावम् ।
श्रुतिहृदयसुधासहोदरं ते श्रवणपुटैः परिपीय शं व्रजेयम् ॥ २८॥

तव क्रमरहितमसम्बद्धं तथापि मधुरमस्पष्टं कर्णे हृदये च सुधोपमं वचनं कर्णपुटकैर्निपीय परमानन्दं व्रजेयम् ॥ २८ ॥

तव ललितकरं करेण धृत्वा विधुवदनं परिचुम्ब्य मातृभावात् ।
मुनिरिव शशिनं विभाव्य भाले परममुदं सुरदुर्लभां भजेयम् ॥

तव ललितं करं स्वकरेण परिगृह्य मातृस्नेहेन तव चन्द्रमुखं परिचुम्ब्य भाले विधुं विलोक्य सुरैर्दुर्लभां परमां मुदं मुनिरिव प्राप्नुयाम् ॥ २९ ॥

असुलभविषयाग्रहां कदाचित् सदनविधौ विनियुक्तमानसायाः ।
मम परुषगिरातिकातराक्षीमतिकरुणार्द्रहृदा परिष्वजेय ॥३०॥

कदाचिदसुलभे वस्तुनि आग्रहवतीं गृहकर्मणि च व्यस्ताया मम कठोरवचसा खिन्नां त्वां दयार्द्रहृदा कदाऽऽलिङ्गेयम् ॥ ३० ॥

करयुगधृततातकम्बुकण्ठा मुहुरनुरोधवचोविरोधवित्ता ।
अतिशयितसुधं पयोऽपिबन्ती मम हृदयं कुमुदं विकासयेस्त्वम् ॥

करयुगेण धृतस्तातस्य कम्बुकण्ठो यया सा, ममानुरोधवचसो विरोधे परायणाऽतिसुधमपि पयो न पिबन्ती त्वं मम कुमुदं हृदयं विकासयेः ॥३१॥

अनुनयवचनं निशम्य शीघ्रं रविरतिवेल इतीति भुङ्क्ष्व मुग्धे !
विषमवसुमतीं पलायमाना चकितमृगीनयनां हि मां विदध्याः ॥

हे मुग्धे, 'सूर्यो वेलामतिक्राम्यतीति भुङ्क्ष्व' इत्यनुनयवचनं श्रुत्वा झटिति विषमायां भुवि धावन्ती चकिताया मृग्या नयनमिव नयनं यस्यास्तथाभूतां मां कुरु ॥ ३२ ॥

शशिकरधवलाम्बरं वसाना कचनिचयैः पिहिताननाब्जलक्ष्मीः ।
शिशुकरधृतवामपाणिवस्त्रा नटनपरा शिशुमण्डले भवेस्त्वम् ॥

चन्द्रकिरणमिव धवलं वस्त्रं दधाना, केशैराच्छादितमुखलक्ष्मीः, शिशूनां करैः गृहीते करवस्त्रे यस्यास्त्वं शिशुमण्डले नृत्यपरा भवेरिति ममाभिलाषः ॥ ३३ ॥

अभिनवबहुवस्नकान्तवासो मृदु परिधाय रजोऽवकीर्णकक्षे ।
सुखमवनितले मुहुर्लुठन्तीं सपदि कदाङ्कमहं विरोपयेयम् ॥३४॥

कोमलं बहुमूल्यं मृदु वसनं परिधाय धूलिधूसरे पृथिवीतले पुनः पुनर्लुठन्तीं त्वां तत्क्षणं कदाऽहं स्वाङ्कं निदध्याम् ॥ ३४ ॥

पलमपि सदनेऽनवस्थितां त्वां विविधपदार्थमितस्ततो नयन्तीम् ।
अपि परुषवचोऽनिवर्तमानां लघुगमना हि कदा निवर्तयेयम् ॥३५॥

क्षणमपि गृहे एकत्रानवस्थितां विविधं पदार्थमितस्ततः कुर्वन्तीं कठोरवचसाऽपि न निवृत्तां त्वां कदाऽहं दूरीकुर्याम् ॥ ३५ ॥

विकसितनवनीलनीरजाक्षी पुलकितचम्पककान्तकोमलाङ्गी ।
इति कथितवती तदोम्स्वरूपां व्रजललनां च ददर्श साधुकीर्तिः ॥

विकसितकमलकान्तनयना, चम्पककान्तकोमलाङ्गी कीर्तिः तदा व्रजललनां श्रीराधाम् 'ॐ' स्वरूपां ददर्श ॥ ३६ ॥

विगलितवृजिना तदा मृगाक्षी प्रणवमयीं तनयामभीष्टभूमिम् ।
उरसि सपदि सन्निरीक्ष्य कीर्तिः परमसुदं समियाय योगिनीव ॥

तदा विगतपापा मृगाक्षी कीर्तिरभीष्टसिद्धिकरीं प्रणवमयीं बालिकां समागतामुरसि निरीक्ष्य प्रणवदर्शनान्तरं योगिनीव परमां मुदमापत् ॥३७॥

रविरपि कुतुकी तदेव वृत्तं मुनिवरवन्दितभानुभिः समर्च्य ।
सरसिजवनसौरभं विवृण्वन् खगगणगीतयशा हि वृद्धिमागात् ॥

रविरपि कौतुकाकुलस्तदेव वृत्तं मुनिवरैर्वन्दितैः किरणैः सम्पूज्य कमलवनस्य सौरभं प्रसारयन् पक्षिवृन्दैर्गीयमानकीर्तिः क्रमेण वृद्धिं गतः ॥ ३८ ॥

उदयगिरिविशालभालभागं झटिति रविर्विजहत् प्रसन्नचेताः ।
उपदिशति समान् समानमाने नियतिविलासभवे हि सातदुःखे ॥

प्रसन्नमना रविरुदयगिरेर्विशालं भालं शीघ्रं मुञ्चन् निखिलान् जनान् समुपदिशति यद् भाग्यवशात् सुखदुःखे क्रमेणागच्छतो गच्छतश्च ॥ ३९ ॥

रविजनितटवीतकल्यसन्ध्यो मुनिवृषभानुरवाप्तसद्मवृत्तः ।
दिनपतिपदपूरिताभिलाषो मुदितमनाः प्रजगाम सद्म धीरः ॥४०॥

तरणिजातीरे प्रातः सन्ध्यां सम्पाद्य गृहवृन्तान्तञ्च समवाप्य भगवतः सूर्यस्य कृपया परिपूर्णाभिलाषो मुनिर्वृषभानुः धीरः प्रसन्नमनाः सद्म जगाम ॥ ४० ॥

अधिपथमनुकूलवातजुष्टो युवतिजनैः शिरसोढपूर्णकुम्भः ।
मृगशिशुरसनाभिलीढपादस्तरुततिवारिततिग्मरश्मितापः ॥४१॥

मध्येमार्गमनुकूलेन पवनेन सेवितः, युवतिततिभिः शिरसोह्यमानान् पूर्णकुम्भान् पश्यन् मृगशिशुभिः जिह्वया लिह्यमानपादः वृक्षावलिनिवारित-सूर्यतापः स वृषभानुः सद्म जगामेति पूर्वेणान्वयः ॥ ४१ ॥

श्रुतिमधुरनिनादचातकालिर्दिनकरगौरदुकूलदिव्यकान्तिः ।
नगरयुवतिगीतभूरिभाग्यो द्रुतगतिभानुसमानयानभानुः ॥४२॥

भानुरिव त्वरितगतिर्वृषभानुः, चातकानां कर्णमधुरैर्निनादैः स्तूयमानः पीताम्बरेण शोभमानः, नगरयुवतिभिः गीयमानभाग्यः सद्म जगामेति पूर्वेणान्वयः ॥ ४२ ॥

किमपि किमपि मन्दमालपन्ती प्रियवचना शुभलक्षणा किशोरी ।
नयनपथमुपेत्य कापि मार्गे प्रणतपदा नभसा जगाम तूर्णम् ॥४३॥

मार्गेऽनिर्वचनीयं किमपि मन्दं मन्दं व्याहरन्ती मधुरवचना कापि शुभलक्षणा किशोरी वृषभानोः पादौ प्रणम्य झटिति नभसा जगाम ॥४३॥

कनकललितरोमराजिरम्यं विहगकुलं किल दक्षिणक्रमेण ।
प्रमदभरभृतश्च कूजदाराद्युदडयताध्वनि वीजयत् समन्तात् ॥४४॥

कनकस्येव ललितस्य रोम्णो राज्या रम्यं भूरिहर्षेण युक्तं कूजद् विहगकुलं दक्षिणतो वीजयत् परितः उदडयत ॥ ४४ ॥

प्रतिपलमपि जायया प्रतीक्ष्यः शुभशकुनैर्मुदितो गभीरचेताः ।
परिजनपरिलक्षिताग्रमार्गः स्वकसदनं प्रविवेश पांसुपादः ॥४५॥

प्रतिक्षणं कीर्त्या प्रतिपाल्यमानः, पथि परिजनैर्दर्शिताग्रमार्गः, शुभैः शकुनैः प्रसन्नो गभीरमनाः धूलिधूसरपादः श्रीवृषभानुः स्वगृहं विवेश ॥४५॥

पुरजनजयघोषमादरेणानुचरनतिं बहुमानतश्च शृण्वन् ।
प्रियजनपरिकल्पितार्घ्यहारं दधदनुरागभरेण कम्बुकण्ठे ॥ ४६ ॥

नगरजनानां जयघोषं भृत्यानां प्रणामञ्च बहुमानेनाकर्णयन् प्रियजनैः समर्पितस्यार्घ्यस्य मालां कण्ठेऽतिस्नेहेन धारयन् शय्यासविधे जगाम ॥४६॥

कतिपयमनिरीक्ष्य तां किशोरीं वरवरसानुपतिः पलं समुत्कः ।
पुलकितवनितोपदिष्टशय्यासविधमगाच्छुभलक्षणोऽतितूर्णम् ॥४७॥

शुभलक्षणः श्रीवृषभानुः कतिपयपलं तां किशोरीमवीक्ष्योत्कण्ठितः पुलकितया वनितया निर्दिष्टायाः शय्यायाः सविधमगात् ॥ ४७ ॥

उपहृतरविपादपुष्पमालामधिशयनं निदधौ शुभाय भानुः ।
जगदवनविभोश्शुभाभिलाषः प्रथयति वत्सलतामनीदृशोऽपि ॥

वृषभानुः अर्घ्यकाले रवये समर्पितां पुष्पमालामेव कन्यायाः क्षेमाय शयने निदधौ । जगतो रक्षणे समर्थस्यापि शुभाभिलाषः तादृशस्यापि विज्ञस्य वत्सलतां प्रकाशयति ॥ ४८ ॥

विशददशनदीप्तसद्मभागः स्मितवदनामभिनन्द्य धर्मपत्नीम् ।
सकलभुवनमूलतत्त्वतोकं शुभवचनैरभिवर्ध्य निर्गतः सः ॥४९॥

समुज्ज्वलानां दशनानां कान्त्या प्रकाशितो गृहभागो यस्य स वृषभानुर्मन्दस्मितां कीर्तिमभिनन्द्य सकलभुवनमूलं बालिकामभिवर्ध्य बहिर्निर्गतः ॥ ४९ ॥

दिशमभिमतकामिनीं स पूर्वां परिजहदाशु सहस्ररश्मिरद्धा ।
अपि वियत उरो विमृद्य पादैः शिशिरविलुप्तविभो न भाति हन्त ॥

सम्प्रति काममभिमतां कामिनीं पूर्वां दिशं शीघ्रं परित्यजन् पादैः वियतोऽप्युरो विमृद्य शिशिरप्रभावान्निष्प्रभः सहस्ररश्मिर्न भातीति खेदस्य विषयः ! ॥ ५० ॥

अभिभवविषयो न यत्प्रभावः समजनि हन्त सुरासुरेश्वराणाम् ।
स हि कृपणदशां गतो विवस्वान् विधिरतिशेत इदं समस्तचक्रम् ॥

यस्य भानोः प्रभावोऽतिप्रभावशालिनां सुराणामसुराणाञ्च तिरस्कारविषयो नाभूत्, स सम्प्रति दयनीयतां गत इति खेदः । विधिः समस्तमिदं जगतीतलमतिशेते ॥ ५१ ॥

अभिमतमवलोकनं यदीयं न हि समभूद् गृहमध्यवर्तिनोऽपि ।
विगलितविभवं तमेव भानुं नयनयुगं वत दर्शयन्ति लोकाः ॥

गृहमध्यस्थितस्यापि यस्यावलोकनमिष्टं न समभवत्, सम्प्रति निष्प्रभं तमेव सूर्यं विस्फारितनयना लोकाः पश्यन्ति । ('आंख दिखाना' इति हिन्दीभाषायाम्) ॥ ५२ ॥

उटजपरिसरेषु येऽपि वृद्धाः सुखमुपविश्य जनश्रुतिञ्च नक्तम् ।
श्रुतिविषयमनैषुरादरात्ते बहिरिह दृष्टिपथं न यान्ति कच्चित् ॥

येऽपि वृद्धाः कुटीरद्वारेषु रात्रौ सुखेनोपविश्य लोकोक्तीः प्रेम्णा शृण्वन्ति स्म, ते सम्प्रति तत्र दृष्टिपथमपि न यान्ति ॥ ५३ ॥

शरदि विमलदीधितिर्यदीया शममनयन्नितरां स विश्वविश्वम् ।
तुहिनततितिरोहितस्तमायाः शिशुरिव सीदति शीतरश्मिरङ्के ॥

शरदि यस्य निर्मलकान्तिः विश्वस्मै विश्वाय परां शान्तिमदात् स एव शीतरश्मिर्विधुस्तुषारततिभिश्छन्नस्तमाया रात्रेरङ्के शिशुरिव सीदति ॥ ५४ ॥

हिमहतनलिनीवियोगपीडः सखिकुमुदव्यसनाकुलस्तडागः ।
अलिखगपरिवारमुक्तसङ्गो गतमणिनाग इवाधना न भाति ॥५५॥

हिमैर्हताया नलिन्या वियोगस्य पीडा यस्य सः, परमसुहृदः कुमुदस्य नाशेन दुःखसन्तप्तः, पक्षिभ्रमरपरिवारेण मुक्तसङ्गः तडागो व्यपगतमणिर्नाग इव सम्प्रति शिशिरे न भाति ॥ ५५ ॥

हिमनिकरनिपीडिता युवानो मधु वनिताधरपल्लवात् पिबन्तः ।
स्तनयुगपरिणाहतूलतल्पाः कमपि शमं दधतो निशो नयन्ते ॥५६॥

हिमानीपीडितास्तरुणा वनिताधरात् मध्वासवं पिबन्तः स्तनपरिणाहे तूलतल्पे शयानाः कामपि परां शान्ति दधतो निशो व्यतियन्ति ॥ ५६ ॥

शिशिरशिशिरवातवार्णविद्धा अपि हलिनश्शतपर्वखर्ववस्त्राः ।
निखिलनिशि पलालजालतल्पा असुमिव सस्यमवन्ति वह्निसाक्ष्याः ॥

हलिनः कामं शीतवातवार्णैः कष्टं प्रापिताः शतग्रन्थिलघुवसनाः पलालजालतल्पमाश्रयन्तोऽग्निपुरो निखिलां निशमसुमिव सस्यं रक्षन्ति ।५७॥

अहह विमलमानसा गृहस्थाः सुखमुपविश्य कुटीकृशानुपार्श्वम् ।
अशितमधुरशाकशालिभक्ता न हि गणयन्ति मनाङ्मघोन ऋद्धिम् ॥

मधुरेण शाकेन साकं शाल्योदनं भुक्त्वा कुटचा अग्निपार्श्वे सुखमुपविश्य निर्मलान्तःकरणाः गृहस्थाः शक्रस्यापि समृद्धि किञ्चिदपि न गणयन्ति ॥ ५८ ॥

बटुकुलमपि भस्मभासि भालं किसलयपाणिगृहीतदिव्यदण्डम् ।
अधरपुटविवर्णभावकम्पं स्खलितवचो रटति श्रुति प्रभाते ॥५९॥

भस्मना भासितभालं कोमलकरगृहीतपलाशदण्डं शैत्येनाधरपुटस्य विवर्णतां कम्पञ्च धारयद् वणिकुलं स्खलितवचसा वेदमभ्यस्यति ॥५९॥

कतिपयबटवो ह्यसह्य शैत्याद् रुरुमृगचर्मपिनद्धमध्यभागाः ।
सकलविधिविधानशक्तिहीनाः परुषवचो नितरां गुरोः सहन्ते ॥

असह्यशैत्यात् केचन ब्रह्मचारिणो मध्यभागे मृगचर्म परिधाय सकलस्य विधेः सम्पादनेऽक्षमा गुरोः परुषं वचो नितरां सहन्ते ॥ ६० ॥

तरुततिरतिराजते तुषारै रजतरसोदधिमज्जितेव सद्यः ।
अवनिरपि विभाव्यते समन्ताद् धवलपटा नवयौवनेव वामा ॥६१॥

तुषारै रजतरससागरे सद्यः स्नातेव वृक्षावलिरतिशोभते । समन्तादवनिरपि धृतधवलपटा नवयौवना वामेव विभाव्यते ॥ ६१ ॥

विहगचय उपेतमौनिभावो मुनिरिव पर्णकुटीरमच्छनीडम् ।
निशि तुहीनपयोऽभिषिक्तभागं त्यजति वतोषसि मन्दमन्दमद्य ॥

निशि तुषारवारिभिरार्द्रपरिसरं पर्णकुटीरं मुनिरिव विरतवचा विहगचयः स्वच्छनीडमुषसि मन्दं मन्दं त्यजति ॥ ६२ ॥

अपि किसलयकोमलाः कुमाराः करयुगकल्पितपाशबद्धकण्ठाः ।
अनुनयशतबोधिताः प्रकम्पा अवनितलं न हि यान्ति मातुरङ्कात् ॥

शैत्येन प्रकम्पमानाः कामं कोमलाः कुमाराः करयुगपाशेन गृहीतकण्ठा अनुनयशतेनापि मातुरुत्सङ्गात् भुवस्तलं न यान्ति ॥ ६३ ॥

शिशिरबलमवाप्य पामरामा वसतिसखीसहयोगतः प्रसन्ना ।
क्षणमिव परमां मुदं ददाना रमयति वारविलासिनीव लोकान् ॥

पामा रामा शिशिरबलाद् रात्र्याः सख्याः सह योगतोऽतीव प्रसन्ना क्षणं कण्डूत्पादनेन परमां मुदं ददाना वाराङ्गनेव लोकान् रमयति ॥ ६४ ॥

उपकृतिकरणे समानशीलाः सुरनरपक्षिगणस्य ये कृतज्ञाः ।
हरितकणिशशालिदीर्घशूका अवनितले परितो लसन्ति तेऽपि ॥

सुराणां नराणां पक्षिणाञ्च गणस्योपकारे समानस्वभावाः ये कृतज्ञाः हरितकणा यवाः, तेऽपि परितोऽवनितले लसन्ति ॥ ६५ ॥

हृदयहितकरा मनोज्ञपुष्पा बहुशिमयो दलपुञ्जमण्डितक्ष्माः ।
तुरगबलविवृद्धिपूर्णदक्षा नयनसुखाश्चणका विभान्ति वप्रे ॥६६॥

जनानां हृदयस्य रोगहरा मनोहारिपुष्पाः पत्रसमूहैः पृथिवीं मण्डयन्तो बहुशिमयोऽश्वबलवर्द्धका नेत्रसुखदायकाश्चणकाः क्षेत्रे विभान्ति ६६॥

व्रतातततिविलासिलम्बशिम्बाः प्रथितकृषीबलभूरिभागधेयाः ।
अतिशयमधुराः प्रभूतवाताश्चिपिटकयोगसुधोपमाः कलायाः ॥

लतायां विलसन्त्यो लम्बाः शिम्बा येषु ते, कृषीबलानां भूरिभाग्यं प्रथयन्त्यः प्रभूतवातोत्पादकाश्चिपिटकयोगेन सुधास्वादवोऽतिशयमधुराः कलाया वप्रे विभान्ति ॥ ६७ ॥

अवनियुवतिहृद्यहीरहारा अतिथिविशेषसमादृतौ समर्थाः ।
हलिकृतबहुकर्षभूमिपुष्टाः सुमनभराः क्षितिमौलयो लसन्ति ॥६८॥

अवनेर्युवतेर्मनोरमा हीरकहाराः, अतिथीनां सत्कारे समर्थाः, अनेककृत्वः कृष्टायां भूमौ पुष्टाः, पृथिवीमौलयो गोधूमा अभितो लसन्ति ॥६८॥

करधृतसरलेक्षुवंशदण्डाः क्रकचदलैरतिभीषणस्वरूपाः ।
अतिकृपणदशां कृषीबलानां व्यतिगमयन्ति निरन्तरा हि वप्राः ॥

सघना वप्राः करेण धृतैरिक्षुवंशदण्डैः क्रकचपत्रैः भयोत्पादकस्वरूपैः कृषीवलानां दयनीयां दशां निवारयन्ति ।। ६९ ।।

प्रकृतिविलसितैः समृद्धिसारैर्हलिहृदयोत्सवसीमदारदक्षैः ।
व्यपगतदुरवस्थताविलासः शिशिरऋतुर्विभवैर्विराजतेऽलम् ।।७०।।

हलिनां मनस उल्लासस्य परिधिभेदकैः प्रकृतिसमुद्भवैः समृद्धिसारैः, दूरापास्तदारिद्र्यविलासः शिशिरर्तुः तया तया सम्पदाऽलं विराजते ।।७०।।

शबलदलसिचा विभासमाना श्रुतिसुखमर्मरमेखलानिनादा ।
तुबरसुशिमिकुण्डला ऋतुश्रीः जयति हठात् सुरराजराजलक्ष्मीम् ।।

शबलपत्रवसनैः शोभमाना कर्णसुखकरो मर्मरशब्द एव मेखलानिनादो यस्याः सा, तुबरशिम्बा एव कुण्डले यस्याः सा, तथाभूता शिशिरश्रीः देवराजश्रियं हठात् जयति ।। ७१ ।।

इति शिशिररमां समीक्षमाणं प्रमदभरो दधिमग्नचित्तभानुम् ।
अशनसमय एष सन्निधत्ते प्रियवचना सदनेन्दिरा जगाद ।।७२।।

इत्थं शिशिरस्य शोभां निरीक्षमाणमानन्दसागरे निमग्नं वृषभानुम् 'भोजनसमयः संजातः' इति मधुरभाषिणी गृहलक्ष्मीः कीर्तिर्जगाद ।। ७२ ।।

अथ दिवसपतौ नभोऽर्धभागं गतवति पायसमिष्टभोज्यमन्यत् ।
सविधि शयनमाजगाम भुक्त्वा सुरभिमुखो मृगनाभिनागवल्ल्या ।।

'भोजनसमयः सम्प्राप्तः' इति पत्निवाक्यानन्तरं भगवति भास्वति मध्येनभो गतवति पायसमन्यच्चाभीष्टं भोज्यं सविधि भुक्त्वा कस्तूरी-केसरलवङ्गादिसुरभिद्रव्ययुक्तेन ताम्बूलेन सुरभिमुखः शयनमाजगाम ।।७३।।

इत्थं चराचरजगज्जननादिमूलं
देवर्षिभिः सततवन्दितपादमूलम् ।
गोपाङ्गनाललितगीतविकासिवक्त्रं
तौ दम्पती रमयतो रमणीयतोकम् ।। ७४ ।।

चराचरस्य जगतो जननादिकारणम्, देवर्षिभिः सततं वन्दितं पादमूलं यस्य तत्, गोपाङ्गनानां गीतैर्विकसितमुखं रमणीयं लोकं कीर्तिवृषभानू रमयतः ।। ७४ ।।

काव्योषाहरणप्रबन्धपटुताव्यामुग्धविद्वद्वरा-
नन्तानन्दसरस्वतीपदयुगाम्भोजप्रसादोदयात् ।
विद्वद्वन्दितचन्द्रशेखरबुधात् प्रासूत यं मङ्गला
तत्काव्ये वृषभानुजासमुदये सर्गो गतः पञ्चमः ।। ७५ ।।

सघना वप्राः करेण धृतैरिक्षुवंशदण्डैः क्रकचपत्रैः भयोत्पादकस्वरूपैः कृषीवलानां दयनीयां दशां निवारयन्ति ॥ ६९ ॥

प्रकृतिविलसितैः समृद्धिसारैर्हलिहृदयोत्सवसीमदारदक्षैः ।
व्यपगतदुरवस्थताविलासः शिशिरऋतुर्विभवैर्विराजतेऽलम् ॥७०॥

हलिनां मनस उल्लासस्य परिधिभेदकैः प्रकृतिसमुद्भवैः समृद्धिसारैः, दूरापास्तदारिद्र्यविलासः शिशिरर्तुः तया तया सम्पदाऽलं विराजते ॥७०॥

शबलदलसिचा विभासमाना श्रुतिसुखमर्मरमेखलानिनादा ।
तुबरसुशिमिकुण्डला ऋतुश्रीः जयति हठात् सुरराजराजलक्ष्मीम् ॥

शबलपत्रवसनैः शोभमाना कर्णसुखकरो मर्मरशब्द एव मेखलानिनादो यस्याः सा, तुवरशिम्बा एव कुण्डले यस्याः सा, तथाभूता शिशिरश्रीः देवराजश्रियं हठात् जयति ॥ ७१ ॥

इति शिशिररमां समीक्षमाणं प्रमदभरो दधिमग्नचित्तभानुम् ।
अशनसमय एष सन्निधत्ते प्रियवचना सदनेन्दिरा जगाद ॥७२॥

इत्थं शिशिरस्य शोभां निरीक्षमाणमानन्दसागरे निमग्नं वृषभानुम् 'भोजनसमयः संजातः' इति मधुरभाषिणी गृहलक्ष्मीः कीर्तिर्जगाद ॥ ७२ ॥

अथ दिवसपतौ नभोऽर्धभागं गतवति पायसमिष्टभोज्यमन्यत् ।
सविधि शयनमाजगाम भुक्त्वा सुरभिमुखो मृगनाभिनागवल्ल्या ॥

'भोजनसमयः सम्प्राप्तः' इति पत्निवाक्यानन्तरं भगवति भास्वति मध्येनभो गतवति पायसमन्यच्चाभीष्टं भोज्यं सविधि भुक्त्वा कस्तूरी-केसरलवङ्गादिसुरभिद्रव्ययुक्तेन ताम्बूलेन सुरभिमुखः शयनमाजगाम ॥७३॥

इत्थं चराचरजगज्जननादिमूलं
देवर्षिभिः सततवन्दितपादमूलम् ।
गोपाङ्गनाललितगीतविकासिवक्त्रं
तौ दम्पती रमयतो रमणीयतोकम् ॥ ७४ ॥

चराचरस्य जगतो जननादिकारणम्, देवर्षिभिः सततं वन्दितं पादमूलं यस्य तत्, गोपाङ्गनानां गीतैर्विकसितमुखं रमणीयं लोकं कीर्तिवृषभानू रमयतः ॥ ७४ ॥

काव्योषाहरणप्रबन्धपटुताव्यामुग्धविद्वद्वरा-
नन्तानन्दसरस्वतीपदयुगाम्भोजप्रसादोदयात् ।
विद्वद्वन्दितचन्द्रशेखरबुधात् प्रासूत यं मङ्गला
तत्काव्ये वृषभानुजासमुदये सर्गो गतः पञ्चमः ॥ ७५ ॥

उषाहरणमहाकाव्यस्य रचयितुरनन्तानन्दसरस्वतीमहाराजस्य पदप्रसादस्योदयेन श्रीमङ्गलायां श्रीचन्द्रशेखरबुधाज्जातेन श्रीकालिकाप्रसादशुक्लेन कृते श्रीराधाचरितमहाकाव्ये वृषभानुजासमुदये पञ्चमः सर्गः समाप्तिमगमत् ॥ ७५ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये पञ्चमः सर्गः समाप्तः ॥

षष्ठः सर्गः

धन्यं वृन्दाविपिनं कदम्बलवलीनिकुञ्जनिचितान्तम् ।
यस्मिंस्तमालमाले नृत्यति बाधाहरा राधा ॥ १ ॥

कदम्बैर्लवलीलताभिर्निकुञ्जैश्च व्याप्तं वृन्दावनं धन्यम्, तमालपुञ्जे यस्मिन् बाधाहरा राधा नृत्यति । सर्वत्र आर्याच्छन्दः ॥ १ ॥

कमला संहृतकेशा मधुपः पदाब्जयोर्यस्याः ।
सैवालिन्दे कीर्त्ते रमते राधा रजोवामा ॥ २ ॥

यस्याः राधायाः केशपाशं लक्ष्मीरलङ्करोति, पदकमले मधुपतिर्मधुपायते, सैव धूलिधूसरा राधा कीर्त्तेरालिन्दे रमते ॥ २ ॥

व्रतमाचरितं किन्तद् व्रजवनिताभिः समाहितमनोभिः ।
धूल्या धूसरमङ्कं यासां तनुते परा शक्तिः ॥ ३ ॥

संयतमनोभिर्व्रजवनिताभिः किन्तद् व्रतमाचरितम्, यासां क्रोडं परा शक्तिः श्रीराधा धूलिधूसरं करोति ॥ ३ ॥

अगुणा सुरमहितगुणा योगिभिरगमा जितेन्द्रियगणैर्या ।
तां चेदानीं गावो लिहते घोषै रसनयाऽलम् ॥ ४ ॥

निर्गुणापि देवस्तुतगुणा सत्त्वरजस्तमसां प्रभावशून्यापि दया-दाक्षिण्यगुणसम्पन्ना जितेन्द्रियैरपि या अगम्या, तां सम्प्रति व्रजे गावो रसनाभिरलं लिहते ॥ ४ ॥

अमरान् विधूतकलुषान् व्रजवनितानलिनीपरागलुब्धान् ।
नन्द्यं नन्दनविपिनं न रोचयते कदाचनापि ॥ ५ ॥

व्रजाङ्गनानां पादपद्मपरागे लुब्धान्, अत एव पापान्मुक्तान् देवान् अतीव रमणीयमपि नन्दनवनं न रमयते ॥ ५ ॥

शनकैश्शनकैर्मासानतीत्य कतिचिद् वृषभानुबाला ।
द्वारे मन्दं मन्दं रिङ्गति जान्वोर्बलात् तूर्णम् ॥ ६ ॥

अथ वृषभानुबाला श्रीराधा शनैश्शनैः कांश्चिन्मासान् व्यतीत्य जानुभ्यां द्वारे मन्दं मन्दमितस्ततो गच्छति ॥ ६ ॥

चम्पकवर्णा त्रिभुवनकमना कुटिलालकावृतमुखाभा ।
अवनिं नूपुररसनारावैर्मुखरयति सा सुदती ॥ ७ ॥

त्रिभुवनललामा कुटिलैरलकैः छादितमुखकान्तिः सा सुदती श्रीराधा काञ्चीमञ्जीरध्वनिभिरवनिं शब्दयति ॥ ७ ॥

कुमुदं हृदयं पित्रोः कुन्दमुकुलदशनदीधितिभिरनिशम् ।
शारदविधुमुखकान्त्या विकचञ्च तनोति बरसानौ ॥ ८ ॥

कुन्ददन्तकान्त्या शरच्चन्द्रमुखकान्त्या च कीर्तिवृषभान्वोः कुमुदं हृदयं वरसानौ विकासयति नित्यम् ॥ ८ ॥

ज्योत्स्ना व्रजाङ्गनानां व्रजभूसरसीसरोजिनी सैव ।
स्खलितं वचो यदीयं श्रवणे वर्षति सुधां सततम् ॥ ९ ॥

व्रजवनितानां चन्द्रिका व्रजभुवः सरस्याः सैव कमलिनी, यस्याः स्खलितं वचः कर्णेऽमृतं सततं वर्षति ॥ ९ ॥

धात्र्या द्रुततरगमना प्रयत्नशतेनापि निवार्यमाणा ।
बाह्ये घोषे गेहाद् गवां स्तनं पिबति हि निर्भयम् ॥ १० ॥

धात्र्याऽनेकैः प्रयत्नैर्निरुध्यमानाऽपि गेहाद् बाह्ये प्रदेशे द्रुततरं गच्छन्ती घोषे गवां स्तनं निर्भयं पिबति ॥ १० ॥

उद्याने रममाणा किशोरमद्भुतवर्ष्मरश्मिराशिम् ।
नीपनिलीना किञ्चित् सखीरहस्यं सदा लपति ॥ ११ ॥

उपवने रममाणा कदम्बतरौ निलीना विलक्षणतेजःपुञ्जसंहतं कमपि किशोरं सखीनामपि रहस्यं किञ्चित् सर्वदा लपति ॥ ११ ॥

व्यायामे तं बर्हापीडं वंशीरवेण मुग्धवने ।
नृत्यति निगृह्य भङ्ग्या वातेनेरितकमलिनीव ॥ १२ ॥

तं मयूरपिच्छमुकुटं क्रोडे कृत्वा वंशीध्वनिमुग्धे वने वातप्रेरितकमलिनीव भङ्ग्या वृषभानुजा नृत्यति ॥ १२ ॥

केलौ कलहे कुपितां बालामनुनयति पादयोः पतनैः ।
राधां वाममृगाक्षीं चतुरश्चाटुवचोभिरनिशम् ॥ १३ ॥

कदाचित् केलौ कलहे संजाते कुपितां वाममृगाक्षीं बालां श्रीराधां चतुरः स किशोरः तस्याः पादयोः पतनैः चाटुवचोभिश्च अनिशमनुनयति ॥ १३ ॥

पादे निधाय पादं वंशीरन्ध्रान् पूरयन् सुधाभिः ।
बिम्बाधरस्य राधां नट इव नर्तयति निकुञ्जेषु ॥ १४ ॥

एकस्मिन् पादेऽपरं पादं निधाय बिम्बाधरस्य सुधां वंशीरन्ध्रेषु प्रपूर्य च निकुञ्जेषु नट इव राधां नर्तयति ॥ १४ ॥

कान्तां किसलयकलितां दोलां नीपे बद्धां सुमशय्याम् ।
मधुपा गुञ्जितपार्श्वां राधारूढां स दोलयते ॥ १५ ॥

नवपल्लवैर्निर्मितां नीपे निबद्धां कमनीयां गुञ्जद्द्विरेफपरिवृतां राधाधिष्ठितां पुष्पशय्यां दोलां स बालो दोलयते ॥ १५ ॥

विविधां केलिं रम्यां ललितलतापिहितनीपनिकुरुम्बे ।
बालेन तेन बाला तनुते रतिरिव मदनेन सा ॥ १६ ॥

सा राधा बाला कदम्बतरुसमुदाये निकुञ्जे केनचन बालकेन साकं मदनेन रतिरिवानेकां रम्यां केलिं तनुते ॥ १६ ॥

उद्गीयमानकीर्तिर्निलिम्पदारैः सा शिरीषमृद्वङ्गी ।
अतिनन्दने हि वृन्दाविपिने राजते ज्योत्स्नेव ॥ १७ ॥

नन्दनवनातिशायिनि वृन्दावने देवाङ्गनाभिरपि स्तूयमाना शिरीष-कुसुमकोमला सा राधा चन्द्रिकेव राजते ॥ १७ ॥

कतिचित् समयानतीत्य सेयं लीलासमाप्तिमुपयाति ।
राधा पुनश्च बालाऽस्माभिः संगत्य रमतेऽपि ॥ १८ ॥

सेयं लीला कतिपयसमयानन्तरं समाप्ता भवति । पुनः सा राधा बाला सती अस्माभिः साकमपि रमते ॥ १८ ॥

राधा मनोहराभा ललितकलैव धृतविग्रहा कापि ।
वृन्दाविपिननिकुञ्जे मदयति मन्मथमन्मथं हि ॥ १९ ॥

मनोहरकान्तिः सा राधा शरीरवती कापि ललितकलैव वृन्दावन-कुञ्जे कामदेवादपि कामदेवं मदयति ॥ १९ ॥

विदितालौकिकलीलासारा काचित् सखी जगादेदम् ।
कीर्तिं हरिणापाङ्गीं स्विद्यद्गात्री चकितनयना ॥ २० ॥

स्विद्यन्ती विलोलनयना अलौकिकलीलां जानन्ती काचन सखी हरिणनयनां कीर्तिं पूर्वोक्तं वृत्तान्तं जगाद ॥ २० ॥

चित्रं किमत्र तस्यै कमलाकबरीनिपीडितपदायै ।
यस्याः पादसरोजे सुरपतिरपि किङ्करति सततम् ॥ २१ ॥

श्रियः केशपाशेन नमनसमये पीडितपदायै राधायै किमपि चित्रं नास्ति; यतो हि शक्रोऽपि यस्याः पदकमले किङ्करो भवति ॥ २१ ॥

दृष्टा विभुता तस्या जगती सरसीसरोजवरसानौ ।
कस्या नयनसुधासूः कोऽसौ प्रश्नः समाधेयः ॥ २२ ॥

जगतः सरसः सरोजे वरसानुनगरे बालिकायाः प्रभुता विश्रुतेति नात्र किञ्चिद् विमर्शनीयम्; किन्तु विमर्शस्यायं विषयो यत् कोऽयं कुमारः, किन्नामधेयः, कस्य सूनुरिति ॥ २२ ॥

कौतुकलहरी लोला विदलितलवलीशिरीषमृदुताका ।
कीर्तिर्हि निर्निमेषा प्रमदाश्रुनिरुद्धकण्ठीका ॥ २३ ॥

आश्चर्यचकिता शिरीषपुष्पमृद्वी निर्निमेषदृष्टिरानन्दाश्रुणा रुद्धकण्ठी कीर्तिः परमानन्दं ययाविति परेण सम्बन्धः ॥ २३ ॥

सरसिजशेखरमौलिस्तत्त्वं चाद्वयमभूद् द्विधेति वचः ।
श्रौतं स्मारं स्मारं परमानन्दं ययौ धन्या ॥ २४ ॥

'एकमेव द्विधाऽभूत्' इति श्रुतिवचः स्मारं स्मारं कमलमालाविभूषितवेणिः धन्या कीर्तिः परमानन्दं प्रापत् ॥ २४ ॥

ऋतुराज एष विज्ञे उदैरिरदिति व्रजांगना चान्या ।
मधुमालतीद्वितीयो रसालवल्लरिकिरीटोऽयम् ॥ २५ ॥

'अयि विज्ञे ! आम्रमञ्जरीमुकुटो मालतीद्वितीय एव वसन्तः समागतः' इति काचिद् व्रजाङ्गनाऽगादीत् ॥ २५ ॥

सुरभिनवकुसुममालां करदलपुटके निधाय विपिनश्रीः ।
मधुरैः पिककुलरावैर्व्याहरति स्वागतं सुरभेः ॥ २६ ॥

वनलक्ष्मीः करकिसलयपात्रे सुरभीणां नवानां कुसुमानां मालां संस्थाप्य कोकिलकुलरावैः वसन्तस्य स्वागतं व्याहरति ॥ २६ ॥

गुञ्जन् मधुपावलिभिः परागसुरभिविपिनानिलैर्वामा ।
किसलयसिचं वसाना मदयति वनभूस्तरुणवृन्दम् ॥ २७ ॥

मनोहरा नवपल्लववसनं परिदधती वनभूः गुञ्जतां मधुपानां पंक्तिभिः पुष्परेणुभिः सुरभिणा वनवायुना तरुणवृन्दं मदयति ॥ २७ ॥

कूजितकोकिलवृन्दं मञ्जरीमण्डिते रसालसाले ।
श्रोत्रियमनलाधाने त्वरयति भृशमवसराभिज्ञम् ॥ २८ ॥

मञ्जरीभिरलंकृतेषु रसालेषु समयविज्ञाः कूजन्तः कोकिला विप्रान् अग्नेराधानाय प्रेरयन्ति । 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति श्रुतिः ॥२८॥

मधुपा माकन्दततिषु मधुरं गुञ्जन्ति मञ्जरीं सरसाम् ।
चुम्बन्तो मधुमत्ता विलासिन इव प्रमदवनिताम् ॥ २९ ॥

मधुमत्ता भ्रमरा आम्रवृक्षेषु सरसां मञ्जरीं विलासिन इव नवयौवनां चुम्बन्तो मधुरं गुञ्जन्ति ॥ २९ ॥

विकसत् सरोजिनीनां वदनं चुम्बन् समीरणः कुशलः ।
युवतीनां मददलने यूनां हि कूटनीतिविज्ञः ॥ ३० ॥

कमलिनीनां मुखं चुम्बन् कुशलो वायुः युवतीनां मानभङ्गे युवकानां कूटनीतिज्ञ इव सम्पद्यते । सम्प्रति रामाणां मानभङ्गो भवति ॥ ३० ॥

चम्पककोरकवृन्दं विपिनरमाया विकचकुचमण्डलम् ।
भ्रमरान् विलासिनो हा सन्तापयते दैवहतकान् ॥ ३१ ॥

चम्पकानां कोरकवृन्दं वनलक्ष्म्या विकसितस्तनयुगं भाग्यहीनान् विलासिनो भ्रमरान् हन्त सन्तापयते ! ॥ ३१ ॥

सुमनोमण्डितवल्ली विपिनश्रियश्च केशपाशायते ।
कोरकदलमतिकमनं दशनं दशतीव युवहृदये ॥ ३२ ॥

कुसुममण्डिता लता वनश्रियः केशपाशः, अतिमनोरमं कोरकदलं दशनं यूनां हृदये विध्यतीव ॥ ३२ ॥

प्रमदा रविकरवसना वसन्तकुसुमैः कलितकेशपाशाः ।
मलयानिलपरिदीपितमदना मदनं महीयन्ते ॥ ३३ ॥

रविकरमिव गौरं वसनं दधाना वसन्तपुष्पैर्निर्मितां वेणिं भूषयन्त्यो मलयवायुना कामातुराः स्त्रियो कामदेवं समर्चन्ति ॥ ३३ ॥

हिमनिकरैः परिमृषितां मलिनां नलिनीं निरीक्ष्य तिग्मांशुः ।
नियतं व्यसनं निन्दन् पटुतरकिरणैः समामृशति ॥ ३४ ॥

हिमसमूहेन संस्पृष्टामत एव मलिनां कमलिनीं प्रेक्ष्य सूर्यः नियतकालिकं व्यसनं तिरस्कुर्वन् विशदकिरणैः स्पृशति ॥ ३४ ॥

नवदलवसनं विटपं पुष्पवती माधवी परिष्वजति ।
बाहुप्रतानपाशैः पुलकितनिरवद्यमसृणाङ्गी ॥ ३५ ॥

किसलयवासो वसानं विटपं पुलकिता मनोहरा कोमलाङ्गी पुष्पवती माधवीलता बाहुभिः प्रतानपाशैरालिङ्गति ॥ ३५ ॥

निशिताः शाणोल्लीढा मालत्याः कुड्मला उपवनेषु ।
प्रोषितपतिकाहृदयं भेत्तुं मदनस्य शल्यानि ॥ ३६ ॥

उपवनेषु शाणोल्लीढाः मालत्या निशिताः कोरकाः प्रोषितपतिकाया हृदयं विदारयितुं कामस्य शल्यानीव ॥ ३६ ॥

इष्यानुभाववशगा नयन्ति मुनयो वीतरागहृदयाः ।
नभकिसलयवसनायाः प्रकृतेः सुषमां गोविषयताम् ॥ ३७ ॥

वसन्तस्यानुभावेन पराधीना वीतरागा मुनयोऽपि नवकिसलय-वसनं वसानायाः प्रकृतेः शोभां नयनविषयतां नयन्ति ॥ ३७ ॥

वन्या अपि प्रणयिनः सुरभेरतुलप्रभावफलपुष्पैः ।
हरिणो रमयति हरिणीं विविधकेलिकलापैरनिशम् ॥ ३८ ॥

वसन्तस्यासीमप्रभावैः फलपुष्पैर्मृगो मृगीं विविधाभिः केलिभि-रनिशं रमयति ॥ ३८ ॥

मुनिजनमानसविमले सरसिजलसिते खगावलिविलसिते ।
सुरभिणि तडागनीरे सुखमवगाहते युवतिततिः ॥ ३९ ॥

मुनीनां मानस इव निर्मले कमलैर्लसिते खगगणविलसिते सुरभि-सरोजले युवतिवृन्दं सुखमवगाहते ॥ ३९ ॥

तरुराजिरालि अधुना सुमनोहारैर्मनोहरावयवा ।
किसलयवासो दधती मुञ्चति पीतपर्णवासश्च ॥ ४० ॥

सखि, सम्प्रति किसलयवस्त्रं दधाना पीतपत्रजीर्णवासो मुञ्चन्ती पुष्पाणां हारैः मनोहरावयवा तरुराजिः शोभत इति शेषः ॥ ४० ॥

गोधूमकनकमुकुटा लसदतसीकुसुमालिपत्रलेखा ।
सर्षपशिमिताटङ्का धरणी रमणीव रमणीया ॥ ४१ ॥

गोधूमवल्लरिं मुकुटं दधाना शोभमानान्यतसीकुसुमान्येव पत्रलेखाः कपोले दधाना कमनीया कामिनीवावनिर्विभाति ॥ ४१ ॥

विलपति हैमनकुसुमं विहसति कुसुमाकरेण वासन्ती ।
प्रभवति विधिर्विधातुं सकलं प्रतिकूलमनुकूलम् ॥ ४२ ॥

हेमन्तोद्भवानि पुष्पाणि विलपन्ति, वासन्ती वसन्तेन सह विहसति, विधिः सकलमनुकूलं प्रतिकूलं प्रतिकूलञ्चानुकूलं विधातुं प्रभवति ॥ ४२ ॥

सस्यानि यानि शिशिरे हरितदलललितसुमान्यमोदिषत ।
शातितदलानि तानि क्षेमे सीदन्ति कालेन ॥ ४३ ॥

शिशिरर्तौ हरितपत्रैर्मनोहरपुष्पैश्च यानि सस्यानि मोदमानान्यासन्, गलितपत्राणि तान्येव सम्प्रति केदारे सीदन्ति ॥ ४३ ॥

नूतनवसना ललनाः कमना नयनजितनलिनलक्ष्मीकाः ।
कबरोच्चुम्बितजघनाः कञ्चुककवलितकुचोत्सेधाः ।। ४४ ।।

नवीनवसनावृताः, नयनैः पराजिता नलिनलक्ष्म्यो याभिस्ताः, जघनावधिकेशपाशाः, कञ्चुकैर्मर्दितं कुचयोरौन्नत्यं याभिस्ताः, सौन्दर्यशालिन्यो युवतयो विभान्तीति शेषः ।। ४४ ।।

लक्षितवधूटचिह्ना मदनासवविलसितशरीरभागाः ।
विकसितजघनाभोगाः शेषितहंसीगताभिख्याः ।। ४५ ।।

यासां यौवनचिह्नानि लक्ष्यन्ते, मदनमदेन शरीरभागा विलसन्ति, यासाञ्च जघनविस्तारो विकसति, याश्च हंसीगतियशो विशिषन्ति, ता व्रजबाला होलाकां दीव्यन्तीति परेणान्वयः ।। ४५ ।।

अञ्चलपिनद्धरशनास्थानाः कच्छाकदर्थितारोहाः ।
सिन्दूरभासिभालास्त्रिवलीवल्लितयुवव्राताः ।। ४६ ।।

यासां कटिप्रदेशा अञ्चलैर्दृढं बद्धाः, यासां कच्छाभिरारोहाः कदर्थिताः, सिन्दूरैर्यासां भालानि भासन्ते, यासां त्रिवलीभिः युवानो बध्यन्ते, ता व्रजबाला होलाकां दीव्यन्ति ।। ४६ ।।

अतिरतयोऽपि युवतयो मधुमदपाटलकपोलनयनाभाः ।
करतलगृहीतदण्डाः सेनाः सुरभेर्हि वरसानौ ।। ४७ ।।

मधुना रक्तकपोलनयनाः करे दण्डानादाय रत्यपेक्षया सुन्दर्यो युवतयो वरसानुनगर्यां वसन्तस्य सेना इवाभान्ति ।। ४७ ।।

नीपनिवारिततापे सुरभिवनानिलनिषेवितपरिसरे ।
वैणवलगुडाघातं भङ्ग्या दीव्यन्ति होलाकाम् ।। ४८ ।।

प्रवहति सुरभौ वनानिले कदम्बानां शीतलच्छाये युवानो युवतयश्च वेणुदण्डैर्लगुडाघातपुरस्सरं होलाकोत्सवं कुर्वन्ति ।। ४८ ।।

विजितमदना युवानः शिखण्डमण्डितकिरीटमूर्द्धानः ।
नन्दग्रामाभीराः कलितललितपुष्पदामानः ।। ४९ ।।

येषां मूर्द्धसु शिखण्डिशिखाभिर्भूषिताः किरीटाः सन्ति, कण्ठेषु ललितानां पुष्पाणां दामानि सन्ति, तथाभूता नन्दग्रामस्यातिकामास्तरुणा होलाकां दीव्यन्ति ।। ४९ ।।

ओदरलम्बितपेश्यां सम्भृतमदनानुरागभररागाः ।
आप्रपदीनक्षौमावदातधौतजितविधुभासः ।। ५० ।।

उदरपर्यन्तं लम्बितायां पेश्यां कामानुरागरूपं रागं निधाय गुल्फं यावत् समुज्ज्वलं धौतं क्षौमं परिधाय तरुणा होलाकां दीव्यन्ति ॥ ५० ॥

हस्तागृहीतफलका धीरललितगतिविमुग्धरमणीकाः ।
मन्दस्मितदशनाभाविभासितकदम्बतरुमालाः ॥ ५१ ॥

तदा हस्तैः फलकानि गृह्णतां यूनां धीरललितगतिभिः युवतयो मुग्धा अभवन्, मन्दस्मितानां दशनाभाभिः कदम्बतरवो विद्योतमाना आसन् ॥ ५१ ॥

मधुनाऽलसमुखनयना होलागीतैं भङ्ग्या मण्डलिताः ।
गाते पङ्क्तौ बद्धा राजितरसराजपदशय्यम् ॥ ५२ ॥

मदपानेनालसमुखेक्षणा भङ्ग्या गोलाकाराः पंक्तिबद्धाः नन्दग्राम-गोपाः श्रीकृष्णलीलासम्बद्धं होलागीतं गाते ॥ ५२ ॥

राधामाधवकेतुं निखाय मध्ये व्रजाङ्गना दीपैः ।
कुङ्कुमकृत्रिमधूपैर्मलयजसुमयक्षकर्दमैश्च ॥ ५३ ॥

राधामाधवाङ्कितं ध्वजं मण्डलमध्ये संस्थाप्य गोप्यो दीपैः, कुङ्कुमैः कृत्रिम(लोहवान)धूपैः पुष्पचन्दनयक्षकर्दमैश्च समर्च्येति परेणान्वयः । कर्पूरागरकङ्कोलस्तूरीचन्दनद्रवाणां मिश्रणेन जातो लेपविशेषो यक्षकर्दमः ॥

पिष्टातवासयोगैर्वासन्तीमालतीबकुलहारैः ।
धीताऽविनीतभावाः समर्च्य सुरवन्द्यवन्द्यं हि ॥ ५४ ॥

अतीव विनीता व्रजाङ्गना वासन्तीमालतीबकुलपुष्पाणां मालाभिः, अन्यैश्च सुरभिचूर्णैः सुरवन्द्यवन्द्यं राधामाधवकेतुं समर्च्यार्यापद्यैः स्तुवन्ति ॥

मौलिन्यस्ताञ्जलयोऽवनिपातितवसनवामनलकीलाः ।
मृद्वीकारसमधुरैरार्यापद्यैः स्तुवन्ति तम् ॥ ५५ ॥

मस्तकन्यस्ताञ्जलयः पातिताञ्चलवामजानवो गोपाङ्गना द्राक्षारस-मधुरैरार्यापद्यैः तं केतुं स्तुवन्ति ॥ ५५ ॥

वरसानुभानुबाले यौवनविलसितशरीरसम्पत्ते ।
नन्दग्रामटिकागोधूल्या धूसरशिशौ रससे ॥ ५६ ॥

'सदा द्वादशवर्षीया' इति पुराणवचनात् यौवनलसितशरीरे, वरसानुभानुबाले हे राधे लघुनन्दग्रामस्य गवां धूल्या मलिने बाले त्वं रमसे इति विनिमयम् ॥ ५६ ॥

गोचरभूमिं प्रातर्गच्छति सायं निवर्तते नित्यम् ।
योनलपौलिं तक्रं भुङ्क्ते शेते स च श्रान्तः ॥ ५७ ॥

प्रतिदिनं प्रातर्गोचरभूमिं याति, सायञ्च ततो निवर्तते, तक्रेण योनलपौलिं (ज्वाररोटी) भुक्त्वा श्रान्तश्च शेते ॥ ५७ ॥

त्वं वा मृणालपाणिर्लगुडकरं तं कथं समाश्लिष्येः ।
कुङ्कुमलिप्तशरीरं तदीयरजसा किं मलिनयेः ॥ ५८ ॥

कामं कोमलपाणिस्त्वं दण्डधारणेन कर्कशकरं तं कथमालिङ्गेः ! कश्मीरजलेपेनानुविद्धं स्वशरीरं तदीयरजसा कथं मलिनीकुर्याः ॥ ५८ ॥

मृगमदमलयजपत्रं कलया कलितं कपोलयोर्भाले ।
गोमयगन्धिकराभ्यां लम्पटबालोऽपि मृद्नीयात् ॥ ५९ ॥

कपोलयोर्भाले च कलया कस्तूरिकया चन्दनेन च निर्मितं पत्रं लम्पटो बालोऽपि गोमयगन्धिकराभ्यां मृद्नीयात् ! ॥ ५९ ॥

ललनाललितपदावलिं चारु नर्म निशम्य हि युवकवृन्दम् ।
प्रतिविदधाति वचोभिर्निरुपममाधवयशःपुञ्जैः ॥ ६० ॥

व्रजाङ्गनानां ललितपदलसितं मनोहरं परिहासं श्रुत्वा नन्दग्रामतरुणा निरुपमैर्माधवस्य यशःपुञ्जैर्वाक्यैः प्रतिविदधते ॥ ६० ॥

सख्यः सोऽयं बालो मर्दितमदनकमनीयताविमदः ।
स्पृहयति कमला सततं नवनीरदकान्तये यस्मै ॥ ६१ ॥

हे सख्यः, कामस्यापि सौन्दर्यमदस्यापहन्ता सोऽयं बालः, यस्मै नवजलधरकान्तये कमलापि सततं स्पृहयति ॥ ६१ ॥

नन्दग्रामो नन्द्यः सुरपतिनापि हि काम्यते युवतयः ।
अन्वर्थतां गतोऽयं निरतिशयानन्दसन्दोहः ॥ ६२ ॥

हे युवतयः, सकलानन्दैकाश्रयोऽभिधनानुरूपगुणो नन्दनीयो नन्दग्रामः सुरपतिनाऽपि काम्यते ॥ ६२ ॥

नन्दनविपिनं रम्यं तनुते न मुदं निलिम्पवनितानाम् ।
माधवमुरलीरासं मधुरं सततं पिबन्तीनाम् ॥ ६३ ॥

माधवस्य वंशीरसं पिबन्तीनां सुराङ्गनानां रम्यं नन्दनवनं मुदं न तनुते ॥ ६३ ॥

धूलिश्चन्दनचूर्णमलयजरसतामुपैति गोमयं च ।
ययोर्महिम्ना तत्त्वं विरला जानन्ति विद्वांसः ॥ ६४ ॥

नन्दग्रामस्य धूलिश्चन्दनचूर्णिः, गोमयश्च मलयजरसः, ययोर्माहात्म्येन केचनैव विद्वांसस्तत्त्वं विदन्ति ॥ ६४ ॥

आभीरवामनयना यौवनमत्ताः सुधाञ्जनशलाकाः ।
हृदयकठोरा हृद्यं रसराजं कथं विद्यात ॥ ६५ ॥

हे यौवनमत्ता गोपाङ्गना अमृताञ्जनशलाकाः कठोरहृदयाः, हृद्यं माधवं कथं जानीयात ! ॥६५ ॥

व्यसने भूत्या कलिते गहने विपिने सुरम्यहर्म्ये वा ।
कान्तं मनोऽनुकूलं रामा रमयन्ति नो वामाः ॥ ६६ ॥

गहने वने व्यसने ऐश्वर्यसम्पन्ने प्रासादे वा मनोऽनुकूलं कान्तं रामा रमयन्ति, किन्तु वामा न रमयन्ति ॥ ६६ ॥

तस्मात् कपोलपाली चुम्बितुमधरं पातुमनुजानीत ।
वयमिह दासा बाला वोऽधुना पादेषु पतामः ॥ ६७ ॥

हे बालाः, तस्मात् कपोलौ चुम्बितुम्, अधरपल्लवं पातुश्चानुमतिं दद्यात । अधुना वयमिह दासा भवतीनां पादेषु पतामः ॥ ६७ ॥

लगुडांश्चुम्बत धृष्टा योनलभक्षणकठोरकृष्णोष्ठाः ।
खदिराः पिबन्ति लवलीरसं मधुरं न कदापि कामान्धाः ॥ ६८ ॥

योनल(ज्वार, बाजरा, वजरी)भक्षणेन कठोरः कृष्णश्चोष्ठो येषां ते, तथाभूता हे धृष्टाः, लगुडान् चुम्बत । अरे कामान्धाः, लवलीनां लतानां मधुरं रसं खदिराः कदापि न पिबन्ति ॥ ६८ ॥

स्मेराननयनास्ते फलके यष्टिप्रहारमपि तासाम् ।
सहमानाः पुनरूचुः स्वीकुरुतार्याः परं प्रणयम् ॥ ६९ ॥

प्रहसन्मुखनयना गोपाः फलके (ढाल) लगुडप्रहारं सहमाना अपि 'हे आर्याः, परं प्रणयं स्वीकुरुत' इत्यवोचन् ॥ ६९ ॥

कराः कठोरा नूनं कठोरहृदये लसन्तु युष्माकम् ।
इष्टेनेष्टं विज्ञा नियोजयन्तः सदा दृष्टाः ॥ ७० ॥

भवतीनां कठोरहृदयेऽस्माकं नूनं कठोराः करा विलसन्तु । योग्येन योग्यं संयोजयन्तो विज्ञाः सदा प्रेक्षिताः ॥ ७० ॥

मधुरासवरसकुम्भं रसानभिज्ञा ग्रहीतुमपि नालम् ।
कपयो विरुद्धगतयो हन्त शृङ्गवेरकभक्षणे ॥ ७१ ॥

हे गोपाः, रसानभिज्ञा मधुरासवसम्भृतं घटं ग्रहीतुमपि असमर्थाः। आर्द्रकभक्षणे कपयो विरुद्धां गतिमाश्रयन्ते। ('बन्दर क्या जाने आदी का स्वाद' इति जनश्रुतिः) ॥ ७१ ॥

परिणाहिपक्वविल्वो वायसमोदाय कल्पते नैव।
कुम्भो वसनैः पिहितो भ्रमयति मूढान् कथं भवतः ॥ ७२ ॥

अरे हलकर्षकाः, विशालः पक्वो विल्वो वायसानामानन्दाय न भवति। ('पका भी वेल कौआ के किस काम' इति जनश्रुतिः।) वस्त्रैराच्छादितोऽपि कुम्भो मूढान् भवतः कथं भ्रमयति ! ॥ ७२ ॥

मधुराधररसपाने का वो हानिर्वराङ्गमत्तानाम्।
किं मालती कदाचिन्मधुपान् वारयति मधुलुब्धान् ॥७३॥

अयि गोपाङ्गनाः, वराङ्गमत्तानां भवतीनामधरस्य मधुररसपाने का हानिः ! मधुलोलुपान् भ्रमरान् मालती कदाचित् वारयति किम् ! ७३॥

मधुरं रसितुं लपनं निर्मायागच्छत लपनं मधुरम्।
द्राक्षासारं पातुं राजतचषको न हि मृन्मयः ॥ ७४ ॥

अयि गोपाः, मधुरं रसं पातुं मधुरं मुखं निर्मायागच्छत ! मृद्वीकारसं पातुं रजतमयश्चषकोऽपेक्ष्यते, न हि मृन्मयः ॥ ७४ ॥

वरसानोव्रजललना ललितं लीलावचः प्रयुञ्जानाः।
नन्दग्रामाभीरा जयन्ति होलोत्सवैः सुरभौ ॥ ७५ ॥

ललितं लीलावचः प्रयुञ्जाना वरसानोव्रंजाङ्गना नन्दग्रामस्य गोपाश्च वसन्ते होलाकोत्सवैर्जयन्ति ॥ ७५ ॥

जगदुत्सवस्य हेतुस्तरणिर्वरसानुहोलाकोत्सवैः।
पूतं नयनं पवितुं विलम्बते हि क्षणं चित्रम् ॥ ७६ ॥

उदिते यस्मिन् लोकः उत्सवे प्रवर्तते, सोऽपि भगवान् भास्वान् वरसानुहोलाकोत्सवैः पवित्रमपि स्वनेत्रं पवितुं क्षणं विलम्बते इति चित्रम् ॥ ७६ ॥

यासां रजांसि पदयोः सनकादिसिद्धाः
शक्रादयः सुमनसः स्पृहयन्त्यजस्रम्।
यासामुदात्तचरितं हि शुकेन गीतं
ताश्चिन्तयामि मधुसूदनभक्तगोपीः ॥ ७७ ॥

यासां पदधूलिं सनकसनन्दनप्रभृतयो मुनयः, इन्द्रादिदेवाश्च सततं कामयन्ते, यासाञ्चोदात्तचरितानि शुकेन गीतानि, ता मधुसूदनपादानुरक्ता व्रजाङ्गना मनसा चिन्तयामि ॥ ७७ ॥

सुरमुनिखगगीतो मङ्गलं मङ्गलानां
व्रजविपिनधरायास्तत्त्वमेकं रहस्यम् ।
व्रजजननजनानां भागधेयश्च मूर्त्तं
जयतु जयतु राध्यो दिव्यहोलोत्सवोऽयम् ॥ ७८ ॥

मङ्गलानामपि मङ्गलं व्रजभुवोऽद्वितीयं रहस्यतत्त्वं व्रजवासिनां सविग्रहं भागधेयश्च सुरैर्मुनिभिः खगैश्च कीर्तितो राधनीयोऽयं होलाकोत्सवो विजयताम् ॥ ७८ ॥

विद्वद्वन्दितचन्द्रशेखरसुधीः श्रीमंगला मंगला
माता यं सुषुवे प्रसादलसितं श्रीकालिकाख्यं द्विजम् ।
दिव्यश्रीवृषभानुजार्चनपरे श्रीजानकीजानिना
काव्ये तेन कृते समाप्तिमगमत् षष्ठश्च सर्गोऽधुना ॥ ७९ ॥

यस्य पिता श्रीचन्द्रशेखरः, माता च श्रीमङ्गला, पत्नी च श्रीजानकी, तस्य श्रीकालिकाप्रसादशुक्लेन रचितस्य श्रीराधाचरितमहाकाव्यस्य षष्ठः सर्गः समाप्तिमगात् ॥ ७९ ॥

इति देवरियामण्डलान्तर्गत (देवपुरी) कुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्त-
शब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन
प्राप्तस्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यातसम्पा-
दितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये षष्ठः सर्गः समाप्तः ॥

सप्तमः सर्गः

धरणीमतीव रमणीं लताचयैर्वसनैः प्रवालसुमनोभरैस्तदा ।
अवलोकयज्जगदहो चराच रसवारिधावतितरां वगाहते ॥ १ ॥

लताभिः प्रवालैः पुष्पैश्च वस्त्रैरतिरमणीं विलोकयत् चराचरं जगद् रससमुद्रे कामं निमज्जति । 'सजसा जगौ भवति मञ्जुभाषिणी' इति लक्षणादत्र मञ्जुभाषिणीच्छन्दः ॥ १ ॥

अतुलानुभावसुमसज्जितान्तरे हृदये प्रदावजनको वियोगिनाम् ।
अनुभूयते सुरभिमारुते वने मदनप्रियः स सुरभिः समागतः ॥ २ ॥

वसन्तस्यासदृशेनानुभावेन कुसुमैः सज्जिते सुगन्धिपवनसंचारे वने वियोगिनां हृदयस्य दवाग्निः कामसखो वसन्तः समागत इत्यनुभूयते ॥२॥

अतिमुक्तचम्पकवने सरोजिनीवदनासवेन मुदितः समीरणः ।
दयिताः प्रियाङ्कशयने निषेवते शयिता रतिश्रमनिदाघभूषिताः ॥

अतिमुक्तानां चम्पकानाञ्च वने पद्मिनीनां मुखपरागैः प्रसन्नः पवनः पत्युरङ्के रतिश्रमजन्यस्वेदाः शयिता दयिताः सेवते ॥ ३ ॥

नगरं महार्हमणिमण्डनायितं सदनं वरारकनिबद्धकुट्टिमम् ।
अभिलाषमात्रसमुपात्तवाञ्छितं वरसानुपत्तनसमीप उद्गतम् ॥४॥

केवलाभिलाषमात्रेण वाञ्छितस्य सकलस्य वस्तुनो दायकं महामूल्यैः मणिभिर्मण्डितं हीरकनिर्मितकुट्टिम(फर्श)युक्तं सदनं नगरञ्च वरसानोः समीपे समुद्गतम् ॥ ४ ॥

अमरप्रमोदजनकं श्रिया बुधा इह नन्दसंवसथमामनन्त्यमुम् ।
मुनयोऽपि वीतरजसो रजोलवं स्पृहयन्ति सादरहृदो मुदा सदा ॥५

श्रिया देवानामप्यानन्ददायकममुं बुधा नन्दग्रामं कथयन्ति । वीतरजसोऽपि मुनयोऽत्यादरमनसोऽत्र सदा मुदा रजोलवं कामयन्ते ॥ ५ ॥

अधरीकृतेन्द्रसदनं निसर्गतो व्रजवल्लवीबदनचन्द्रमण्डितम् ।
सरसि व्रजे किमपि कान्तपङ्कजं प्रशशास नन्दनृपतिर्गवांपतिः ॥

स्वभावतः शक्रस्य भवनेषु तिरस्कारमावहन्तं व्रजाङ्गनानां वदनविधुभिरलंकृतं व्रजे सरसि कान्तमद्भुतं कमलमिव नन्दग्रामं गोस्वामी राजा नन्दः शासितवान् ॥ ६ ॥

मधुराकृतिर्विजितमन्मथस्मयो नवयौवनोल्लसितवामविग्रहः।
शमितान्तरारिनिवहो विभावसू रमणीमुषामिव यशस्विनीमगात्॥

मनोहरया शरीरश्रिया कामजित् नवयौवनस्योद्गमेन सुन्दरशरीरः कामक्रोधादिरिपुहन्ता सूर्य उषामिव यशोदां रमणीं समुद्वाह ॥ ७ ॥

कमनीयताजितरमाभिरामता मृदुताविमर्दितमृणालमार्दवा।
कमनाकुलोचितगुणा महीपतेर्गृहिणी कलेव समभूत् कलानिधेः॥

सौन्दर्येण श्रियः कमनीयता यया जिता, मार्दवेन मृणालस्य मृदुता यया जिता, कुलानुरूपदयादाक्षिण्यसम्पन्ना सा यशोदा कलानिधेः कला इव महीपतेर्नन्दस्य भार्याऽभूत् ॥ ८ ॥

प्रकृतिप्रकीर्तितनयो मतः सतामनुभूतयौवनसुखं यशोदया।
तरुराजिराजितकलिन्दनन्दिनीपुलिनं विहर्तुमगमद् व्रजाधिपः॥

सतामभीष्टः प्रजाभिः प्रशंसितनीतिः पत्न्या यशोदया साकं यौवनानन्दमनुभवन् व्रजाधिपो नन्दः तरुपङ्क्तिभिः शोभितं यमुनायास्तीरं विहर्तुमगच्छत् ॥ ९ ॥

तिमिकेलिदर्शनसुखोत्कमानसः प्रिययातिकातरदृशा समीक्षितः।
निजवंशनीरधिमणिर्व्यचिन्तयन्मम सद्म सूनुसहितं भवेदपि ॥१०॥

तदा कलिन्दगिरिनन्दिनीनिर्मलनीरे तिमिराजस्य केलिं पश्यन् समुत्कण्ठितहृदयो यशोदया कातरदृष्टया विलोकितो नन्दराजो व्यचिन्तयत् यद् ममापि गेहं सूनुसहितं स्यात् ॥ १० ॥

इति चिन्तयन् शिशुमहो व्रजाधिपो मुरलीनिपीतमधुराधरामृतम्।
वपुषा विनिन्दितधनं महोज्ज्वलं वनमालया हि लसितं व्यलोकयत्॥

इत्थं स्वानपत्यतां चिन्तयतो व्रजाधिपस्य पुरो वंशीनिपीतमधुराधरामृतो घनश्यामो महातेजस्वी वनमालामण्डितः कश्चन शिशुः समुपस्थित इत्याश्चर्यम् ॥ ११ ॥

शिशुमद्भुतं कुतुकिनौ तमूचतुः कतमत् कुलं जनुषा प्रदीपितम्।
कतमाङ्कमङ्गरजसा वतंससि कतमाख्यया शिवजने सुगीयसे॥

कुतूहलवन्तौ तौ दम्पती तमद्भुतं बालं जगदतुर्यत् स्वजनुषा कतमत् कुलं त्वया समुज्ज्वलितम्, कस्य क्रोडं स्वाङ्गरजसा त्वं भूषयसि, हे शिवजने, केन नाम्ना त्वं व्यवह्रियसे ॥ १२ ॥

वचनं सुताभिलषितं सुधाशयं कलयञ्जगाद मृदु वृद्धदम्पती।
नमतं कलिन्दगिरिनन्दिनीं शिशुः सुतपूतसद्म युवयोर्भविष्यति॥

पुत्रोद्गमं पुत्राभिलाषलसितं वचनं शृण्वन् वृद्धौ यशोदानन्दौ शिशुः स मृदु जगाद यत् युवां कालिन्दीं नमस्कुरुतम्, युवयोः सद्म सुतसंभृतं भविष्यति ॥ १३ ॥

अनघं प्रफुल्लवदनं घनद्युतिं कुटिलालकं नलिनवामलोचनम् ।
अरविन्दलक्ष्म लसितक्रमं युवां कमनं कुमारभवनौ हि पश्यताम् ॥

दोषशून्यं समुज्ज्वलमुखं मेघकान्ति कुटिलकेशं नलिनसुन्दरनयनं कमलचिह्नयुक्तपादयुतं कमनं कुमारं भूमौ रममाणं युवामवश्यं पश्यतम् ॥ १४ ॥

जगतां निवासमथ यं श्रुतिर्जगौ स हि नन्दनन्दनतया व्रजं गतः ।
प्रभवोऽपि भक्तिवशगाः स्ववैभवं जहतीति भक्तिपदतोऽपि सिद्ध्यति ॥

यं परमपुरुषं जगतां निवासं श्रुतिर्जगाद—'यतो व इमानि भूतानि' इति, स सम्प्रति नन्दनन्दनः सन् व्रजं भूषयति । भक्तिवशीभूताः प्रभवोऽपि स्वस्य विभुत्वं परित्यजन्ति । दृष्टमेतत् भीष्मप्रतिज्ञायाम् । भक्तपदस्य व्युत्पत्त्याप्येतत् सिद्ध्यति । भज्यते सेव्यत इति कर्मणि क्तः । परां भक्तिं प्राप्तो जनो भगवतैव सेव्यते । दृष्टा च सेवाऽर्जुनस्य रथसारथित्वेन भगवतः श्रीकृष्णस्य ॥ १५ ॥

परशक्तिसंभृतशिवेन्द्रवन्दितः पृथुकोऽप्यसौ व्रजमहीशशासितः ।
व्रजवल्लवीमृदुकराब्जलालितः परभक्तिवैभवमिदं हि राजते ॥

परमाश्चर्यमिदं यत् शिवेन्द्रप्रभृतिभिर्देवैः वन्दितोऽपि शिशुः सन् श्रीनन्देन शासितः, व्रजाङ्गनाभिः मृदुकरेण लालितः । सर्वमिदं भक्तेर्माहात्म्यम् ॥ १६ ॥

निगमं स्वकं विजहन् मधो रिपुः स्वजनस्य रक्षितुमहो उदायुधः ।
अयते प्रगे दितिसुतं रसातले परभक्तिवैभवमिदं हि राजते ॥१७॥

स्वां प्रतिज्ञां विहाय भीष्मप्रतिज्ञां पूरयितुं शस्त्रं गृह्णन् भगवान् श्रीकृष्णो पाण्डवान् रक्षितवानिति पराया भक्तेर्माहात्म्यम् ॥ १७ ॥

अधिनन्दनन्दनमहोत्सवं सुरा असुरा नराश्च दयिताभिरावृताः ।
कमनीयवेशकमना मृदुस्वना गुरुतां व्रजस्य महतीं मुदा जगुः ॥

नन्दनन्दनस्य पुत्रोत्सवे देवा दैत्या मनुष्याश्च दयिताभिः सह कमनीयवेशा मधुरस्वरेण व्रजस्य महिमानं मुदा जगुः ॥ १८ ॥

मुनयो विनेयवचनात्सुतोत्सवं श्रुतिभिर्निपीय मुदिता व्रजोत्सुकाः ।
श्लथदुत्तरीयचरणास्त्वरातुरा व्रजराजराजभवनं समागताः ॥

आश्रमनिवासा मुनयोऽपि शिष्येभ्यः पुत्रोत्सवं श्रुत्वा प्रसीदन्तः व्रजं गन्तुं सोत्काः पतदुत्तरीयाः श्लथच्चरणा अतित्वरया नन्दस्य राजभवनं समागताः ॥ १९ ॥

यदुवंशकौस्तुभमणेः शिशोर्महे परमर्षिगर्ग इतवान् महर्षिभिः ।
शुभजातकर्ममिषतः सविग्रहं परतत्त्वमीक्षितुमहो महोज्ज्वलः ॥

यदुवंशोदधौ कौस्तुभमणेर्बालकस्य महोत्सवे शुभजातकर्मसंस्कारे महातेजस्वी महर्षिभिः साकं मुनिर्गर्गोऽपि जातकर्मकरणव्याजतः परमं तत्त्वं सविग्रहं समीक्षितुं गतवान् ॥ २० ॥

मुनिमण्डलेन महिते मणेर्गृहे स्फटिकोपलै रचितकुट्टिमावनौ ।
उपविश्य हीरकवरासनं मुनिः कलिकाल 'कृष्ण' इति नाम सञ्जगौ ॥

स्फटिकमणिबद्धभूमिके मुनिभिः शोभिते मणिसदने हीरकनिर्मिते श्रेष्ठासनं समुपविश्य मुनिः पापघ्नं 'कृष्ण' इति नाम संकीर्तितवान् ॥२१॥

मुनयः समाधिमनसः सुधोपमं श्रुतिसारसत्यचिदनन्तवाचकम् ।
अभिधानमानतजटाश्च मेनिरे श्रवणैर्निपीय वचनैर्हि साधुभिः ॥

समाहितमनस्का मुनयोऽमृतसमं वेदप्रतिपाद्यसिद्धान्तसारस्य सच्चिदनन्तस्य वाचकं 'कृष्ण' इति नाम श्रवणैर्निपीयादरेण श्रुत्वाऽऽनतशिरस्काः साधुभिर्वचनैः साधुवादैः स्वीकृतवन्तः ॥ २२ ॥

मुनिकल्पनन्दकलितार्चनो मुनिर्निपुणं निरीक्ष्य शिशुराशिजं फलम् ।
वदितुं समाहितमनाः समादरात् समबोधयन् मुनिजनान् सुरानपि ॥

मुनिकल्पेन नन्देन पूजितो गर्गः शिशुराशिजं फलं निपुणं निरीक्ष्यादराद् गदितुं समाधिस्थः सुरान् मुनींश्चावादीत् ॥ २३ ॥

मनसोऽपि युक्तमनसो विकर्षणादमृताशनस्य मनोऽपि नन्दनात् ।
विपुलस्य सर्वजगतोऽपि कारणाद् विबुधैश्च कृष्ण इति संवदिष्यते ॥

युक्तयोगिनामपि मनस आकर्षणात्, सुराणामपि मनसः प्रसादकरणात्, महतः सकलजगतः कारणात् उत्पत्त्यादिहेतोः पण्डिताः 'कृष्ण' इति नाम्ना व्यवहरिष्यन्ति ॥ २४ ॥

यस्यां प्रकाशत इदं महदादितत्त्वं
संलीयते विधिवशादुपभुक्तभोगम् ।
तस्याः प्रकृत्यपरसंज्ञकमूलमाया
धन्यो धवोऽयमिति 'माधव'संज्ञकोऽपि ॥ २५ ॥

यस्यां जगदिदमुत्पद्यते, अदृष्टवशाद् भुक्तभोगञ्च लीयते, तस्याः प्रकृत्यपरनाम्न्या मायाया अयं धन्यो धवो भविष्यति, अतोऽयं माधवपदेन व्यपदेक्ष्यते ।। २५ ।।

देवाङ्गनाकरसरोरुहसेविताङ्घ्रेः
तस्याश्चितो विविधकर्मफलप्रदायाः ।
नित्यः पतिः सकललोकहिताय जातो
लक्ष्मीपतिं व्यवहरिष्यति तं बुधोऽतः ।। २६ ।।

सुराङ्गनायाः करकमलैः पूजितपादायाश्चिद्रूपाया लक्ष्म्याः सकललोककल्याणाय नित्यःप तिर्भविष्यति । अतस्तं बुधो लक्ष्मीपतिं कथयिष्यन्ति ।।

वृन्दावने निवसतः शिशुगोपविप्रान्
वृद्धान् तपस्विमनुजान् मिषतः समन्तात् ।
हत्वा निशाचरचमूः सहसा समन्ता-
दन्वर्थतामधिगमिष्यति सोऽपि तां ताम् ।। २७ ।।

वृन्दावनवासिनः शिशून् गोपान् विप्रान् वृद्धान् तपस्विनश्च मिषतः निशाचरान् निहत्य ताम् ताम् शिशुपः, तपस्विप इति नामसार्थकतां सोऽपि प्राप्स्यति ।। २७ ।।

तस्मिन् वने खगमृगावलिसेवनीये
हिंस्रैस्तुरङ्गमगजैः परितोऽवकीर्णे ।
घोरेऽर्जुनीरनुसरन् मृदुकायबालो
गोविन्द गोप इति नाम सनाथयेत ।। २८ ।।

खगैर्मृगैश्च 'सेवनीये हिंस्रैः प्राणिभिश्च व्याप्ते तस्मिन् घोरे वने गा अनुसरन् असौ बालः 'गोविन्द, गोप' इति नाम सफलयिष्यति ।। २८ ।।

देवर्षिराजर्षिमहर्षिमुख्यं विलक्षणं स्थावरजङ्गमाख्यम् ।
शेते जगद् यस्य विशालकाये नारायणः सोऽपि यदोः कुमारः ।।

स्थावरे जङ्गमे चेदं विलक्षणं जगद् यस्य विशालकाये शेते स यदोः कुमारो नारायण इति संज्ञां प्राप्स्यति ।। २९ ।।

इदं विभिन्नाभिधया सतत्त्वं सेविष्यतेऽभ्यस्तसमस्तशास्त्रैः ।
लोकस्तदेवानुसरिष्यतीति परं रहस्यं विरलो मुनीन्द्रः ।।३०।।

समस्तशास्त्रविद्भिरिदं तत्त्वं तया तयाऽभिधया सेविष्यते । लोकश्च तदेवानुसरिष्यति । कश्चनैव मुनीन्द्रः परमं रहस्यं सेविष्यते ।। ३० ।।

रहस्यमेकं शृणुतार्यवृत्ता यत्तत्त्वमेकं श्रुतयो वदन्ति ।
द्वेधा तदेव व्रजमण्डलेऽभूद् राधाद्वितीयं वरसानुसानौ ।। ३१ ।।

हे आर्यवृत्ताः, एकं रहस्यं शृणुत—श्रुतयो यदेकं तत्त्वं वदन्ति तदेव व्रजमण्डले द्विधाऽभूत् । एकं कृष्णतत्त्वम्, अपरञ्च राधातत्त्वं वरसानुनगरस्य सानुनि ।। ३१ ।।

इतीरयित्वा च वचो मुनीशो राधां कराभ्यामभिवन्द्य कृष्णम् ।
पीठान् महार्हात् सहसोदतिष्ठत् तत्त्वात् परस्मिन् मुनयोऽनपेक्षाः ।।

मुनीशो गर्गः पूर्वोक्तं वचः प्रतिपाद्य श्रीराधां श्रीकृष्णञ्च कराभ्यामभिवन्द्य महामूल्यादपि पीठादुत्थितः । तत्र हेतुं प्रदर्शयति—तत्त्वादतिरिक्तवस्तुनि मुनयो निःस्पृहा दृश्यन्ते ।। ३२ ।।

आप्ता अवाप्तव्यपदस्य वृद्धाः सम्माननं बन्धनमामनन्ति ।
धीरास्ततः शक्रपदावधीरा घनां वनालिं सततं श्रयन्ते ।।३३।।

आप्ताः प्राप्तव्यपदस्य प्राप्तौ लौकिकं सम्माननं बन्धनं प्रतिपादयन्ति । अतः शक्रपदमप्यवमानयन्तो धीरा घनं वनं सेवन्ते ।। ३३ ।।

ध्रुवोऽध्रुवं लोकमनोऽनुकूलं राज्यं विहाय ध्रुवमानसः सन् ।
कृष्णात् परं वस्तु न वस्तु मेने वरारकोत्कोऽभिलषेद् बलाटम् ।।

ध्रुवनामा बालकोऽस्थिरं लोकानां प्रियं राज्यं विहाय स्थिरमानसः तपस्यन् कृष्णमेव वस्तु मेने, नान्यत् । हीरकोत्सुको जनो किं बलाट(मूंग)-मभिलषेत् ! रूपसाम्यात् प्रवृत्तिः, मूल्यविरोधान्निवृत्तिः ।। ३४ ।।

अनन्यसाधारणभाग्यभाजं सम्बोध्य नन्दं यदुवंशनाथम् ।
यदूंश्च सत्कर्मफलोदयान् स गर्गोऽप्यगादन्यफलानपेक्षः ।। ३५ ।।

भूरिभागधेयं यदुवंशनाथं सम्बोध्य सत्कर्मफलभाजो यदूंश्च विबोध्यान्यसत्कारादिफलमनपेक्षमाणः स गर्गोऽपि निजाश्रमं जगाम ।। ३५ ।।

यथाऽऽगतांश्चान्यमुनीन् समर्च्य प्रातिष्ठिपच्चन्दनचारुमाल्यैः ।
निवेदयन्नागमनाय भूयो भूमौ निपत्यारिहुताशनोऽपि ।।३६।।

शत्रुदमनो नन्दोऽपि समागतान् मुनीन् चन्दनपुष्पधूपैः सम्पूज्य भूमौ निपत्य पुनरागमनाय निवेदयन् प्रस्थापयामास ।। ३६ ।।

ततश्च विप्रान् कनकैर्दुकूलैः सम्मान्यगोभिः समलङ्कृताभिः ।
शिशोश्च कल्याणमयाचताहो कल्याणयाच्ञा जगदीश्वरस्य ।।

ततो विप्रान् सुवर्णैर्वस्त्रैरलंकृताभिर्गोभिश्च सम्मान्य बालकस्य कल्याणं प्रार्थितवान् नन्दः। आश्चर्यमेतत् यज्जगतामधीशस्यापि कल्याण-याच्ञा ॥ ३७ ॥

यथायथं ज्ञातिजनान् महार्हैं रत्नैश्च वस्त्रैर्विविधोपचारैः।
घृताक्तभोज्यैरथ पायसान्नैः समादृतासौ यदुवंशनाथः ॥ ३८ ॥

असौ यदुवंशनाथो यथायोग्यं ज्ञातीः रत्नैर्वस्त्रैः घृताक्तभोजनैः पायसैश्च समादृत। वंशस्थवृत्तम् ॥ ३८ ॥

दिनोदयाद् भास्करभावसानं यावद् युवानः शिशवश्च वृद्धाः।
अभ्यागतानां मधुपर्कपृक्ताः परिश्रमं नागणयन्त गोपाः ॥ ३९ ॥

सूर्योदयात् सूर्यान्तं यावत् वृद्धा युवानः शिशवोऽतिथीनां पूजोपकरण-द्रव्यसंहनने व्यस्ताः मनागपि परिश्रमं गोपा न मन्यन्ते ॥ ३९ ॥

गवां द्विजानां मृगशावकानामारण्यकानां शिखिनाञ्च यूथम्।
विहाय भीतिं पुरमागतानां राधेति कृष्णेति मुदा ननाद ॥४०॥

वनवासिनां गवां पक्षिणां मृगशिशूनां मयूराणां च यूथं वरसानुं समागतानां जनानां भीतिं परित्यज्य 'राधा' इति 'कृष्ण' इति मुदा ननाद ॥ ४० ॥

सुतोत्सवं वीक्षितुमाकुलोऽपि सन् व्रजाङ्गनावाममुखावलोकनात्।
सरागवक्त्रौ रजनीपतिः शुभः शनैश्शनैर्भीत इवागमद् व्रजम् ॥

सुतोत्सवं द्रष्टुमतित्वरमाणोऽपि शुभो राकेशो व्रजवनितानां मुखस्यावलोकनात् सरागो भीतः शनैश्शनैर्व्रजं प्रविष्टः। चन्द्रोदयोऽभूदि-त्यर्थः ॥ ४१ ॥

खगोपभुक्ता विरहव्यथाकुला निशामुखे शीतमरीचिभिर्दिशः।
सभाजयंल्लोहितचन्दनोक्षिताः स शर्वरीशः समुदेति सागरात् ॥

दिवासूर्योपभुक्ताः सायं तद्विरहजया व्यथया व्याकुला रक्तचन्दन-लेपिता दिशः सभाजयन् चन्द्रः समुद्रात् समुदेति ॥ ४२ ॥

कलिन्दकन्याप्रतिहारपालिकां तमालमालां भुजनद्धवञ्जुलाम्।
शनैश्शनैश्शीतलरश्मिराशिभिः शिशुः शशाङ्कः स्नपयन् समेधते ॥

कालिन्दीपुलिने वर्तमानां वेतसवेष्टितां तमालपंक्तिं मन्दं मन्दं शीतकिरणैः स्नपयन् शिशुश्चन्द्रः समेधते ॥ ४३ ॥

तपस्विनीं क्लान्तमुखीं कुमुद्वतीं करैः खरैर्भानुमतो विलोलिताम् ।
रुषा भृशं पाटलभालभासुरः प्रसादयन् कान्त इव क्षपाकरः ॥

वराकीं भानोः तीक्ष्णैः करैर्विलोलितामत एव क्लान्तमुखीं कुमुद्वतीं रुषा रक्तभालेन भृशं दीप्तः चन्द्रः पतिरिव प्रसादयन् समेधत इति पूर्वेणान्वयः ॥ ४४ ॥

वियोगिनीतापशमाय कल्पितैः कुलाङ्गनाभिर्मधुपर्कवस्तुभिः ।
सभाज्यमानः स सभाजनोचितैर्विभाति चन्द्रो वनितानिनोपमः ॥

वियोगिनीनां पीडाशान्तये पूजासमुचितैः मधुपर्कद्रव्यैः चन्दनपुष्पदीपनैवेद्यैरर्च्यमानो व्रजवनिताननोपमश्चन्द्रो विभाति ॥ ४५ ॥

स इन्दिरां कुन्ददतीं वनस्य हि श्लथल्लताकुन्तलपुष्पगुत्सकाम् ।
जपाकपोलां सरसीरुहेक्षणां विभावयन् सात्त्विकभावभाविताम् ॥

कुन्दकुड्मलान्येव दशना यस्याः सा, ततस्ततः पतल्लतारूपेषु कुन्तलेषु पुष्पाणि गुत्सका यस्याः सा, जपैव कपोलपालिः यस्याः सा, पद्मान्येव नेत्राणि यस्याः सा, तथाभूतां सात्त्विकभावयुक्तां वनलक्ष्मीं सम्भावयन् स चन्द्रः समेधते ॥ ४६ ॥

धरां व्रजस्याघहरां वितर्कयन् प्रियां प्रतीचीमपि गन्तुमुत्सुकः ।
क्षणं तदाऽस्थात् शशलाञ्छितोऽप्यसौ समादरः पुण्यपदस्य कामदः ॥

प्रियां प्रतीचीं गन्तुमुत्सकोऽपि शशलाञ्छितोऽसौ चन्द्रः व्रजस्य पापहरां धरां विचिन्त्य जन्मोत्सवे क्षणं व्रजेऽस्थात् । पुण्यपदस्य समादरः श्रेयसे कल्पते ॥ ४७ ॥

व्रजाङ्गनावामविलोललोचना समीक्ष्य चामृश्य पुनः पुनस्तदा ।
भुजान्तराले कलितालकावलिं त्वमंस्त मुग्धा मृदुमौक्तिकावलिम् ॥

चन्द्रोदयसमये सुन्दरचञ्चलनयना काचन मुग्धा व्रजाङ्गना भुजान्तराले वर्तमानामलकावलिं पुनः पुनः समीक्ष्य आमृश्य चापि कोमलमुक्तामालां मेने ॥ ४८ ॥

क्षितौ मयूखं पतितं नभस्तलाद् विशङ्कमाना स्वदुकूलमङ्गना ।
ग्रहीतुकामा त्वरमाणमानसा सखीजनानामुपहास्यतामिता ॥

नभस्तलात् धरायां पतितं किरणं स्वदुकूलं मन्यमाना काचन वनिता ग्रहीतुं त्वरमाणा सखीनां समुपहास्यतां गता ॥ ४९ ॥

व्रजावनिं माधवनीमिवादरात् पयःप्रवाहैः स्नपयन् सुधाकरः।
विहङ्गमैः साधुपदैरपीडितः जडैरपि स्तूयत आर्यवृत्तवान् ॥५०॥

अमरावतीमिव व्रजावनिमत्यादरात् पयःप्रवाहतुल्यैः किरणैः स्नपयन् सुधाकरो विहगैः साधुवादैरीडितः। आर्यचरितो जडैरपि स्तूयत एव ॥ ५० ॥

बटून् पटून् वेदपदाहुतानलान् कृताभिषेकानपि धर्मसंकुलान्।
निशाकरः प्रोञ्छति शीतलैः करैस्तपस्विनः सेवत ईश्वरोऽप्यहो ॥

श्रुतिवाक्यैस्तृप्तानलान् कृतस्नानानपि स्वेदसंकुलान् पटून् ब्रह्मचारिणो निशाकरः शीतैः करैः प्रोञ्छति। अहो! ईश्वरोऽपि तपस्विनः सेवते ॥ ५१ ॥

दिवाकराभीषुविकासिताननना मृणालिनी श्वेतपटैः प्रसृत्वरैः।
निगूह्मानाननवामलोचनं वियोगजं दुःखमुपैति साम्प्रतम् ॥५२॥

साम्प्रतं चन्द्रोदये, रविकिरणैर्विकसितवदना कमलिनी प्रसृतैः किरणैः श्वेतपटैः मुखं लोचनञ्चाच्छादयन्ती वियोगजन्यं क्लेशमनुभवति ॥

उरः स्थले यो वियतः पदं न्यधात् स तिग्मरश्मिर्मुनिबृन्दवन्दितः।
अपां निधौ मज्जति तान्ततिग्मतः श्रियं सुराणामपि हन्ति तिग्मता ॥

मुनिभिर्वन्दितो यो नभस उरसि पदं न्यधात्, स तीक्ष्णकिरणो रविर्म्लानकिरणो जलधौ मग्नः। अतितिग्मता सुराणामपि श्रियं हन्ति ॥५३॥

विवस्वतस्तर्जिततारकावलेर्मयूरजालैर्ग्लपितां तपस्विनीम्।
प्रतानकेशावलिसंवृताननां लतां समाश्वासयतीव माधवीम् ॥५४॥

विलुप्ता तारकावलिर्येन, तस्य सूर्यस्य किरणैः म्लानां वराकीं प्रतानभूतैः केशैः संवृताननां माधवीं लतां विनोदयतीव ॥ ५४ ॥

कलिन्दकन्या नलिनाञ्चलाञ्चितां मरीचिमालां रजतद्रवोपमाम्।
पटीं वसानेव रजाज कामदा गिरीशमौलिप्रवहत्सुरापगा ॥ ५५ ॥

नलिनाञ्चललक्षितां किरणमालां रजतद्रवतुल्यां पटीं परिदधाना कामप्रदा यमुना शङ्करशिरसः प्रवहन्ती गङ्गेव शुशुभे ॥ ५५ ॥

मही हि पद्मावलिचारुलोचना समुन्नतापीनमहीधरस्तनी।
तमालकेशा कलहंसनूपुरा निमज्जति क्षीरपयोधिवीचिषु ॥५६॥

कमलावलिरेव मनोहरं लोचनं यस्याः सा, समुन्नतौ पीवरौ च महीधर एव स्तनौ यस्याः सा, तमालदलान्येव केशा यस्याः सा, हंसा एव एव नूपुरा यस्याः सा, एवम्भूता मही क्षीरसागरतरङ्गे निमज्जति ॥५६॥

दिनं यथावत् सकलं धरातले स्थिताः समाधौ तरुराजराजयः ।
समाप्य सूर्यव्रतमब्जपाणयः सुधोदधौ स्नान्ति विधूतकल्मषाः ॥

तरवः कमलं हस्ते निधाय समाधिस्थिताः महीतले सकलं दिनं यावत् सूर्यव्रतं परिसमाप्य व्यपगतपापाः सुधासमुद्रेऽवभृथस्नानं कुर्वन्ति ॥

दलान्तरालात् पृथिवीमितान् करान्
विधोः प्रमत्ताः शबरीकुमारिकाः ।
मणीन् महार्हानिति लुब्धमानसा
विचिन्वते निष्फलयत्नकातराः ॥ ५८ ॥

पत्राणां मध्यभागात् पृथिव्यां विधोः पतितान् करान् मदमत्ता अतिलुब्धाः शबर्यो महामूल्यान् मणीन् मत्वाऽसफलयत्नैः कातरा विचिन्वते ॥ ५८ ॥

व्रजाबलानामकलङ्कमाननं विलोक्य चन्द्रः प्रतिबिम्बतामिषात् ।
कलिन्दकन्याकमनीयपुष्करे निगूहति स्वं सकलङ्कमाननम् ॥५९॥

चन्द्रो व्रजवनितानां निष्कलङ्कं मुखं विलोक्य यमुनाया जले सकलङ्कं स्वस्य मुखं प्रतिबिम्बताछलेन निगूहति ॥ ५९ ॥

उरुं लिहानः करभाभिरामकं निशि भ्रमच्चीवलचूर्णकुन्तलः ।
सितो हि यूनामभिसारवर्त्मनि भयं समुत्पादयतीव वासुकिः ॥६०॥

करभोपममुरुं प्राप्तोऽभिसारिकायाः केशपाशोऽभिसारमार्गे वासुकिरिव यूनां भयमुत्पादयति ॥ ६० ॥

सुधाभृतं चन्दनबिन्दुतारकैः समर्चितं स्फाटिकभित्तनिर्मितम् ।
घटं वयोमङ्गलगीतिरश्मिभिर्निशावधूटीनभसो विकर्षति ॥६१॥

स्फटिकशकलनिर्मितं चन्दनबिन्दुतारकैः समर्चितं शशाङ्कघटं पक्षिणां कलरवरूपध्वनिभिः रात्रियुवतिर्नभसः विकर्षति ॥ ६१ ॥

नभस्तलाद् धीरकयज्ञकुण्डतस्त्रिलोकपुण्योपचयात् सुधामयः ।
हुताग्निधूमावलिधूसरोदरो विनिर्गतो रात्रिवधूविशेषकः ॥ ६२ ॥

हीरकनिर्मितयज्ञकुण्डान्नभसः त्रिलोकस्य पुण्योपचयाद् हेतोः सुधास्वरूपो हुतस्याग्नेर्धूम्रधूसरमध्यो रात्रेर्वध्वास्तिलकायमानश्चन्द्रो विनिर्गतः ॥

वियत्कुशालोविशदासनो विधुर्मृगाजिनाभूषितबाहुकोटरः।
कुमुत्कुला नाभिविलम्बिकूर्चकः मरीचिभस्मेव महर्षिपुङ्गवः॥

वियदेव कुशासनं यस्य, पक्षे वियदिव कुशासनं यस्य, मृगाजिनेनालंकृतो भुजकोटरो यस्य, कुमुत्कुलमेवानाभि कूर्चः, पक्षे कुमुत्कुलमिव, मरीचिरेव भस्म यस्य, मरीचिरिव भस्म, तथाभूतो महर्षिरिव विधुर्भाति॥

सरोजिनीकोमलकान्तवर्ष्मणो निसर्गसंसर्गसुगन्धिविग्रहः।
परागपुष्पां निशितां कुमुद्वतीं स्पृशंस्तटाको व्यसनीव दृश्यते॥

कमलिन्याः मृदुशरीरस्य स्वभावतः संसर्गेण सुगन्धिशरीरस्तटाको निशि पुष्पवतीं कुमुदिनीमालिङ्गन् व्यसनीवाभाति॥ ६४॥

सिताभ्रमाला रजताम्बरावृता सितालकाली रमणी वसुन्धरा।
विभावरीकान्तभयात् तपस्विनी जरास्वरूपं नटयत्यहो निशि॥

श्वेतमेघमाला रजतशुक्लवसनासितकेशा सुन्दरी वसुन्धरा विभावरीकान्तचन्द्राद् भीता वराकी रात्रौ आत्मनो जरास्वरूपं नटयति॥६५॥

कलिन्दकन्या सलिलेऽघहारके सुखं शयानाः कमठा मरीचिभिः।
सजीवदम्भोलिचया इवाबभुर्विभोर्महत्त्वं गदितुं क ईशते॥ ६६॥

पापनाशके यमुनाजले सुखं शयानाः कमठाः चन्द्रकिरणैः सजीवा हीरकराशय इव बभुः। प्रभोर्महत्त्वं प्रतिपादयितुं के प्रभवन्ति!॥ ६६॥

कलानिधेः कान्तमयूखमार्जितं यमानुजायाः पुलिनं हि शाद्वलम्।
क्लमापनोदाय जले विहारिणां महार्हतल्पं मसृणोत्तरच्छदम्॥

चन्द्रस्य मनोहरकिरणाच्छादितं तृणशबलितं कालिन्द्याः तटं जलक्रीडाकारिणां श्रमापनोदनाय कोमलवस्त्राच्छादितं महामूल्यं तल्पमिव दृश्यत इति शेषः॥ ६७॥

व्रजाङ्गनालक्तकरागरञ्जिते सितांशुपाषाणनिबद्धमन्दिरे।
सुवर्णशृङ्गं विधुरश्मिसंभृते निराश्रयं पर्वणि हन्त लम्बते॥६८॥

व्रजवनितानामलक्तकेन रञ्जिते चन्द्रकान्तमणिनिर्मिते देवमन्दिरे चन्द्रकिरणैर्व्याप्ते सुवर्णशिखरं पूर्णिमायां निराधारं लम्बत इत्याश्चर्यम्॥६८

तमालशाटिः कनकाभकञ्चुका कदम्बवक्षोजनितम्बबिल्वका।
तमस्विनीनाथविभाविताऽप्यलं न लक्ष्यतेऽहो चपलाभिसारिका॥

नीलां स्निग्धां शाटिं सुवर्णाभं कञ्चुकं च पिदधती नवोद्गतवक्षोजा बिल्वनितम्बा पुनः पुनरिन्दुना परिलक्ष्यमाणापि द्रुतं गच्छन्ती अभिसारिका जनैर्न लक्ष्यत इत्याश्चर्यम्॥ ६९॥

सिताश्मघण्टापथशुभ्रदर्पणे व्रजस्त्रियः स्वं प्रतिबिम्बिताननम् ।
निरीक्ष्य मीनाकुलवारिविभ्रमात् प्रियाङ्कपालिं पुलकैर्व्यभूषयन् ॥

विधुरश्मिभिः पानीयमये चन्द्रकान्तमणिनिर्मिते स्वकीयं वदनं विलोक्य व्रजाङ्गना मीनाकुलजलभ्रमात् प्रियस्य क्रोडं पुलकैर्व्यभूषयन् । भयात् प्रियायाः क्रोडे संगमनेन प्रियस्य रोमोद्गमः सञ्जातः ॥ ७० ॥

वियोगिनीमारणदारुणाशयः कलङ्कपङ्कावलिताननो विधुः ।
वियोगिनीशापशताहतद्युतिः शनैश्शनैर्मज्जति हन्त वारिधौ ॥७१॥

वियोगिनीनां मारणे दारुणहृदयः, अत एव कलङ्ककज्जलैर्लिप्ताननो विधुर्वियोगिनीनां शापशतैर्नष्टतेजाः सन् शनैश्शनैः समुद्रे निमज्जति ॥७५॥

व्रजधरातलवन्द्यरजःकणान् अतिविनीततया शिरसा वहन् ।
कमलिनीकुलवल्लभवीक्षितः कुमुदिनीकुललम्पट ईरितः ॥ ७२ ॥

व्रजमहीतलस्य प्रणम्यान् धूलिकणान् नम्रतया शिरसा वहन् भगवता भास्करेण संकेतितश्चन्द्रो नीचैर्गतः ॥ ७२ ॥

भ्रमरराजिविराजितमण्डलं स्फुटपरागपरागतदिङ्मुखम् ।
विशदकान्तिविनिन्दितकैरवं स्मितमुखं सरसीरुहमण्डलम् ॥७३॥

विधौ अस्तमिते मधुपमिलितं परागपरागतं स्वकान्त्या निन्दितकुमुदं मन्दहासं सरसीरुहमण्डलमभूत् ॥ ७३ ॥

नवपरागविमुग्धशिलीमुखाः सरसि मञ्जुरवं दधतेऽधुना ।
खगगणोऽपि मुदा विरुदं तदा कुलवधूप्रकृतेर्मृदु गायति ॥७४॥

सरसीरुहस्य नूतनैः परागैः प्रसन्ना मधुपाः सरसि मधुरं सम्प्रति गुञ्जन्ति । पक्षिवृन्दमपि मुदा कुलीनायाः प्रकृतेः विरुदं मधुरं गायति ॥

कुमुदिनीपतिरेति पटान्तरं कमलिनीपतिरेति पटानम् ।
प्रकृतिनिर्मितनाटकमण्डपे विधिरहो नटयत्यखिलं जगत् ॥ ७५ ॥

प्रकृतिविलासजनिते नाटकमण्डपे चन्द्रो जवनिकाया अभ्यन्तरं याति, सूर्यश्च मञ्चमायाति । विधिरस्मिन् नाटकमञ्चे जगति सर्वान् जन्तून् नटयति ॥ ७५ ॥

सानन्दनन्दस्तुतभागधेया व्रजाङ्गनागीतयशा यशोदा ।
कृष्णाननं चुम्बति चारुचन्द्रं ब्रह्माण्डनाथोऽप्यबलाङ्कपालौ ॥७६॥

आनन्दसन्दोहमग्नेन स्तुतं भागधेयं यस्याः सा, व्रजाङ्गनाभिर्गीतं यशो यस्याः सा, तथाभूता यशोदा मनोहरं श्रीकृष्णमुखं चुम्बति। आश्चर्यमेतद् यद् ब्रह्माण्डनायकोऽपि अबलाक्रोडे विलसति ॥ ७६ ॥

वांसीनद्या अमलपुलिने ख्यातखेतानवंशाद्
वृत्तिः प्राप्ताध्ययनसमये पाडरोनानिवासात्।
राधाकाव्ये परमसुखदे येन पुण्ये तदीये
प्रागात् पूर्ति ललितवचनः सप्तमश्चारुसर्गः ॥ ७७ ॥

वांसीनद्या विमले तटे पडरौनानगरनिवासिनः प्रसिद्धखेतानवंशात् पठनसमये येन वृत्तिरवाप्ता, तदीये परमसुखदे पुण्ये राधाकाव्ये ललितपद-सन्निवेशश्चारुः सप्तमः सर्गः समाप्तिमगमत् ॥ ७७ ॥

इति देवरियामण्डलान्तर्गत (देवपुरी) कुशीनगरदक्षिणसार्द्धक्रोशत्रय-परिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्त-शब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन प्राप्तस्वर्णपदकेन श्रीजानकीजानिना व्याख्यातसम्पादितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते श्रीराधाचरितमहाकाव्ये सप्तमः सर्गः समाप्तः ॥

अष्टमः सर्गः

नन्दसूनुरनघो मनोभवो मूर्त्तिमान् रसमयश्शनैश्शनैः ।
वर्धमानविधुबिम्बवत्तदा वासिभिर्व्रजभुवोऽन्वभूयत ॥ १ ॥

अथ मनोहरो नन्दनन्दनो मूर्त्तिमान् कामो रसस्वरूपः शनैशनैर्वर्द्धमानस्य विधोर्विम्ब इव व्रजजनैरन्वभूयत ॥ १ ॥

लोलकेशमधुपावृताननो मातुरङ्कमपहाय माधवः ।
गोर्विषाणपृथुपृष्ठमामृशन् सिद्धगोप इव दोग्धि तां पयः ॥ २ ॥

इतस्ततो विस्तृतैः केशैरेव मधुपैरावृतमाननं यस्य सः, माधवो यशोदायाः क्रोडं परित्यज्य गोः शृङ्गं विशालपृष्ठं चामृशन् सिद्धगोप इव गाँ पयो दुग्धे ॥ २ ॥

नन्दनन्दन इलातले भृशं धूलिपुञ्जलसितोऽपि निर्मलः ।
मायया बलित ईश्वरो यथा नामरूपकलितोऽप्यनञ्जनः ॥ ३ ॥

पृथिव्यां रममाणः श्रीकृष्णो धूलिधूसरोऽपि निर्मल आसीत् यथा मायया सबलितो नामरूपयुक्तोऽपि निरञ्जनः ॥ ३ ॥

शिक्यभाण्डनवनीतमाहरन् मन्दमन्दमपसृत्य शावकः ।
भक्षयत्यनुदिनं यशोदया भर्त्सितोऽपि शिशुमध्य एषकः ॥ ४ ॥

अयं शिशुरपि शिक्ये वर्तमानाद् भाण्डान्नवनीतमाहृत्य मन्दं मन्दं दूरेऽपसृत्य मात्रा तर्जितोऽपि बालकानां मध्ये प्रतिदिनं भक्षयति ॥ ४ ॥

वर्ष्मकान्तिहसिताम्बुदो द्विजैस्तर्जिताशनिरयं वनौकसाम् ।
योषितां निजवयस्यमण्डितः साभिलाषनयनैर्निरीक्ष्यते ॥ ५ ॥

गोचारणेऽरण्ये मेघ इव श्यामो दन्तकान्तिभिस्तर्जिताशनिः स्वमित्रमण्डलमण्डितः शिशुरयं वनवासिनीनां वनितानां सतृष्णनयनैर्निरीक्ष्यते ॥ ५ ॥

गोपवृन्दपरिवारितः प्रगे वेणुचुम्बितसुधाभृताधरः ।
चारुचीरकटिमौलिवर्हको धेनुचारणमिषोऽयते वनम् ॥ ६ ॥

गोपबालकैः परिवेष्टितोऽधरामृतपिबद्वंशीकः, पीताम्बरकटिः, मयूरपिच्छशिरस्कोयं शिशुः प्रातर्गोचारमिषेण वनं प्रतिदिनं गच्छति ॥६॥

प्रातरेत्य गहनां वनावलिं कुञ्जवीथिषु परिभ्रमन् सदा ।
लीलया क्षपितवासरः पुनः सायमेति सदनं स्वकं मदा ॥ ७ ॥

प्रातःकाले घनं वनं गत्वा कुञ्जेषु परिभ्रमन् विविधाभिर्लीलाभिः सम्पूर्णं दिवसं परिसमाप्य सायं प्रसन्नमुखः स्वीयं सदनं सदा प्राप्नोति ॥७॥

दोग्धि गाः स्वयमपि स्तनन्धयो वृद्धगोप इव लालयन् पयः ।
वासिनां व्रजभुवश्चमत्कृतिं मानसे सततमातनोति सः ॥ ८ ॥

वृद्धगोप इव स्तनन्धयोऽप्यसौ गा लालयन् पयो दोग्धि, व्रजवासिनां मनसि सततमाश्चर्यमातनोति च ॥ ८ ॥

कानने प्रतिदिनं गतागते लीलया विविधया समाचरन् ।
वासरान् कतिपयान् व्यतीतवान् नाहलानुगतगोपनन्दितः ॥९॥

अनेकाभिर्लीलाभिः काननं यात्यायाति च । एवं कुर्वन् शबरैरनुगतैर्गोपैः प्रशंसितः श्रीकृष्णः कतिपयान् दिवसान् व्यतीतवान् ॥ ९ ॥

माधवस्य मधुराकृतिं नखैः पादकुङ्कुमरसैः सरोजयोः ।
आकलय्य शबरीचयः सुखं श्लेषजं स्पृशति कानने घने ॥ १० ॥

गहने कानने शबर्यो माधवस्य गोचारणसमये पत्रेषु संक्रान्तैः पादकुङ्कुमरसैः पयोधरयोः मधुरामाकृतिं नखैश्चित्रयन्त्यो माधवस्य संयोगजन्यं फलमनुभवन्ति ॥ १० ॥

स्निग्धवेणुनिनदैः सुधाप्लुतैः स्थावराननुदिनञ्च जङ्गमान् ।
सम्मदं मुनिजनातिदुर्लभं प्रापयन् भ्रमति वन्यभूदरे ॥११॥

सुधावर्षिभिः स्नेहभरैर्वंशीशब्दैरनुदिनं स्थावरान् जङ्गमान् च जनान् मुनिभिरतिदुर्लभमानन्दं नयन् स वनभुवि भ्रमति ॥ ११ ॥

अब्जपुञ्जमधुपावलिश्रितं हंससारसशकुन्तसञ्जितम् ।
कुङ्कुमैश्शबरयौवतस्तने रञ्जितं हि कमनं सरो महत् ॥ १२ ॥

कमलैः धुपैर्लसितं हंससारसपक्षिभिर्विलसितं शबरयुवतीनां स्तनकुङ्कुमैः रञ्जितं मनोहरं महासरो नटवरेण श्रीकृष्णेन वीक्षितमिति परेण सम्बन्धः ॥ १२ ॥

तीरनीपविनिवारितातपं कुन्दचम्पकपरागभावितम् ।
कुञ्जराजिपरिवारितक्ष्मं वीक्षितं नटवरेण कानने ॥ १३ ॥

तीरे वर्तमानैः कदम्बैर्विनिवारित आतपो यस्य, कुन्दानां चम्पकानां पुष्पाणां रजोभिः शोभितम्, लतागृहाणां समुदायैः छादिता धरा यस्य तत् सरो नटवरेण वने वीक्षितम् ॥ १३ ॥

वर्मितं वरुणराजवर्चसा शर्मितं स्फटिकशुभ्रपाथसा ।
निर्मितं कुशलशिल्पिवेधसा दीपितं पुलिनरत्नतेजसा ॥ १४ ॥

राज्ञो वरुणस्य वर्चसा वर्मवत् कृतम्, स्फटिकेनेव शुक्लजलेन सुखवत् कृतम्, चतुरेण शिल्पिना विधिना निर्मितम्, पुलिनस्य रत्नतेजसा प्रकाशितं सरो नटवरेण श्रीकृष्णेन वीक्षितमिति पूर्वेण सम्बन्धः ॥ १४ ॥

रत्नजैर्विमलरश्मिराशिभिर्नाशयत् परिसरे तमस्ततिम् ।
प्रातिनिध्यमिव यद्रवेर्निशि फल्गुतां प्रथयति प्रतिक्षणम् ॥१५॥

रत्नानां विमलकिरणमालाभिः परिसरभूमेस्तमोराशिं नाशयन्नक्तं सूर्यस्य प्रातिनिध्यं कुर्वत् सरः प्रतिक्षणं निष्फलतां तनोति ॥ १५ ॥

सूचिभेद्यतिमिरावगुण्ठनः कामिनीं विरहकातरामिनः ।
सान्त्वयन् मुहुरगाद् यदोदधिं तीरमेति रमणीकुलं तदा ॥१६॥

प्रगाढतमश्छन्नः सूर्यो दिवा विरहाकुलां कामिनीं मुहुर्मुहुः सान्त्वयन् यदा जलधिं गतः, तदा सायमित्यर्थः, रमणीकुलं सरसस्तीरं भ्रमणार्थमागच्छति ॥ १६ ॥

यौवनोद्धतशरीरविभ्रमा नव्यभव्यपरिधानभूषिताः ।
कामदम्भदलनावतारकाः कामना अनुसरन्ति कामिनीः ॥ १७ ॥

यौवनोन्मादसम्पन्नशरीरा नव्यैर्भव्यैश्च परिधानैरलङ्कृताः सौन्दर्यमददलनाय धृतावतारा युवानः कामिनीस्तस्य सरःपरिसरेऽनुसरन्ति ॥१७॥

माधवीव्रततिपुष्पलम्पटान् मालतीमुकुलमर्दमन्थरात् ।
आशुगाद् विमलकावगाहनाद् वर्धते स्मरजवो विलासिनाम् ॥

माधवीलतायाः पुष्पसौरभं दधतः, मालतीकुड्मलानां मर्दनेन मन्दगतिकाद् विमलजलावगाहनात् पवनात् शीतल मन्दसुगन्धितवाताद् हेतोः विलासिनां स्मरवेगो वर्धते ॥ १८ ॥

माधुरीमथितमन्मथक्लमा गीश्शकुन्तनिवहैरुदीरिता ।
कामकौतुककलाविलासिनीः शिक्षयत्यनुदिनं निशामुखे ॥ १९ ॥

विविधानां पक्षिणां कलरवाः कामजन्यखेदं दूरीकुर्वन्तो विलासिनीः कामकेलीर्निशामुखेऽनुदिनं शिक्षयन्ति ॥ १९ ॥

श्लेषदार्ढ्यकबरीश्लथत्सुमैर्मर्दितं पृथुनितम्बगौरवात् ।
शाद्वलं किसलयैश्च सैकतं लक्ष्यते शबरभुक्तभु प्रगे ॥ २० ॥

दृढालिङ्गनेन कबर्याः पतितैः पुष्पैः किसलयैश्च बृहन्नितम्बभारेण मर्दितं दूर्वामयं तटं शबरैर्निशि भुक्तम्प्रातर्लक्ष्यते ॥ २० ॥

मौक्तिकं शबरदारवक्षसः शाद्वले परिसरे निभाल्यते।
शृङ्गबेरकरसः प्लवङ्गमान् प्रीणयेत् कथमहो हितः सदा ॥ २१ ॥

शबराणां दाराणां मालाया मौक्तिकं घासमये परिसरे दृश्यते। सदा पथ्योऽपि आर्द्रकरसः कपीनां प्रीतये न कल्पते ॥ २१ ॥

अञ्जनाङ्कशयनोपला मुहुर्भालकुङ्कुमलसत्तृणालयः।
स्थासकाङ्ककलिता धरा रतेर्वामतामनुवदन्ति हि स्त्रियाः ॥२२॥

तस्य सरसोऽञ्जनाङ्किताः शयनोपलाः यस्यां सा, स्थासकस्य भालकुङ्कुमेन लसन्ति तृणानि यस्यां सा, स्थासकस्य चिह्नानि यस्यां सा तटभूमिः स्त्रीणां वामां रतिमाख्याति ॥ २२ ॥

श्रीफलोपमकुचा मदालसा भ्रान्तकामुकनितम्बमण्डलाः।
वन्यपुष्पकृतभूरिभूषणाः स्नान्ति वारि वनजा वधूटिकाः ॥२३॥

श्रीफलसदृशस्तनयुक्ताः पीतमदाः, भ्रान्ताः कामुका येन, तथाभूतं नितम्वमण्डलं यासां ता वन्यैः पुष्पैः कृतं भूरि भूषणं याभिस्ता वन्या वधूव्यस्तस्य सरसो वारि स्नान्ति ॥ २३ ॥

वल्कभित्तपरिकुञ्चितस्तनाः कुन्तलाप्तजघना मृगीक्षणाः।
जानुलम्बचलनीधृतोऽसिता गीतशब्दितपथाः प्रयान्ति हि ॥२४॥

वल्कलखण्डैः परिवेष्टिकुचाः, जघनविलम्बिकेशाः, हरिणनयनाः, जानुपर्यन्तगतचलनी (घाघरा) धृतः, पथि गीतं गायन्त्यः सरःस्नानार्थं गच्छन्ति ॥ २४ ॥

केशशोषिततमालकीर्तिका भालबिन्दुरविबिम्बभासिता।
चक्षुषा शमितमीनवामता कण्ठकान्तिविगलत्त्रिरेखता ॥२५॥

केशैस्तमालश्रीर्ति विलुम्पन्ती, ललाटतिलकेन रविबिम्बेनेव शोभमाना, चक्षुर्भ्यां मीनानां चक्षुषः सौन्दर्यं तिरोहितं कुर्वन्ती कण्ठस्य कान्त्या शङ्खस्य कान्ति तिरोदधती राधा हैमपीठे विराजमानाऽऽसीत् ॥ २५ ॥

दन्तवस्त्रपिहितबिम्बचारुता जङ्घया विहतरम्भिकाग्रता।
आननाजितविभावरीशता पादतापतितरम्यकञ्जता ॥ २६ ॥

बिम्बफलसदृशेनौष्ठेनालङ्कृता, कदलीस्तम्भेनेव जघनेन युक्ता, आननेन चन्द्रमसं जयन्ती, पादेन च कमलस्य श्रियमपहरन्ती सा श्रीराधा हैमपीठे विराजमानाऽऽसीत् ॥ २६ ॥

नन्दनन्दनसहोदरे वने पुष्पपुञ्जरचितेऽतुले गृहे।
राधिकाऽऽभरणराजिराजिता हैमपीठमधितिष्ठतीन्दिरा ॥२७॥

नन्दनवन इव तस्मिन् वने पुष्पैर्विरचिते परममनोहरे लतागृहे सर्वाभरणभूषिता श्रीराधा सुवर्णसिंहासनमिन्दिरेव अधितिष्ठन्त्यासीत् ॥२७॥

गन्धपुष्पकुसुमैः समभ्यर्च्य तां दीपकैः कनकभाजने तथा ।
उत्तमं फलचयं निधाय ताः संस्तुवन्ति मधुरैः स्वरैः पुरः ॥ २८ ॥

हेमपीठे विराजमानां तां श्रीराधां चन्दनपुष्पधूपदीपैः सम्पूज्य पुरः कनकभाजने मधुराणि फलानि संस्थाप्य मधुरैः स्वरैः स्तुतिं कुर्वन्ति ॥२८॥

चारुताचकितकामवल्लभां वक्त्रताविजितपर्वचन्द्रिकाम् ।
पाणितामथितमाधवीलतां द्रष्टुमर्हति युवापि कश्चन ॥ २९ ॥

हे किशोरि, ते सौन्दर्येण रतिरपि विस्मयं गता, मुखेन ज्योत्स्नापि विजिता, पाणिना माधवीलतापि मथिता । एवम्भूतां त्वां कश्चन युवापि द्रष्टुमर्हति, विवाहकामनयेति शेषः ॥ २९ ॥

इन्दिराकिसलयपाणिना हरी रोहिणीरमणपाणिना विधुः ।
धन्यतामतितरां यथा गतस्ते करेण कतमस्तथा भजेत् ॥ ३० ॥

इन्दिराया रतिकोमलकरेण, रोहिण्या रमणेन हस्तेन च यथा हरिः, विधुश्च धन्यतां गतौ, तथा ते करेण कतमो धन्यतां भजेत् ! ॥ ३० ॥

सुभ्रुवां सुभगकान्तयोगतो यौवनं फलति नान्यथा यतः ।
अर्द्धमीलितविसारलोचना स्वेदबिन्दुमथिताधरा स्थिता ॥३१॥

यतः स्त्रीणां यौवनं सुभगपतिसंयोगेन यौवनं फलति, अन्यथा न । अतोऽर्धनिमीलितनयना मीनाक्षी धर्मबिन्दुभिः पीडिताधरा स्थिता । शेषं परेण सम्बद्धयते ॥ ३१ ॥

दृष्टनाभिवलिकोन्नतस्तना बाहुबाध्यजघनद्वया ततः ।
पावने हि गिरिराजकन्दरे पञ्चवह्नितपआदधावुमा ॥ ३२ ॥

यस्या नाभिः त्रिवली च दृश्यमानेऽभूताम्, जघनद्वयं बाहुभ्यां पीडितमभूत्, सा पार्वती पवित्रे हिमगिरौ पञ्चाग्नितपः शङ्करवरप्राप्तये चचार ॥ ३२ ॥

भामिनो नरकगामिनी विना स्वामिनं मतमिदं मनीषिणाम् ।
नैगमागमविचारपण्डिते रोचते यदिह ते विधेहि तत् ॥३३॥

विना पतिं रामा नरकं व्रजतीति विदुषां मतम् । अतो हे वेदशास्त्रविचारशीले श्रीकिशोरि, अत्र यत् तुभ्यं रोचते तत् कुरु ॥ ३६ ॥

तन्निशम्य शबरीजनोचितं सख्यभावत उदीरितं वचः।
दन्तदीधितिविभातकानना सस्मिताननमुवाच राधिका ।। ३४ ।।

सखीत्वेन प्रोक्तं शबरीजनोचितं तद् वचो निशम्य श्रीराधा दन्तानां प्रभया काननं भासयन्तीषद् विहस्य जगाद ।। ३४ ।।

युष्मदीरितवचो भवेन्मतं वल्लभः स हृदयङ्गमो यदि।
अन्यथा जनकसद्म सम्मतं कल्प एष मुनिसम्मतोऽपरः ।। ३५ ।।

भवतीभिः प्रतिपादितं वचः सत्यम्, यदि पतिर्हृदयङ्गमो भवेत्। अन्यथा कन्यानां पितुर्गृह एव निवासः समुचितः। अयमपरोऽपि कल्पो मुनिसम्मतः ।। ३५ ।।

पर्वतस्य दुहिताऽप्युमा सती प्राप्तुमीप्सितवरं महेश्वरम्।
उत्तमेन विधिना जगाम यत् तत् पदं विशतु वः सखी त्वियम् ।।३६।।

हिमालयस्य सुता सती अपि इष्टं वरं महेश्वर प्राप्तुं यत् पदमुत्तमेन विधिना जगाम। तदेव पदं भवतीनां सखीयम् गच्छतु। अर्थादुत्तमेन विधिनाऽहमपि तप आचरिष्यामि ।। ३६ ।।

कोमलं वपुरिदं सहेत किं क्रूरतां तु तपसः कृशाङ्गि ते।
पद्मिनी सरसि राजतेऽबले नातपेऽवनिगता कदाचन ।। ३७ ।।

हे कृशाङ्गि तव कोमलं शरीरमिदं तपसः काठिन्यं कथं सहेत ! अबले, कमलिनी सरस्येव शोभते, न तु आतपे पृथिव्यां कदापि ।। ३७ ।।

चन्दनोचितशरीरमार्दवं भस्मलेपनविकारमाप्नुयात्।
पुष्पतल्पमपि बाधकं तव स्थण्डिलं सुखकरं कथं भवेत् ।। ३८ ।।

इदं चन्दनोचितं मृदुशरीरं भस्मनो लेपनेन विकारं कथं प्राप्नुयात् ? तव पुष्पशय्यापि यदा बाधिका, तदा दर्भाङ्कुरा धरा कथं सुखकरी भवेत् ।।

ताम्यतीव कुसुमैः सखीरितैर्या विनोदनमहे भृशं सदा।
सोत्सुका व्रतकठोरतात्मने वृद्धये विगतमूलवित्तवत् ।। ३९ ।।

क्रीडाकाले सखीभिर्विक्षिप्तैः कुसुमैरपि या भृशं ताम्यतीव, सेदानीं कुसीदलोभेन विगतं मूलं वित्तं यस्य, स इव कठोरव्रतपालने समुत्सुकेति चित्रम् ! पतिप्राप्तिकामनया कठिनतपोऽग्नौ शरीरमपि हव्यं विधातुमिच्छति ।। ३९ ।।

जीवनं निखिलवस्तुनः प्रियं पालनीयमिति शास्त्रदेशना।
प्राणभृत् कुशलकोटिमश्नुते योगिनोऽत्र नियतं निदर्शनम् ।। ४० ।।

जीवनं निखिलस्यापि वस्तुनोऽपेक्षया प्रियमिति सर्वतो भावेन रक्षणीयमिति शास्त्रादेशः। जीवन् नरः कल्याणकोटिं भुनक्ति। अत्र योगिन एव दृष्टान्तः। 'जीवन् नरो भद्रशतानि पश्यति' इति महर्षि-बाल्मीकिः ।। ४० ।।

त्वं ततः सपदि योगिनां व्रतात् मानसं दवय वर्ष्म पालय।
विज्ञताऽस्ति विदिता विधेर्भवेत् निर्मितः सदृश एव तेन हि ।।४१।।

अतस्त्वं योगियोग्यव्रतात् मनोऽपसारय, शरीरं कठोरे तपसि वह्नौ मा प्रज्वलय, विधेर्विज्ञता प्रसिद्धाऽस्ति, तेनावश्यं तव सदृशः कश्चन युवा निर्मितो भवेत् ।। ४१ ।।

क्ष्मागतां कुमुदिनीं सुधासुवा योजयन् गगनगेन कौशलात्।
अर्जितं सखि यशो विधिः कथं योजने तव समापयिष्यति ।। ४२ ।।

आकाशस्थितेन चन्द्रमसा पृथिवीं गतां कुमुदिनीं चातुर्येण योजयन् विधिः, हे सखि, अर्जितं तद्यशः तव योजने कथं नाशयिष्यतीति ।। ४२ ।।

तत्त्वचिन्तनपरेषु केषुचित् कस्यचित् प्रियसखीजनस्य च।
लोचनं सपदि चूतकोरकं प्राक्षपत् तु सहसेन्द्रजालवत् ।। ४३ ।।

इमाः शबर्यः काः, कीदृशोऽयं विवाहप्रस्तावः, केयं प्रभया विद्योतमाना किशोरी, कथमीदृशी दशेति चिन्तयन्तीषु काचित् सखी रसालमञ्जरीं सहसाऽद्राक्षीत् ।। ४३ ।।

पश्यतालय इदं तु कौतुकं मञ्जरीमदनबाणबल्लरी।
प्रोदिता समयमन्तरा स्वयं संगता विटपिना च माधवी ।। ४४ ।।

सख्यः ! इदं कौतुकं तु पश्यत यत् कामबाणबल्लरी रसालमञ्जरी अकाले समुद्गता, माधवीलता च स्वयं तरुणा संगता ।। ४४ ।।

आलयश्चकितमानसास्ततः पुष्पितां घनवनीं व्यलोकयन्।
कूजितं परभृतोऽपि शुश्रुवुर्नव्यमेव विपिनं तदाऽभवत् ।। ४५ ।।

ततः सर्वा आलय आश्चर्यचकिता विपिनं निखिलमपि कुसुमितं व्यलोकयन्, परभृतोऽपि कूजितं शुश्रुवुः। किम्बहुना, निखिलमपि विपिनं नवीनमिवादृश्यत ।। ४५ ।।

माधुरीछुरितनिस्स्वनैर्द्विजाः प्रस्तुवन्ति मधुमासवैभवम्।
उत्कयन्ति पथिकान् विशेषतः सूचयन्ति शकुनं शुभायति ।।४६।।

पक्षिणो माधुर्यपूर्णध्वनिभिर्वसन्तस्य विभुतां गायन्ति, विशेषतः पथिकान् उत्कण्ठायुतान् कुर्वन्ति, कल्याणजनकं शकुनं सूचयन्ति च ।।४६ ।।

हर्षविस्मयविशाललोचनाः किन्नु चैतदिति निर्णयाकुलाः।
शुश्रुवुश्च महतीमधुस्वरं व्याप्नुवन्तमभितो दिशः समाः॥ ४७॥

हर्षाश्चर्याभ्यामुत्फुल्लनयनाः किमेतदिति निश्चयकोटिं प्राप्तुमसमर्थाः सख्यः शबर्यश्च सर्वां दिशं व्याप्नुवन्तं नारदस्य महतीवीणायामधुरं स्वरं श्रुतवत्यः॥ ४७॥

गोस्तनीर्विफलयन् सुधावधिः किन्नराननितराञ्च किङ्करान्।
मोहयन् सुरगणान् बलात् स्वरः काश्यपीमधिगतश्शनैश्शनैः॥

ततो द्राक्षारससहोदरः सुधारसोपमः स्वरः किन्नरान् नितरां माधुर्येणाधरयन् सुरान् मोहयंश्च शनैः शनैः पृथिवीमापत्॥ ४८॥

पारिजातमधुलुब्धषट्पदां स्फालयन् स महतीं मुहुर्मुहुः।
नारदो नरकदारकस्तदा लक्षितो विकचपद्मलोचनः॥ ४९॥

देवकुसुमस्य मधुना लुब्धद्विरेफवतीं महतीं वीणां स्फालयन् नरकध्वंसकारको नारदः फुल्लारविन्दनयनस्तदा लक्षितः॥ ४९॥

धामतो धवलयन् धरातलं कीर्तयन् हरिगुणांश्च वीणया।
लोपयन्नघचयं विलोकनाद् दागतश्शबरसुभ्रुवां भुवम्॥ ५०॥

स नारदो धाम्ना पृथिवीं प्रकाशयन्, वीणया हरिगुणान् कीर्तयन्, विलोकनेन पापपुञ्जं नाशयंश्च शबरीणां भूमिं समागतः॥ ५०॥

यः श्रुतेर्वचनकोटितः स्तुतो मायया सकललोकपालकः।
पापतापचयनाशकोऽनिशं शास्त्रवाक्यविदितोऽपि निर्गुणः॥

यः श्रुतिकोटिभिः सततं श्लोकितः, स्वशक्त्या सकलस्य लोकस्य रक्षकः, पापतापस्य नाशकः, यश्च शास्त्रे वर्णितोऽपि निर्गुणः। शेषं परेण सम्बद्धम्॥ ५१॥

योगिभिर्न सुलभः समाधिना भक्तमानसमयूरवारिदः।
गोपवृन्दपरिवारितोऽजनिः सोऽधुना व्रजवनीं निषेवते॥ ५२॥

समाधौ योगिभिरपि न सुलभः, अथ च भक्तानां मानसमयूराणां जलदः, गोपैः परिवेष्टितः, अजन्माऽपि सम्प्रति व्रजविपिनं निषेवते॥ ५२॥

श्रीपतिः सुरगणैरपि स्तुतः स्तौति तां वृषभानुजामहो।
याचतेऽधरसुधां नभोऽम्बुपस्तत्पदाम्बुजयुगे पतन्निव॥ ५३॥

स देवगणैः स्तुतोऽपि प्रसिद्धां तां वृषभानुजां स्तौति। चातक इव तस्याः पदपङ्कजे पतन् अधरसुधां याचते॥ ५३॥

राधिकापि वनमालिकेव साऽऽह्लादिनी तदुरसि स्थिता सती ।
माधवं रमयते न दूरतः शक्तितो विरहितः शिवः शवः ॥

साऽऽह्लादिनी शक्तिः श्रीराधा वक्षःस्थले स्थिता सत्येव माधवं रमयते दूरतो न । यथा शक्तिरहितः शिवः शव एव भवति । अतः शक्त्यैव शक्तिमतो महत्त्वम् ॥ ५४ ॥

राधिकापदयुगं गवेषयन् देवलोकत इह व्रजे स्थितः ।
वीणयन् स शबरीसुखो मुहुः कृष्णपादमधुपो हि नृत्यति ॥ ५५ ॥

अतोऽहं श्रीराधापदयुगमन्विष्यन् देवलोकत इह व्रजे समागतः । अथ च शबरीभिः सह श्रीकृष्णपादपङ्कजमधुपः स नारदो वीणया गायन् नृत्यति ॥ ५५ ॥

कीर्त्तयत्सु गुणधाम माधवं वर्णयत्सु हरिहारराधिकाम् ।
बालमूर्तिरसराज आव्रजन् तेषु वारिदरुचिर्विलोकितः ॥ ५६ ॥

सकलगुणनिधानं माधवं कीर्त्तयत्सु हरेर्हाररूपायाः श्रीराधाया गुणान् वर्णयत्सु तेषु नारदप्रभृतिषु सत्सु बालमूर्त्तिः जलदकान्तिः रस-स्वरूपः श्रीकृष्ण आगच्छन् विलोकितः ॥ ५६ ॥

वामबाहुधृतवेणुरोपकं दन्तवस्त्रसुधयाभिपूरयन् ।
बर्हिपिच्छनिचितालको नटः कुन्तलावृतकपोलमण्डलः ॥ ५७ ॥

मनोहरेण बाहुना धृतस्य वेणोश्छिद्रमधरसुधया पूरयन् अर्थाद् वंशीं वादयन् मयूरपिच्छेनालङ्कृतमलकं धारयन् अलकैरावृतेन कपोल-मण्डलेन युक्तो रसराजः श्रीकृष्णो विलोकित इति पूर्वेण सम्बन्धः ॥ ५७ ॥

नर्तयन् शिखिकुलं स्वयं नटन् माधवः सपदि वेणुनिस्वनैः ।
कीर्तयन् मधुरनामराधिकां बाधिकां प्रियजनांहसस्ततेः ॥ ५८ ॥

पुनर्माधवः स्वयं नृत्यन् वंशीनिनादैश्च मयूरानपि नर्तयन्, भक्तानां पापतापबाधकं राधिकेति मधुरं नाम कीर्तयन् सपदि विलोकितः ॥ ५८ ॥

राधिके हृदयतापदारिके साधिके झटिति सर्वकर्मणः ।
शर्मदे प्रणतभक्तिदे प्रिये कामदे मम दयस्व भामिनि ॥ ५९ ॥

हृदयसन्तापनाशिके, शीघ्रं सर्वस्य कर्मणः साधिके, सुखदे, प्रणतानां जनानां भक्तिदे, हे प्रिये भामिनि राधिके मम दयस्व ॥ ५९ ॥

चन्द्रिकारहितचन्द्रमा यथा मञ्जरीविरहचूतपादपः ।
पद्मिनीविरहितस्तडागको राधिकारहितमाधवस्तथा ॥ ६० ॥

यथा चन्द्रिकां विना चन्द्रो न शोभते, यथा च मञ्जरीं विना रसालो निस्तेजाः, यथा च कमलिनीमन्तरा तटाको निःश्रीको भवति, तथा माधवोऽपि श्रीराधां विना न शोभते ॥ ६० ॥

इत्यभिष्टुवति दिव्यरूपिणीं माधवे विबुधराधिते तदा ।
सस्मितञ्च शबरीवचोऽमृतं प्रोदभूद् गगनपुष्पवर्षणम् ॥ ६१ ॥

इत्थं तदा दिव्यरूपां श्रीराधां स्तुवति विबुधवन्द्ये माधवे सति नभसः कुसुमवृष्टिः, समन्दहासं शबरीसुधावचः समुदभूत् ॥ ६१ ॥

राधिकेऽनितरधन्यते त्वयाऽऽकृष्यते विबुधवन्द्यवन्दितः ।
निर्गुणोऽपि गुणितां भजन्नयं सेवितुं तव पदाब्जमागतः ॥ ६२ ॥

श्रीराधे ! त्वमतीव धन्या, यया त्वया विबुधैर्वन्द्यैरपि वन्दितः श्रीकृष्णः समाकृष्यते । गुणातीतोऽपि सगुणः सन् तव चरणकमलं सेवितुं समागतः ॥ ६२ ॥

सख्यभावविपरीतबुद्धयो जातिदोषनिगमागमा बुधाः ।
आचराम विधिहीनकर्म यत् तत् क्षमस्व सुरवन्दिते वयम् ॥ ६३ ॥

हे देववन्दिते श्रीराधे, सखीभावेन त्वयि मनुष्यबुद्धया जातिदोषात् निगमे आगमे चाज्ञानेन च विधिहीनं यत् कर्म वयं शवर्य आचरितवत्यः, तत् क्षमस्व ॥ ६३ ॥

त्वत्पदाब्जपतिता अजे वयं ज्ञानशून्यहृदयाः फलाशनाः ।
हीरकेऽप्युपलदृष्टयः सदा यौचिती भगवतीति तां कुरु ॥ ६४ ॥

हे देवि, ज्ञानशून्याः, फलमूलाशनाः, हीरकेऽपि सामान्यप्रस्तरधियः सम्प्रति तव चरणकमले वयं पतिताः । भगवति, यदुचितं तद् विधेहि ॥

दिव्याम्बरां दिव्यतनुं मुखाब्जां धम्मिल्ललक्ष्म्या ग्रसितेन्दुकान्तिम् ।
माणिक्यमुक्तागलहारिहारां समर्च्य राधां नयनाभिरामाम् ॥

दिव्यवस्त्रां दिव्यशरीरां कमलमुखीं केशपाशकान्त्या वर्द्धितमुखकान्तिं माणिक्यमुक्ताहारधारिणीं मनोहरां राधां समर्च्य पुलिन्दकन्या धन्या अभवन्, इति परेण सम्बन्धः ॥ ६५ ॥

देवाङ्गनामण्डलमण्डितास्यां पीयूषवाणीं तिलकाङ्कभालाम् ।
कृष्णप्रियां कृष्णकचां मनोज्ञां विलोक्य राधां भुवनैकलक्ष्मीम् ॥

देवाङ्गनानां समूहेन भूषितं मुखं यस्यास्ताम्, अमृतवचनाम्,

तिलकालङ्कृतललाटाम्, कृष्णस्य प्रियाम्, कृष्णकेशीम्, मनोहरां त्रिभूवन-लक्ष्मीम्, श्रीराधां विलोक्य पुलिन्दकन्या धन्या अभवन्निति परेण सम्बन्धः ॥

वीणास्वनैः कर्णसुधाप्रवाहैः संस्तुत्य राधां मधुसूदनाङ्काम् ।
कृष्णञ्च योगेश्वरपद्मनेत्रं पुलिन्दकन्या अभवन् हि धन्याः ॥ ६७ ॥

मधुसूदनेनालङ्कृतोऽङ्को यस्यास्तां राधां पद्मनयनं योगेश्वरं कृष्णञ्च श्रोत्रसुधावर्षिभिर्वीणाशब्दैः स्तुत्वा पुलिन्दकन्या धन्या अभवन् ॥

व्रजाङ्गनापादसरोजधन्यो वृन्दाटवीकुञ्जनिकुञ्जधन्यः ।
देवर्षिमुख्यो व्रजवासधन्यो गायन्नगात् कीर्तिसुतागुणालिम् ॥ ६८ ॥

व्रजाङ्गनानां पादसरोजदर्शनेन धन्यः, वृन्दावनस्य निकुञ्जलीलावलोकेनेन धन्यः, व्रजभूमिनिवासेन च धन्यो देवर्षिः नारदो राधागुणावलिं गायन् नभोमार्गेण निर्गतः ॥ ६८ ॥

विचिन्तयन्ती यमनन्यलक्ष्या राधा च राध्या निखिलैर्निलिम्पैः ।
स लोकनाथोऽपि तदा सनाथो राधाभुजाङ्केन यदा गृहीतः ॥

अखिलैः सुरैः संराध्या राधा एकमात्रलक्ष्यं यं विचिन्तयति, स लोकनाथः कृष्णोऽपि यदा श्रीराधाभुजाभ्यां निगडितो भवति, तदा स सनाथो भवति ॥ ६९ ॥

पुलिन्दकन्याभिरङ्कृताभिर्वक्षोजभारानतमस्तकाभिः ।
राधामुरारी अनुगम्यमानौ वगाहिषातां नवनीपकुञ्जम् ॥ ७० ॥

पीनस्तनाभ्यां नतशिरोभिर्भूषिताभिरनुस्त्रियमाणौ राधामुरारी नूतनकदम्वकुञ्जं जग्मतुः ॥ ७० ॥

कलिन्दकन्या पुलिने पुलन्ध्यः कदम्बकुञ्जावलिलम्बदोलौ ।
परस्परं बाहुपिनद्धबाहू आन्दोलयन्ते रसरूपिणौ तौ ॥ ७१ ॥

यमुनायास्तटे शबर्यः कदम्वकुञ्जे लम्बायां दोलायां परस्परं बाहुभ्यां बाहू परिगृह्य वर्तमानौ राधामाधवौ आन्दोलयन्ते ॥ ७१ ॥

कमलबकुलमालागुच्छवक्षोजवामा
नलिननयननन्द्या सर्ववन्द्याऽटवीयम् ।
परिसरभुवि यस्याः श्रौतवाक्यैकगम्यो
व्रजयुवतिसखीभिर्नर्त्यते तालिकाभिः ॥ ७२ ॥

कमलानां वकुलानाञ्च मालाया गुच्छाभ्यां वक्षोजाभ्यां हृद्या, नलिनाभ्यां नयनाभ्यां मनोहरा सर्ववन्दनीया चेयमटवी । यस्याः परिसरभुवि श्रुतिवाक्यैर्गम्यः श्रीकृष्णो व्रजयुवतिततिभिः सतालं नर्त्यते ॥ ७२ ॥

सिंहास्तदा मुक्तविरोधभावा गर्जन्ति सानन्दममन्दशब्दाः।
उदस्य पुच्छानतिधीरवीङ्खा लिहन्ति राधारमणांघ्रिरेणूः ॥७३॥

दोलोत्सवे विरोधभावं परित्यज्य सिंहाः सानन्दा अमन्दध्वनिभिर्गर्जन्ति। पुच्छानुदस्यातिधीरगत्या राधामाधवयोश्चरणयो रेणूरास्वादयन्ति ॥ ७३ ॥

दोलायमानौ शबरीसखीभिः संस्तूयमानौ वनदेवताभिः।
स्वागम्यमानौ मृगपक्षियूथै राधामुरारी जयतां समन्तात् ॥७४॥

शबरीभिर्दोलायमानौ, वनदेवताभिर्गीयमानौ, मृगपक्षिसमूहैः स्वागम्यमानौ राधामुरारी समन्तात् जयताम् ॥ ७४ ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः।
तद्राधिकाचरणचिन्तनचारुकाव्ये
सम्पूर्तिमापदयमष्टमदिव्यसर्गः ॥ ७५ ॥

श्रीमङ्गलायां श्रीचन्द्रशेखरबुधात्समुत्पन्नेन श्रीकालिकाप्रसादशुक्लेन निर्मिते श्रीराधाचरणचिन्तने चारुकाव्येऽयं दिव्योऽष्टमः सर्गः समाप्तिमगमत् ॥ ७५ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रयपरिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन प्राप्तस्वर्णपदकेन श्रीजानकीजानिना व्याख्यातसम्पादितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते श्रीराधाचरितमहाकाव्येऽष्टमः सर्गः समाप्तः ॥

नवमः सर्गः

पयोधरोत्सेधनिपीडिताङ्गो व्यायामसंवेष्टितविश्वरूपः ।
आरुह्य दोलां जलदाभकृष्णो बिम्बाधरं चुम्बति राधिकायाः ।।१।।

श्रीराधायाः क्रोडे विश्वरूपोऽपि समुपविष्टः, अत एव पयोधराभ्यां पीडिताङ्गो नवनीरदाभः श्रीकृष्णो दोलामधिरुह्य बिम्बाधरं चुम्बति ।।१।।

राधापि संबाधितसर्वबाधा वामोरुमूले स्थितकान्तवक्त्रम् ।
निस्वेदयन्ती व्यजनाञ्चलैस्तं कृष्णं विलासात् परिरम्भतेऽलम् ।।२।।

सकलकल्याणकारिणी राधापि जघने स्थितं मनोज्ञं मुखं यस्य तं श्रीकृष्णं स्वाञ्चलव्यजनैर्निस्वेदयन्ती विलासादलं समालिङ्गति ।। २ ।।

कृष्णस्य वेषं परिधाय वंशीं राधाऽधराभ्यां मृदु वादयन्ती ।
.गोपाङ्गनामूर्त्तिमहो मुरारिं निरञ्जनं नर्तयते सतालम् ।। ३ ।।

कृष्णवेषेण वंशीमधराधराभ्यां मधुरं वादयन्ती श्रीराधा गोपाङ्गनामूर्त्तिधरमपि निरञ्जनं मुरारिं सतालं नर्तयत इत्याश्चर्यम् ।। ३ ।।

रामाः सदा वामहृदः स्वभावात् कर्षन्ति चेतः किल कान्तिरज्ज्वा ।
कृष्णोऽपि दृष्टान्त इति व्रजेऽस्मिन् वचस्तदा खे मरुतां व्यभासीत् ।।

स्त्रियः सदा स्वभावात् प्रतिकूला एव । यतो हि जनानां चेतः स्वकान्तिरज्वा कर्षन्ति, । किलेति प्रसिद्धौ । अत्र भगवान् कृष्णोऽपि दृष्टान्ततया व्रजे समुपस्थापयितुं शक्यते इति देवानां वचस्तदा नभसि चचार ।।

नीवारनिश्शेषितजीविकार्धि समाधिसंबाधितमानसाब्धिम् ।
निवृत्ततर्षञ्च बलान्मुनीन्द्रं वामाऽबलाऽप्युत्तरलीकरोति ।। ५ ।।

वन्यधान्यैर्नीवारैरपि जीविकां निर्वहतः, समाधिना मानससागरवेगं निरोधं नयतोऽत एव निवृत्ततर्षान् मुनीन्द्रानपि प्रतिकूलाऽबलापि तरलान् करोति ।। ५ ।।

विद्यातपःख्यापितकीर्तिराशेर्दूरेऽपि वासं दधतो जनस्य ।
रश्मिं विनाऽमूर्त्तमनः कृषन्ती दासीकरोति स्वपदस्य रामा ।।६।।

विद्यातपोभ्यां यस्य कीर्तिर्विख्याता वर्तते, यो दूरे निवासं करोति, तस्यापि रज्जुं विनाऽमूर्त्तमपि मनः समाकृष्य स्वानुचरं करोति ।। ६ ।।

सम्मोहितः प्राङ्मधुरच्छटाभिश्चाटूक्तिभिः कैतवकीर्तिताभिः ।
वशीकृतात्मा सुजनोऽपि सद्यो विमुच्यते दर्शितदोषजालः ।।७।।

प्राग् रामाभिर्मधुराभिः कान्तिभिर्जनः सम्मोह्यते, पुनः कैतवपूर्णाभिरापाततो मनोनुकूलाभिर्वाग्भिर्वशीकृतः सुजनोऽपि जनो दोषप्रदर्शनपुरस्सरं परित्यज्यते सद्यः ॥ ७ ॥

आदृत्य तैः कृत्रिमचारुवाक्यैः सम्भाव्य वामा नितरां कटाक्षैः ।
निवृत्तचित्तं विषयात् पुमांसं लक्ष्यावलक्ष्यं नयतीति चित्रम् ॥ ८ ॥

विषयेभ्यो निवर्तमानमपि पुरुषं छद्मयुग्भिर्मनोरमैर्वंचनैस्तैस्तैरादृत्य कटाक्षैः सम्भाव्य च वामा पथादुत्पथं नयतीति चित्रम् ॥ ८ ॥

इत्थं वचस्तत्त्वमजानतां तत् परस्परं संलपतां सुराणाम् ।
पद्मासनः पद्मकरो विधिज्ञः स्त्रीपुंसभावं रसमानुनाव ॥ ६ ॥

वस्तुतत्त्वमजानतां परस्परमित्थं तद् वचो वदतां देवानां पुरो विधिज्ञो विधिर्हस्ते पद्मपुष्पमादाय स्त्रीपुरुषरूपेण परिणतं रसं स्तुतवान् । सुराणामित्यनादरे वा षष्ठी । इत्थं प्रतिपादयतोऽनादृत्येत्यर्थः ॥ ९ ॥

त्वं सर्वमूलं जगदादिहेतो त्वत्तः परं तत्त्वमतत्त्वमस्ति ।
भक्तस्य कामाय विभिन्नरूप स्त्रीपुंसभावं मधुरं दधासि ॥ १० ॥

हे जगत आदिकारण, त्वदतिरिक्तं परं तत्त्वं नास्त्येव । भक्तेच्छया हे तत्तद्रूपधारक, मधुरं स्त्रीपुंसरूपं दधासि ॥ १० ॥

व्रजाङ्गनानां किल भूरिभाग्यात्पुलिन्दकन्याश्च पदं स्वकीयम् ।
साक्षात् समारोपयितुं कृपालो अजोऽपि जातो वसुदेवगेहे ॥

पतिभावेन समुपासमानानां व्रजवनितानां फलप्रदानाय, शबरीः साक्षात् स्वं पदं प्रापयितुञ्च हे दयालो, अजोऽपि त्वं वसुदेवसद्मनि जन्म लेभे ॥ ११ ॥

गुणैर्विहीनोऽपि गुणाकरस्त्वं कुलाद्विहीनोऽपि यदोः कुलेजः ।
सहस्रदारोऽपि जितेन्द्रियस्त्वं निराश्रयस्त्वं सकलाश्रयोऽसि ॥१२॥

निर्गुणोऽपि गुणसागरः, कुलविहीनोऽपि यदुवंशजातः, सहस्रकान्तोऽपि जितेन्द्रियः स्वयमाधारहीनोऽपि त्रैलोक्याधारस्त्वमसि ॥१२ ॥

त्वं राधिकाऽऽसादितदाररूपा पुम्भावमासाद्य च माधवस्त्वम् ।
प्रगीयसे शास्त्रपुराणविद्भिर्भेदं द्वयोर्दीनधियो विदन्ति ॥

रामारूपमापन्नस्त्वमेव राधा, पुम्भावमासाद्य त्वमेव माधवः शास्त्रपुराणविद्भिः प्रगीयसे । द्वयोर्भेदं मन्दमतयो विदन्ति ॥ १३ ॥

कीर्ति सुकीर्ति वृषभानुजायां नन्दं यशोदापतिमाप्तकामौ ।
विधातुकामो व्रजमागतस्त्वं राधामुरारित्वमगाश्च लोके ।। १४ ।।

वृषभानुपत्नीं कीर्ति यशस्विनीं यशोदापति नन्दश्च पूर्णकामौ कर्त्तुं व्रजभूमिं समागतस्त्वं राधामुरारिशब्देन लोके प्रसिद्धः ।। १४ ।।

ब्रह्मस्तुतिं श्रोत्रमनोऽभिरामां निपीय देवा नतमूर्धभागाः ।
स्त्रीपुंसभावं रसरूपतत्त्वं प्रणम्य दोर्भ्यां विजहुर्हि शङ्काम् ।।१५।।

ततो देवा मूर्द्धानमानम्य कर्णमनसोरानन्ददं स्तवं सादरं श्रुत्वा स्त्री-पुरुषरूपं रसतत्त्वं बाहुभ्यां प्रणम्य साधारणस्त्रीपुरुषसम्बन्धिनीं शङ्कां त्यक्तवन्तः ।। १५ ।।

नीपे निबद्धां सुमसज्जदोलामारोप्य राधां रमणीयतान्ताम् ।
पीताम्बरश्चञ्चलताडपत्रश्शनैश्शनैर्दोलयते मुरारिः ।। १६ ।।

कदम्बे निबद्धां कुसुमसज्जितां दोलां परमरमणीयां श्रीराधां समुपवेश्य चञ्चलकपोलकुण्डलः पीताम्बरो मुरारिश्शनैश्शनैर्दोलयते ।।

मुक्ताचयं पद्मदले लसन्तं प्रस्वेदबिन्दुं वदने कराभ्याम् ।
अङ्कस्थितायाः प्रियराधिकायाः प्रोञ्छन् वरां प्रीतिमवाप कृष्णः ।।

क्रोडे समुपविष्टायाः श्रीराधाया मुखपद्मे मुक्ताचयमिव शोभमानं स्वेदबिन्दुं प्रोञ्छन् श्रीकृष्णः परां प्रीतिं प्राप्तवान् ।। १७ ।।

विहाय दोलां वृषभानुजायाः सेवानिकुञ्जं श्रमतो गतायाः ।
पादारविन्दं व्रजराजसूनुः संवाहयन् स्तूयत एव युक्तैः ।।१८।।

श्रमाधिक्यात् दोलां परित्यज्य सेवानिकुञ्जं गतायाः श्रीराधायाः पादपद्मं संवाहयन्नपि व्रजराजसूनुर्योगिभिः प्रशस्यत एव ।। १८ ।।

यमानुजायाः कमनीयकूले विभावरी कान्तमरीचिमाले ।
व्रजाङ्गनामण्डलमण्डितेले राधामुरारी लसतोऽन्तराले ।। १९ ।।

कलिन्दगिरिकन्याया हृदयहारिविधुकरैर्लिप्ते व्रजवनितामण्डलमण्डिते तीरे मध्ये राधामुरारी शोभेते ।। १९ ।।

राधा वशामण्डलमध्यभागे निधाय वंशीं मधुराधरेऽस्थात् ।
पश्चाच्च तस्या रसमूर्तिकृष्णस्तामेव वंशीमधरे दधानः ।। २० ।।

व्रजाङ्गनानां मण्डलमध्ये श्रीराधा मधुराधरे वंशीं निधाय स्थिता पश्चाद्रसरूपः श्रीकृष्णस्तामेव वंशीं स्वाधरे धृतवान् ।। २० ।।

गोप्यस्तदाकूतमितीक्षणाभ्यां संकेतयन्त्यो मृदुहासमूचुः ।
माया परब्रह्मणि नैव लीना व्यत्यासमत्रैव निभालयामः ॥२१॥

इति वंशीधारणप्रकाररूपं कृष्णाभिप्रायं नयनाभ्यां संकेतयन्त्यो मृदुहासं 'माया परब्रह्मणि नैव लीना, अपि तु ब्रह्मैव मायायां लीनमिति निभालयामः'। वेदान्तिमते निखिलं स्थूलं जगद् मायायां लीयते, माया च परब्रह्मणि; किन्त्वत्र विपरीतमेव पश्यामः ॥ २१ ॥

पिनद्धपीनस्तनमण्डलाग्राः कच्छाटिकाबद्धनितम्बचक्राः ।
पारेसहस्रं व्रजवामरामाः स्थितास्तदा मण्डलतामुपेताः ॥२२॥

पीनौ स्तनौ कञ्चुकेन दृढं निबद्धस्य कच्छाभ्यां चक्रनितम्बं नियम्य सहस्रं व्रजवनिता मण्डलाकारेण स्थिताः ॥ २२ ॥

सुमावलीमण्डितकुन्तलानामामोदलुब्धा मधुपाः समन्तात् ।
गुञ्जन्ति रासस्य यशोवितानं विख्यापयन्तीव च गोपिकानाम् ॥

गोपाङ्गनानां कुसुमसज्जितानां केशलकलापानां सौरभेणाकृष्टा भ्रमरा गुञ्जन्तो रासस्य यशःपताकां विस्तारयन्तीव ॥ २३ ॥

मुक्ताकलापाकुलकम्बुकण्ठ्यः पीताङ्गिकाचुम्बितचीननाभाः ।
संव्यानसंवेष्टितगौरदेहा गोप्यो विभान्तीव तडिल्लताभाः ॥

मुक्ताकलापैर्भूषितकण्ठदेशाः, पीतकञ्चुकैः पिहितनाभिप्रदेशाः, उत्तरीयैर्वेष्टितगौरशरीरा गोप्यो विद्युल्लता इव शोभन्ते ॥ २४ ॥

तमालकेशच्युतगुच्छपुष्पैर्व्रजाङ्गनानां पदकञ्जवृन्दैः ।
सितादुकूलैर्यमुनावनिः सा महाकवीनामपि नैव वर्ण्या ॥ २५ ॥

व्रजवनितानां तमालबालेभ्यश्च्युतैः पुष्पैः पदकमलैः शर्करावसनैश्च सा यमुनातटी महाकविभिरपि वर्णयितुं न शक्याऽभूत् ॥ २५ ॥

परस्परं हस्तगृहीतहस्ताः पाथोजपञ्चाङ्गुलिदण्डिकास्ताः ।
क्रमेण तालोपरि दत्ततालाा राधामुरारी परितश्च बालाः ॥२६॥

अन्योन्यं हस्तौ गृहीत्वा कमलांगुलौ गृहीतदण्डिकाः क्रमेण तालोपरि तालं ददानाश्च बाला राधामुरारीं परित आसन् ॥ २६ ॥

मध्ये तयोराननपर्वचन्द्रं सन्मण्डलाकारतया स्थितास्ताः ।
सहैव पश्यन्ति चकोरनेत्रा अचिन्त्यसामर्थ्यमलौकिकानाम् ॥२८॥

श्रीराधामाधवयोर्मुखचन्द्रं मण्डलाकारेण स्थितास्ताश्चकोरनेत्रा गोपिकाः सहैव पश्यन्ति । अलौकिकानां सामर्थ्यमचिन्त्यम् ॥ २७ ॥

शरत्प्रसूनैरतिरम्यविश्वा विनष्टपङ्का रविजापि रम्या।
वर्षर्तुवार्धक्यमिवात्र काशाः कालानुभावोऽप्रतिमप्रभावः ॥२८॥

धरा शरदः कुसुमैरतिरम्याऽभूत्, यमुनाऽपि निर्मला जाता, काशा वर्षर्तु वार्द्धक्यं सूचयन्ति। कालोऽप्रतिमप्रभावो भवति ॥ २८ ॥

मही शरच्चन्द्रमरीचिचेला पुष्पाटवीलम्पट आशुगोऽपि।
ह्लदाश्च नद्यो विमलाः पयोदा रासं प्रशंसन्ति खगालिरावैः ॥२९॥

मही शरदश्चन्द्रकिरणं वस्त्रं वसानाऽभूत्, पवनोऽपि पुष्पवने विहरन्नभूत्, तडाकाः सरितो निर्मला मेघाश्च पक्षिशब्दै रासक्रीडां प्रशंसन्तोऽभूवन् ॥ २९ ॥

सरोजपुञ्जैर्विमलैश्च तोयैर्ह्रदे च नक्षत्रचयाक्षतैः खे।
सा कूजितैः केसरिनादवाद्यैर्ज्योतिष्मती प्रार्चति रासरामा ॥३०॥

सरसः सरोजैरमलैस्तोयैश्च नभसो नक्षत्राक्षतैः पक्षिणां कूजितैः, केसरिणां नादवाद्यैर्ज्योतिष्मती विभावरी रासस्य व्रजवनिताः प्रार्चति ॥

नृत्ये नदीष्णां नवनीतमृद्व्यः कुलाङ्गना भूषणभूषिताङ्ग्यः।
रासेश्वरीवादितवेणुरावैः प्रारप्सता लौकिकनृत्यगीतम् ॥३१॥

नवनीतकोमला नृत्यकुशला भूषणभूषिताः कुलाङ्गना गोप्यः श्रीराधावादितवंशीस्वनैः सममेवालौकिकं नृत्यं गीतञ्च प्रारप्सत ॥ ३१ ॥

काञ्चीस्वनैः कङ्कणझङ्कृतैश्च मञ्जीरमञ्जुध्वनिभिः स दृप्तः।
वंशीरवो माधवराधिकाया व्यामोहयत् तानपि वीतरागान् ॥३२॥

व्रजबालानां काञ्चीनिःस्वनैः, कनकवलयझङ्कारैः नूपुरमधुरध्वनिभिर्मिश्रितो राधामाधवयोर्वंशीनादस्तान् वीतस्पृहानपि व्यामोहयत् ॥३२॥

किञ्चित् क्षणानन्तरमेव भूयस्तन्मण्डलं भिन्नमिवावतस्थे।
एकैकगोप्या सह माधवोऽभूत् तस्मिन् क्षणे राधिकयाऽपि मध्ये ॥

पुनः किञ्चित् कालानन्तरमेव गोपीमण्डलं भिन्नमिवाभूत्। तच्चैवम्—एकया गोप्या सह माधवोऽभूत्, तस्मिन्नेव क्षणे मध्ये श्रीराधया सहापि कृष्ण आसीत् ॥ ३३ ॥

मयैव साकं नटराजराजो नान्यापि काचित् सुभगा यथाहम्।
इत्थं मनोभावपरम्परायामेकाकिनीं स्वां सकलापि मेने ॥ ३४ ॥

श्रीकृष्णो मयैव शाकं नृत्यतीति यथाऽहं सौभाग्यशालिनी तथाऽन्या

कापि गोपी नास्ति। इत्थं मनोभावो यदा सर्वासामभूत् तदा सर्वा अपि स्वामेकाकिनीमपश्यन्। अर्थात् सोऽन्तर्हितोऽभूत्॥ ३४॥

यस्याः सदा शारदचन्द्रवक्त्रं ज्योत्स्नाप्रियः पश्यति माधवोऽपि।
सैकाकिनी शून्यमनास्तदानीं तं प्रेक्षितुं धावति सर्वदिक्षु॥ ३५॥

यस्याः श्रीराधायाः पूर्णं शारदचन्द्रमुखं चातक इव माधवोऽपि पश्यति, सापि तदानीं शून्यहृदया माधवं प्रेक्षितुं सर्वासु दिशासु धावति॥ ३५॥

गोप्योऽपि सर्वाः किल कातराक्ष्यो दिशासु सर्वास्विति भाषमाणाः।
आयाहि रे वल्लभ वल्लवीनां त्वामेव गच्छन्त्यसवोऽन्यथा नः॥३६॥

सर्वा गोप्योऽपि 'हे गोपीनां वल्लभ, शीघ्रमायाहि, अन्यथाऽस्माकं प्राणास्त्वामेव गच्छन्ति' इति क्रन्दन्त्यो दीनाः सर्वासु दिक्षु धावन्तीति शेषः॥ ३६॥

वामोरुवृन्दं निशि कोकवृन्दं संज्ञाविहीनामपि रासमुख्याम्।
आश्वासयन् मन्मथमन्मथोऽपि प्रत्यागतो रासभुवं तदानीम्॥३७॥

नक्तं कोकवृन्दमिव वामोरुवृन्दं चेतनाशून्यां रासे प्रधानां श्रीराधाञ्च कामदर्पदलनोऽपि श्रीकृष्णः समश्वासयन् रासस्थानं पुनरागतः॥ ३७॥

पुनश्च तासां कमलेक्षणानां द्वयोर्द्वयोर्मध्यमतां दधानः।
मध्येऽङ्गनं राधिकयापि नृत्यन्नलक्षि कान्ताभिरसंख्यरूपः॥३८॥

पुनः कमललोचनानां व्रजाङ्गनानां द्वयोर्द्वयोर्मध्यगोऽपि श्रीराधया सह नृत्यन्नपि अङ्गनानां मध्येऽसंख्यरूपस्ताभिः कान्ताभिः स कृष्णोऽलक्षि॥ ३८॥

रात्रिस्तदा सा व्यवधानशून्या निशाधिनाथोऽपि स एक एव।
कियत्प्रमाणः समयः स चासीदित्यादि वक्तुं प्रभवेन्न कोऽपि॥३९॥

रासकाले एकैव रात्रिरासीत्, चन्द्रोऽप्येक एवासीत्, कियान् समयोऽभूदित्यादि सर्वं वक्तुं ब्रह्मापि न प्रभवति॥ ३९॥

दिव्या मही दिव्यकला तमिस्रा गोप्यश्च दिव्याः पुलिनञ्च दिव्यम्।
वाद्यानि दिव्यानि मुकुन्दरासे किं चिन्तनीये कविनाप्यचिन्त्ये॥

मुकुन्दस्य रासे धरा, रात्रिः, पुलिनम्, गोप्यश्च—एतत् सर्वं दिव्यमासीत्, न किमपि प्राकृतम्। अतोऽचिन्त्ये वस्तुनि भार्गवेणापि पूर्वोक्तश्लोकवर्णितं किमपि वस्तु चिन्तनीयं नास्ति॥ ४०॥

रसस्वरूपा सुरवृन्दवन्द्या राधापरा शक्तिरमेयरूपा ।
यत्रास्ति मुख्या बत तत्र तर्कः पङ्गोः सुमेरोरपि लङ्घनं स्यात् ॥

देवैरपि वन्द्याऽमेयरूपा, परा शक्तिः, रसस्वरूपा श्रीराधा यस्मिन् रासे मुख्या वर्तते, तत्र तर्कः पङ्गोः सुमेरोरपि लङ्घनं स्यात् ॥ ४१ ॥

तस्मादसाध्ये त्वनिरूपणीये कुकल्पना नैव मुदे सतां स्यात् ।
ततः सुधीभिर्विधिना विधेयं रासेश्वरीकीर्तनमेव नित्यम् ॥४२॥

उक्तहेतोरसाध्येऽनिरूणीये च वस्तुनि असत्कल्पना सतां मोदाय न स्यादिति मनीषिभिर्विधिना श्रीराधाया नित्यं पादवन्दनमेव विदध्यात् ॥४२॥

व्रजाङ्गनामासमहाव्रतस्य मुरारिणा दत्तवरस्य सद्यः ।
रासस्य दिव्यं सकलं रहस्यं तस्याः प्रसादाद्धृदि भासितं स्यात् ॥

मार्गशीर्षमासं यावत् कृतस्य व्रतस्य श्रीकृष्णेन फलरूपेण दत्तस्य रासस्य दिव्यं सकलं रहस्यं श्रीराधायाः प्रसादान्मनसि भासितं स्यात् ॥४३॥

सा च श्रुतिः श्रोत्रसुधाः स्वरास्ते ता मूर्च्छना गोपवधू व्रजस्य ।
गीतिश्च राधाप्रियमाधवस्य सर्वं हि वृन्दावन एव लभ्यम् ॥४४॥

रासे गोपाङ्गनानां सा श्रुतिः, ते च कर्णमधुराः स्वराः, ताश्च मूर्च्छनाः, राधामाधवयोर्गीतिश्च; एतत् सर्वं वृन्दावन एव लभ्यम्, नान्यत्र ॥ ४४ ॥

विमानयानेन परिभ्रमन्ती गन्धर्वमुख्या दिविजाः समन्तात् ।
आस्वादयन्तः स्वरमाधुरीं तां क्रीडाविधिं गोचरतां न निन्युः ॥

गन्धर्वादयो देवा विमानेन नभोमार्गे परिचरन्तः स्वरमाधुरीं शुश्रुवुः, किन्तु क्रीडास्वरूपं साक्षात् ददृशुः ॥ ४५ ॥

एतादृशौ काललयौ कदाचित् गन्धर्वराजस्य सदस्सु कासु ।
नैवानुभूताविति वाक् सुराणां परस्परं खे चरतां व्यभासीत् ॥

रासे प्रयुज्यमानौ काललयौ श्रुत्वा नभसि चरतां सुराणां 'एतादृशौ काललयावस्माभिः कदापि न श्रुतौ' इति वाग् समन्तात् श्रुता ॥ ४६ ॥

कथन्न भायुर्मरुतां गिरस्ताः सा योगमाया विधिनाप्यगम्या ।
तया च राधां यदुनन्दनार्हं सम्पादितं यत् तदनन्यतन्त्रम् ॥४७॥

देवानां ता गिरः कथन्न भायुः, यतो विधिनापि ज्ञातुमशक्यथा योगमायया राधामाधवयोः क्रीडायोग्यं यत् यत् सम्पादितं तदन्येन सम्पादयितुं न शक्यते ॥ ४७ ॥

व्रजाङ्गनावर्जमहो न चास्मिन् रामाऽपि काचित् पदमादधीत ।
अतो महेशोऽपि दिदृक्षयाऽस्य व्रजाङ्गनात्वं समियाय सद्यः ॥४८॥

आश्चर्यमेतद् यदस्मिन् रासे व्रजाङ्गना विना काचन वनिताऽपि प्रवेष्टुमनर्हा । अत एवास्य रासस्य दर्शनेच्छया व्रजाङ्गनात्वं स्वीकृतवान् भगवान् महेशः ॥ ४८ ॥

हिरण्यगर्भो जगतां विधाता नारायणः पालक एव सृष्टेः ।
व्रजस्य दिव्याखिलरासलीलासम्भावनार्थं गिरितामधाताम् ॥४९॥

जगतां कर्त्ता हिरण्यगर्भः, सृष्टेः पालको नारायणोऽपि व्रजस्य दिव्यां निखिलां रासलीलां सम्मानयितुं गिरितामप्यधाताम् ॥ ४९ ॥

गोपाङ्गनावेशधृतो महेशस्तां चातुरीं नव्यकलाश्च तां ताम् ।
लास्यस्य भङ्गीमतुलां छटां तां दृष्ट्वा तदा विस्मयमाजगाम ॥

गोपङ्गनाया नेपथ्यं परिदधन् महेशस्तां चातुरीं तां तां नव्यां कलां नृत्यस्य भङ्गीमतुलां कलाश्च प्रक्ष्याश्चर्यचकितोऽभूत् ॥ ५० ॥

यदा यदाकारकचक्रवालं क्षितौ तदा व्योमतले तथैव ।
दिशोऽन्तराले समलोकि भूयो रासस्वरूपं त्रिपुरारिणा हि ॥५१॥

भगवान् महेशो रासे व्रजाङ्गनानां यादृशं मण्डलं भुवि तादृशमेव नभसि, तादृशमेव दिशोऽन्तरालेऽपश्यत् ॥ ५१ ॥

पादस्य विक्षेपणसन्ततिः सा यस्यां द्वयोर्गोपिकयोः पदानाम् ।
श्लेषोऽपि नालक्षि तडिद्गतीनः संघर्षवार्ता नितरामपास्ता ॥५२॥

अनिर्वचनीया सा पादप्रक्षेपेण परम्पराऽऽसीत्, यस्यां परम्परायां विद्युद्वेगानां पदानां संसर्गोऽपि न लक्षितः, संघर्षकथा तु नितरां निरस्ता ॥ ५२ ॥

यस्याश्च यावान्करसन्निवेशस्तावान् परस्याः कलितः कलाभिः ।
यादृक्प्लुतिस्साहसिकी पुरस्तान्नोना हि किञ्चित्कलया परस्तात् ॥

यस्या गोपाङ्गनायाः करविस्तारः, तावानेव कलाभिः पूर्णोऽन्यस्या अपि । साहसपूर्णा यादृशी प्लुतिरग्रे, तावत्येव कलापूर्णा पश्चादपि । कस्याश्चिदपि मनाङ्न्यूना नाभूत् ॥ ५३ ॥

क्षणाद् धरायां क्षणतोऽन्तरिक्षे क्षणाद् विदूरे क्षणतः समीपे ।
तौर्यत्रिकं चारु च गोपिकानां दुर्गापतिर्गोपपतेर्ददर्श ॥५४॥

व्रजाङ्गनानां चारु वाद्यनृत्यगीतत्रययुक्तं रासं क्षणं भूमौ, क्षणमा-

काशे, क्षणमतीव दूरे, क्षणं समीपे च भगवान् भूतभावनोऽपि श्रीकृष्णस्य ददर्श ॥ ५४ ॥

परस्परासक्तवियुक्तबाहू सौदामिनी नीलघनौ हि साक्षात् ।
राधामुरारी मधुराकृती तौ मध्येऽङ्गनं मञ्जुललास्यभाजौ ॥५५॥

मधुराकृतिः श्रीराधा विद्युल्लतेव, मधुराकृतिश्च श्रीकृष्णो मेघ इव व्रजाङ्गनानां मध्ये परस्परं बाहू धृत्वा त्यक्त्वा च मञ्जुलं नृत्यं कुरुतः ॥ ५५ ॥

प्रसन्नराधाब्जभुजान्तराले नृत्यन् स चोलिं स्खलनामिषेण ।
दधद्धरिः कृत्रिमनेत्रभङ्ग्या निवारितो राधिकया सहासम् ॥५६

प्रसन्नायाः श्रीराधाया भुजमध्ये नृत्यन् 'अहं पतामि' इति व्याजेन कञ्चुकीं दधत् श्रीकृष्णः कृत्रिमवक्रदृष्टया सहासं श्रीराधया निरुद्धः ॥५६॥

पीयूषसारं व्रजवल्लवीनां गीतध्वनिं झङ्कृतदिग्विभागम् ।
निपीय देवा अमरीपुरस्का औज्झन् स्वकारब्धविधेयजातम् ॥५७॥

व्रजाङ्गनानां मुखरितदिशं कर्णमधुरं गीतध्वनिं श्रुत्वा देवाः स्वीयं निखिलमपि कर्त्तव्यं परित्यज्य गीतमेव शृण्वन्तोऽभूवन् ॥ ५७ ॥

वक्षोजवामोरुतलप्रतिष्ठां पद्माङ्गुलिस्फालिततन्त्रिकांगीः ।
तां कच्छपीं मुग्धमनास्तदानीं नावादयद् विस्मृतमूर्च्छनादिः ॥५८॥

महारासे वक्षोजे मनोहरोर्वोः स्थितां कमलाङ्गुलीभिः स्फालिततन्त्रीं प्रसिद्धां कच्छपीं विस्मृतमूर्च्छना मुग्धमनाः सरस्वती वादयितुं नाशकत् ॥ ५८ ॥

लीनाः परब्रह्मणि शान्तभावाः समाधिना कुण्डलिनीभिदस्ते ।
गीतिं सुधां श्रोत्रपुटात् पिबन्तो धुवन्ति मूर्ध्नो गिरिकाननेषु ॥५९॥

गिरिषु काननेषु च परब्रह्मणि ध्यानवन्तोऽत एव शान्तचित्ताः कुण्डलिनीभिदस्ते मुनयोऽपि कर्णपुटात् सुधारसभृतां गीतिं पिबन्तो मूर्द्धानं धुन्वन्ति ॥ ५९ ॥

प्रभुक्तशष्पा मृगराजिरन्या वन्या गखालिश्च विमुक्तपिण्डा ।
माधुर्यमुग्धा मुरलीरवस्य वियन्मुखी विस्मृतचित्तवृत्तिः ॥६०॥

वंशीनादस्य माधुर्येण मुग्धा हरिणराजिरादौ भुक्तमपि घासं स्वं विस्मृत्याकाशं प्रेक्षमाणाभूत्, अन्या खगालिश्च पिण्डं परित्यज्य तथैवाभूत् ॥ ६० ॥

वत्साः समस्ताः स्तनमण्डलाग्रे दत्तानना नैव पयः पपुः स्वम् ।
गृहीतदोहा हि न गोपभार्याश्चित्रार्पिताः सस्मरुरात्मकृत्यम् ॥

वत्साः पयः पातुं मातुः स्तनमण्डले मुखं धृत्वाऽपि तदा पयसः स्वांशमपि न पीतवन्तः, गृहीतदोहनपात्रा अपि चित्रलिखिता इव स्वं कर्त्तव्यं न स्मृतवत्यः ॥ ६१ ॥

गावो निकामं रसराजचित्ता न चालिहाना मृदुचारुदेहान् ।
उत्थाप्य कर्णौ किमपि स्मरन्त्यो नापाययन् वत्सतरान् घटोघ्न्यः ॥

घटोघ्न्यो गावः श्रीकृष्णैकचित्ताः कर्णौ समुत्थाप्य किमपि स्मरन्त्यो वत्सानां कोमलशरीरं न लिहन्ति, न च तान् पाययन्ति ॥ ६२ ॥

श्रीगोकुले गोचरचारुभूमौ गवां कुलं गोपकुलं निशीथे ।
रसान्वितं रासरवैश्च सद्योऽनृत्यन् मिथो दण्डविषाणवाद्यैः ॥ ६३ ॥

श्रीगोकुलस्य मनोहरगोचरभूमौ नक्तं रासगीतैः रसयुक्तं गवां कुलं गोपकुलञ्च दण्डैर्विषाणैश्च वाद्यैरुपलक्षितं सद्योऽनृत्यत् ॥ ६३ ॥

मत्ताः कपोताः कमनीयकायाः कुलायवासा अनुरासगीतम् ।
ओङ्कारहुङ्कारगिरो गृणानाः स्वचेतसा गीतगवीमुपेताः ॥६४॥

मनोहरशरीरा मदोन्मत्ताः कपोताः कुलाये निवसन्तोऽपि रासगीतमनुसृत्य 'ओम्' 'हुम्' इति शब्दं कुर्वन्तः स्वमनसा गीतभूमिं गताः । शरीरेण कुलाये स्थिता अपि मनसा तत्र गता इतिभावः ॥ ६४ ॥

वंशीसुधास्वादरताश्च काश्चित्पार्श्वे शयानानपि काम्यकान्तान् ।
न पस्पृशुश्चाटुशतैर्वधूट्यो निश्श्रेयसं सर्वजनैर्हि काम्यम् ॥

वंशीरवरसास्वादनरताः काश्चन व्रजाङ्गनाः समीपे शयानानामपि हृद्यानां पतीनां बहुभिश्चाटुवचनैः स्पर्शमपि नाकार्षुः । निश्श्रेयसं हि सर्वजनैः काम्यते ॥ ६५ ॥

दन्दह्यमाना रविरश्मिपुञ्जैर्धारानिपातैश्च विशीर्णकाया ।
मुकुन्दपादाब्जनिविष्टचित्ता नित्यं धरित्री तप आचरन्ती ॥६६॥

रविकिरणसहस्रेणातिदह्यमाना वारिधाराभिः क्षतविग्रहा धरा श्रीकृष्णचरणारविन्दे मनो दधाना नित्यं तपः समाचरन्ती वंशान् प्रासूतेत्यग्रिमेण सम्बन्धः ॥ ६६ ॥

प्रसूनहस्ता तरला वराकी साक्षात् सुधां पातुमनीश्वरासीत् ।
वेणोस्ततो रन्ध्रत इष्टसिद्धौ प्रासूत वंशान् स्वशरीरभागात् ॥६७॥

हस्ते पुष्पाण्यादायाहर्निशं तपस्यन्त्यपि धरा मुकुन्दस्याधरसुधां साक्षात् पातुमनीश्वराऽभूत्, तदा वराकी तरला सती स्वशरीरात् वंशान् उदपातयत्, ततश्च वंशी निर्मिता, तस्याश्छिद्रद्वारा सुधां पीतवतीत्यहो भक्तिपराकाष्ठा ! ॥ ६७ ॥

कूले कलिन्द्या रसराजगीते बद्धादरायाश्च सुराङ्गनायाः ।
नीवी निबद्धा नवरश्मिजालैर्व्यस्त्र सतालं हि पुरो गुरूणाम् ॥६८॥

कलिन्दकन्याया कूले श्रीकृष्णस्य गीतं सादरमाकर्णयन्त्याः कस्याश्चित् सुराङ्गनाया नूतनरज्जूसमूहैर्दृढं बद्धाऽपि नीवी गुरूणां पुरोऽपि शिथिलाऽभूत् ॥ ६८ ॥

किन्तैर्व्रतैर्यत्नविशेषसाध्यैर्गोपाङ्गनाभावमिता न यैर्हि ।
यतोऽस्मदीयैर्नयनैर्न दृष्टो रासस्ततस्ते मुनयो विशीर्णाः ॥६९॥

तैस्तैः प्रयत्नैः सम्पादनीयैर्व्रतैः किम् ! यैर्गोपाङ्गनात्वं वयं न प्राप्ताः, यतो ह्यस्माकं नेत्रैः साक्षाद् रासो न दृष्ट इति केचन मुनयो विषीदन्त आसन् ॥ ६९ ॥

व्रजाङ्गनात्वं स्पृहयन्ति नित्यं सुराङ्गना नन्दननन्द्यवासाः ।
राधामुकुन्दस्य न यत्र केलिस्तन्नन्दनं नन्दननाममात्रम् ॥७०॥

नन्दनवने कमनीयो वासो यासां ता देवाङ्गना व्रजाङ्गना भवितुं वाञ्छन्ति; यतो हि यत्र राधामाधवयोः क्रीडा नास्ति, तन्नन्दनवनं नामत एव नन्दनम्, न त्वर्थतः ॥ ७० ॥

सरसिजवनचारिहारिवातं श्लथदलकावलिमालतीप्रसूनम् ।
किसलयदलराधिकापदाङ्कं व्रजवनिताननलक्षपर्वचन्द्रम् ॥७१॥

कमलवने विहरन् सुरभिः पवनो यत्र; रासे परिश्रमेण शिथिलेभ्योऽलकेभ्यः पतितानि मालतीकुसुमानि यत्र; कोमलस्य श्रीराधायाः पदस्य चिह्नं यत्र; व्रजवनितानां मुखपर्वचन्द्रकोटिर्यत्र; तत् यमुनाया मनोरमं पुलिनं जयति ॥ ७१ ॥

मुररिपुमुरलीजकाकलीकं सुरवनिताततिवृष्टपारिजातम् ।
अनुपमपुलिनं यमानुजाया जयति च कोकिलकूजितं समन्तात् ॥

श्रीकृष्णवंशीध्वनिमुखरितं सुराङ्गनाभिः कृताभिः पारिजातपुष्पवृष्टिभिः समन्वितं समन्तात् कोकिलकूजितं श्रीयमुनाया निरुपमं तटं जयति ॥ ७२ ॥

द्विजकुलकलगीतरासकीर्तिर्मधुकरगुञ्जितकुन्दकञ्जपुञ्जः ।
व्रजपतिपदपूतवन्द्यपांसुर्विजयत एतदरण्यपुण्यभागः ॥ ७३ ॥

पक्षिकुलस्य रासगीतिर्यत्र, द्विरेफाणां गुञ्जनयुक्तः कुन्दानां कमलानाञ्च पुञ्जो यत्र, श्रीकृष्णचरणपूता अतएव वन्दनीयाः पांसवो यत्र, सोऽयमरण्यप्रदेशो विजयते ॥ ७३ ॥

नवनलिनदलाक्षपीतवासाः सुरपतिराधितराधनीयपादः ।
व्रजविपिनवसुन्धरारमेशो विजयत एष च राधिकाचकोरः ॥७४॥

नीलकमलनयनः पीतवासाः, इन्द्रवन्दितवन्द्यचरणः व्रजभूमिश्रीश एष राधिकाचकोरो विजयते ॥ ७४ ॥

कस्तूरीसुरपुष्पकुङ्कुमरसं ताम्बूलबीटीद्वयं
राधाया अकलङ्क आननविधौ प्रीत्यार्पयन्माधवः ।
गोपीभिर्नयनाभिरामतनुभिः साकूतमालोकितो
वृन्दारण्यविहारभूपरिसरे रोमाञ्चितो दीव्यति ॥७५॥

कस्तूरीलवङ्गकुङ्कुमरसयुक्तं ताम्बूलवीटीद्वयं श्रीराधाया निष्कलङ्कमुखे प्रीत्याऽर्पयन् माधवोऽतिरमणीयाभिर्गोपीभिः साभिप्रायं दृष्टो रोमाञ्चितो वृन्दारण्यविहारभुवि दीव्यति ॥ ७५ ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः ।
तद्राधिकाचरणचिन्तनचारुकाव्ये
सर्गः समाप्तिमगमन्नवमो हि दिव्यः ॥ ७६ ॥

श्रीचन्द्रशेखरशुक्लात् श्रीमङ्गलायां जातेन श्रीकालिकाप्रसादशुक्लेन विरचिते श्रीराधाचरितमहाकाव्ये दिव्यो नवमः सर्गः समाप्तिमगमत् ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये नवमः सर्गः समाप्तः ॥

दशमः सर्गः

मीनाक्ष्यो व्रजललनाः मुकुन्दकेलिं
राधारञ्जनपारमार्थिकां समीक्ष्य ।
ग्रीष्मालिङ्गितवनराजिभीतचित्ता
अन्योन्यं किमपि यथा तथा लपन्ति ॥ १ ॥

मीना इव वामनयना व्रजबाला राधारञ्जनमुख्यां मुकुन्दक्रीडां विलोक्य ग्रीष्मेणालिङ्गितया वनपङ्क्त्या भीताः परस्परं किमप्यव्यवस्थं कथयन्ति ॥ १ ॥

तिग्मांशोरनलकणैः करैरसह्यैस्
तप्तायां विततकटाहभूतधात्र्याम् ।
क्वथ्यन्ते सरसि विसारिणोऽसहायास्
तेजस्वित्वमपि विभाति काल एव ॥ २ ॥

भगवतः सूर्यस्यासह्यैरग्निकणैः किरणैस्तप्तायां विशालकटाहरूपायां धरायां सरसि सहायशून्या मत्स्याः पच्यन्ते । तेजस्वितापि समय एव शोभते ॥ २ ॥

पुष्पालिस्तरुततिषु प्रचण्डतापै-
राश्लिष्टासु हरितकान्तपल्लवासु ।
पत्रालिः पथिकवधूकपोलपालौ
विम्लानेव विरहजाततापजालैः ॥ ३ ॥

हरितमनोज्ञपल्लवसम्भृतासु भीषणतापैराक्रान्तासु वृक्षपंक्तिषु कुसुमावलिः प्रोषितपतिकायाः कपोलयोः विम्लाना चित्रलेखेव भाति ॥३॥

श्यामानामभिशमनीयमिष्टनिद्रं
कान्तानां गुरुजनभीतिवीतनिद्रम् ।
अत्युष्णं विरहवशाद्विलासिवृन्दं
सोच्छ्वासं सदनमुखेऽनिलं सिषेवे ॥ ४ ॥

श्यामानां कान्तानां तल्पेऽभीप्सितं शयनं यस्य; गुरुजनानां भीत्या उन्निद्रं विलासिवृन्दं विरहवशात् सोच्छ्वासमत्युष्णमनिलं सिषेवे ॥ ४ ॥

कासारे कुमुदसरोजशैवलानां

वारीणामपि नितरां विलोक्य शोषम् ।

कादम्बा विहगवरा वनं प्रयाताः
श्रीहीनं विबुधमपि त्यजन्ति लोकाः ॥ ५ ॥

कासारेषु कुमुदानां सरोजानां शैवलानां जलानाञ्च शोषणं नितरां विलोक्य ततो वनं प्रयाताः । विबुधमपि श्रीहीनं जनास्त्यजन्तीति स्वभावः ॥ ५ ॥

नीरन्ध्रद्रुमशमितातपां धरित्रीं
ताराभाननविधुघर्मसम्परीताः ।
पादैः क्ष्मां व्रजवनितानवाब्जयन्त्यो
मत्तेभव्रजनविधिं विहाय यान्ति ॥ ६ ॥

स्वेदबिन्दुसम्परीताश्चन्द्राननाः पादैर्धरां पद्ममयीं कुर्वन्त्यः स्वीयां मत्तगजगतिं विहायच्छायाद्रुमैर्निरुद्धातपां धरां यान्ति ॥ ६ ॥

चूतानां फलदलभारनम्रशाखास्
ताम्राक्षोदितकलकूजिताभिरामाः ।
सत्त्वानामसहनिदाघशान्तिदूताः
पक्वानि प्रणिददति फलानि कामम् ॥ ७ ॥

फलानां भारेण विनम्राः कोकिलानां कूजितैर्मनोज्ञा असह्यतापस्य प्रशमनाय जीवानां शान्तिदूता आम्राणां शाखाः पक्वानि फलानि वितरन्ति ॥ ७ ॥

विस्तीर्णे नृपतिपथे फलानि जम्ब्वाः
श्यामानि स्रवदमृतद्रवाणि कीरैः ।
दष्टान्याकृतिमधुरा व्रजस्य बाला
ग्रामीणा लघु लघु चिन्वतेऽत्यवामाः ॥ ८ ॥

विशालस्य राजपथस्य परिसरे शुकैर्दष्टानि अत एव च्युतरसानि श्यामानि जम्बूफलानि सरला आकृतिमधुरा ग्रामीणा व्रजस्य बालाश्चिन्वते ॥ ८ ॥

प्रच्छाये वितततनौ तरौ प्रलम्बाः
कण्टैर्वल्कलकवचैर्निगूढसाराः ।
कान्ताभिर्लघुपनसाः पुरस्कृता हि
भुज्यन्ते कृषकवरैः प्रशस्तिशब्दम् ॥ ९ ॥

विशाले प्रच्छाये वृक्षे लम्बमानां कण्टकैर्वल्कलैर्वर्मभिर्गुप्तसर्वस्वां

लघुपनसाः ('कटहरी' इति लोकभाषा) कान्ताभिः परिवेषिताः कर्षकैः प्रशंसापूर्वकं भुज्यन्ते ॥ ९ ॥

क्षौमश्रीरहितभुवस्तपाभितप्ता
गोधूमैः कणिशमयैर्यवैश्च वप्राः ।
ऋद्धां तां जहति वसन्तकाललक्ष्मीम्
ऐश्वर्यं महदपि नाशमेति काले ॥ १० ॥

ग्रीष्मर्तुतप्ता अत एवातसीश्रीरहिताः केदारा गोधूमैर्यवैश्च समृद्धां तां वसन्तकाललक्ष्मीं जहति । महदपि ऐश्वर्यं काले नाशमेतीति प्रकृतिधर्मः ॥ १० ॥

प्रासादे जलजजलैः सुसिक्तभागे
शय्यायां विधुसदृशोत्तरच्छदायाम् ।
इभ्यानां युवतिततिः सुखं शयाना
वापीनां नयति समीरणैर्हि रात्रीः ॥ ११ ॥

कमलजलैः सिक्तभूमौ प्रासादे धवलोत्तरच्छदे शयनीये श्रेष्ठिनां युवतयः सुखं शयाना गृहवापीनां वायुभिर्निशो नयन्ति ॥ ११ ॥

उद्याने व्रततिगृहे कदम्बकान्ते
वापीसिक्तपरिसरे सुगन्धिवाते ।
तल्पे प्रस्तरशकले सकान्तरामा
अत्युग्रं शुचि दिवसं नयन्ति दीर्घम् ॥ १२ ॥

कदम्बैर्मनोहरे लतागृहे वापीजलैः सिक्तायां परिसरभूमौ सुरभिवनवाते पाषाणखण्डे शयनीये कान्तैः सह रामा अत्युग्रं दीर्घं ग्रीष्मदिनं यापयन्ति ॥ १२ ॥

निस्स्रोताः सरसिजनेत्रकान्तिशून्या
नीलीनीलवसनहीनगौरकाया ।
आवर्तत्रितयवलीविलासहीना
वृद्धस्त्रीव गिरिणदी न भाति दीना ॥ १३ ॥

प्रवाहशून्या पक्षे रजोधर्मशून्या, सरसिजरूपस्य कान्त्या शून्या पक्षे सरसिजस्येव नयनस्य कान्त्या शून्या, शैवालेन नीलवस्त्रेण हीना गौरशरीरा, आवर्तत्रिवलीविलासहीना, गिरिणदी दीना वृद्धस्त्रीव सम्प्रति न भाति ॥ १३ ॥

सन्तप्तोपलसमहल्यवप्रखण्डे
कुद्दालाद्वयशरणा विशीर्णवस्त्राः।
दुर्वाबीजमपुनरुद्भवाय कामं
स्वेदार्द्राः कृषकवराः खनन्ति कामम् ॥ १४ ॥

ग्रीष्मेण तप्तप्रस्तरसमज्वलत्केदारे छिन्नभिन्नवसनाः स्वेदैः स्नाताः कर्षकाः कुद्दालैः समूलोन्मूलनाय दूर्वाबीजं खनन्ति ॥ १४ ॥

अत्यन्तद्रुतकनकाभपीतवर्णैर्-
मृद्वीका मधुररसाप्लुतैः प्रियालः।
कान्तानां सुभगकराङ्गुलीसमानैः
प्रत्युद्गच्छति तपनं फलैरसंख्यैः ॥ १५ ॥

द्रवीभूतसुवर्णरससमानपीतवर्णैर्द्राक्षामधुररससदृशरसयुक्तैः कान्तानां सुन्दराङ्गुलीसदृशैरसंख्यैः फलैः प्रियालस्तपनस्य स्वागतं करोति ॥ १५ ॥

आन्वर्थ्यं भजति सहस्रभानुशब्दे
दुर्दर्शे बहिरवनौ खगेऽपि यत्नैः।
किल्लोभादनतिशयानसूंश्च हन्त
मध्याह्ने कृषिनिरता न चिन्तयन्ते ॥ १६ ॥

सहस्रभानुशब्देऽन्वर्थतां भजति गेहाद् बहिर्यत्नैरपि दुर्दर्शे खगेऽपि मध्याह्ने कृषिनिरता जनाः कस्मै लाभायातिप्रियान् प्राणान् न गणयन्तीति आश्चर्यमेतत् ॥ १३ ॥

प्रासादं परित उशीरलेपलिप्ता
विश्रब्धा व्रजललना हि दीर्घिकायाम्।
सोन्मादं खगमिथुनं रतौ विलग्नं
पश्यन्त्यः क्षणमिव वासरं नयन्ति ॥ १७ ॥

उशीरलेपयुक्ता निर्जनत्वादाश्वस्ता व्रजललनाः प्रासादं परितो वर्तमानायां दीर्घिकायां सोन्मादं रतौ संसक्तं पक्षियुगलं पश्यन्त्यो दिवसं क्षणमिव व्यतियन्ति ॥ १७ ॥

अत्युष्णातिरयसमीरतप्तकायाः
पीनांसं वृषभयुगं प्रगे गृहीत्वा।
स्वल्पाशाः लगुडकरा विकृष्टवप्रा
ईषांसाः कृषिशरणाः प्रयान्ति सायम् ॥ १८ ॥

अत्युष्णेनातिवेगवता वायुना तप्तशरीराः कृषिमात्रशरणाः लगुडहस्ताः स्वल्पाशा विकृष्टक्षेत्रा अंसे ईषां निधाय दिनं यावत् कृषिकर्म सम्पाद्य सायं गृहं गच्छन्ति ॥ १८ ॥

देवानां परमसुखस्य भाजनानि
स्निग्धश्यामदलकरैर्मधूलकानि ।
लम्बान्यातपशमनानि दृग्धराणि
तूदस्तुन्दिलविटपः फलानि दत्ते ॥ १९ ॥

देवानामपि कामं सुखदानि लम्बानि तापशमकानि दृष्टिविलोभनानि मधुराणि फलानि तुन्दिलस्तूदः ('शहतूत' इति हिन्दीभाषायाम्) जनेभ्यः समर्पयति ॥ १९ ॥

अच्छाया लघुविटपा दलैश्च रूक्षाः
श्रीपारूषकतरवः सरोम वृत्तम् ।
मिष्टाम्लैस्तपनशमै रसैः समृद्धं
निःस्वार्था ददति फलं फलाय कस्मै ॥ २० ॥

स्वल्पच्छाया लघुशाखा रूक्षदलाः पारूषकाः ('फालसा' इति लोके प्रसिद्धाः) वृक्षाः रोमसहितं गोलं तापनाशकं मधुराम्लरससमन्वितं फलं निःस्वार्था अपि कस्मै फलाय ददति ! जनेभ्य इति शेषः ॥ २० ॥

दावाग्निः प्रखरसमीरणैः समिद्धो
निर्दोषांस्तरुनिचयांल्लताश्च गुल्मान् ।
कन्दाशानमलखगान् करोति भस्म
ह्युन्मत्तो भवति विवेकशून्यचेताः ॥ २१ ॥

प्रखरवायुभिर्दीप्तो वनाग्निर्निर्दोषान् तरून्, लताः, गुल्मान्, फलाशिनोऽमलान् पक्षिणश्च भस्मसात्करोति । उन्मत्ता नित्यं कर्त्तव्याकर्त्तव्यविचारशून्यहृदया भवन्ति ॥ २१ ॥

हेमन्तो हिमनिकरैर्जगत् समग्रं
यः प्राभूदधिजडयन् गतः स यस्मात् ।
तस्माद् दुष्कृतिनिकरादयं प्रयायात्
पापानामतिशयितं चिरं स्थिरं न ॥ २२ ॥

यो हेमन्तर्तुर्हिमसमूहैः समग्रं जगदधिशिथिलयन् प्राभूत्, स यस्माद् दुष्कर्मणो नाशं गतः, तस्मादेवायं ग्रीष्मर्तुरपि प्रयास्यति । पापानामत्याचारः कदापि चिरस्थायी न भवति ॥ २२ ॥

तिग्मांशोरदममपि प्रतापमुग्रं
जीमूतः परिशमयन्नुदारचेताः ।
पीयूषोपमसलिलैस्तदा व्यभासीत्
कालोऽयं न हि सहते प्रतापमुग्रम् ।। २३ ।।

अप्रशमनीयमपि तीक्ष्णं सूर्यस्य प्रतापं परिशमयन्नुदारचेता जीमूतोऽमृतसलिलैः सह तदा व्यभासीत् । कालः सन्तापजनकं प्रतापं कदापि न सहते ।। २३ ।।

कादम्बिन्यधिगगनं दिशोऽबलायाः
सुस्निग्धा कलकबरीव हृद्यकान्तिः ।
जन्तूनामपरिमितार्तिदीर्णचेता
बाष्पाणि त्यजति निरन्तरं समन्तात् ।। २४ ।।

गगनेऽबलाया दिशः स्निग्धा कमनीया कबरीव मेघमाला प्राणिनां पीडाधिक्येन विदीर्णहृदया निरन्तरं समन्ताद् बाष्पाणि मुञ्चति ।। २४ ।।

सोन्मादा गगनतले मुदा बलाका
प्रत्युद्गच्छति मधुरैः स्वनैः पयोदम् ।
वीक्षन्ते व्रजवनिताः कुतूहलाप्ताः
सत्कर्मा निखिलजनेन नन्द्यते हि ।। २५ ।।

बकपंक्तिर्हर्षातिरेका मधुरैर्ध्वनिभिः पयोदस्य स्वागतं करोति । व्रजवनिताश्च कौतुकात् तं प्रेक्षन्ते । यतः सत्कर्मकारी सर्वैरपि नन्द्यते ।।२५।।

स्निग्धश्यामलजलदैर्विचुम्बितायां
धाराभिस्तिमिरपटैश्च मण्डितायाम् ।
आभीरीवदनशतैर्व्रजेऽप्यमायां
तामिस्रं बहिरपि लक्ष्यते न किञ्चित् ।। २६ ।।

मेघच्छन्नायां धाराभिस्तिमिरवसनैश्चाच्छादितायाममायामपि गोपीनां वदनविधुशतैस्तमो बहिरपि किञ्चिन्न लक्ष्यते ।। २६ ।।

मेघाडम्बरगगनं तमालनीलं
केकाभिः श्रवणसुधाभिरीक्षमाणाः ।
नृत्यन्तः शिखिनिवहाः प्रियाद्वितीया
गोपीनां नयनमनोऽपि नर्तयन्ते ।। २७ ।।

तमालवन्नीलं मेघैर्मेदुरं गगनं विलोकयन्तः पत्नीसहाया नृत्यन्तो

मयूराः कर्णे सुधोपमाभिः केकाभिर्व्रजाङ्गनानां नयनानि मनांस्यपि नर्तयन्ते ॥ २७ ॥

कालिन्दी नवरसकम्रमत्तकाया
तापिच्छालकरुचिरा नवाम्बुदाभा ।
कान्तस्यागमनसमुत्सुकेव बाला
सोल्लासा स्मितवदना वहत्यमन्दम् ॥ २८ ॥

नूतनरसेन (जलेन) कम्रा मत्तशरीरा तमालैरलकैर्मनोहरा नूतनजलधरकान्तिः कालिन्दी कान्तस्यागमनेन उत्का बालेव विलाससहिता प्रसन्नवदना त्वरया प्रवहति ॥ २८ ॥

सौदामिन्यधिगतवारिदे नवीने
साकूता निरुपमदर्शनीयताके ।
स्वल्पाभूषणवसनाभिसारिकाश्च
नक्तं स्वाननविभया प्रयान्ति कान्तान् ॥ २९ ॥

अपूर्वसौन्दर्यसहिते विद्युच्चमत्कारचकिते नवे मेघे साभिप्रायाः स्वल्पभूषणवस्त्रा अभिसारिका नक्तं स्वमुखप्रभयोपपतीन् प्रयान्ति ॥ २९ ॥

उन्मत्ता गिरिसरितस्तरून् विशालान्
पाषाणानपि महतो विचूर्णयन्त्यः ।
कर्णव्याधिझरझरस्वना रमन्ते
तत्त्वज्ञो वदति हि ताश्च निम्नगेति ॥ ३० ॥

उद्धता गिरिसरितो विशालान् वृक्षान् महतः पाषाणानपि विदारयन्त्यः श्रवणे व्याधिसमुत्पादकझरझरशब्दान् कुर्वन्त्यो रमन्ते । अत एव विचारशीला जनास्ताः 'निम्नगा' इति वदन्ति ॥ ३० ॥

नीपानां हरितदलैः सुसज्जितानां
दोलायां विटपतलेऽवलम्बितायाम् ।
हेमाभा व्रजललनाः कडारचेलाः
सौदामिन्य इव विलोभयन्ति चेतः ॥ ३१ ॥

हरितपत्रैः शोभायमानानां कदम्बानां विटपे लम्बितायां दोलायां कपिलवसनाः स्वर्णाभा व्रजललनाः तडित इव चेतो विलोभयन्ति ॥ ३१ ॥

धाराभिर्व्रजधरणीं घनोऽभिषिञ्चन्
मालाभिर्वसुतडितः सभाजयंश्च ।
सोत्साहं वदति रमाधवस्य कीर्त्ति
सर्वांगः प्रगुणवर्णनेऽनुरक्तः ॥ ३२ ॥

मेघो वर्षाभिर्व्रजमहीं सिञ्चन्, दीव्यत्तडितो मालाभिः पृथिवीं पूजयंश्चोत्साहेन महता माधवस्य यशो वदति।

सत्कुलोत्पन्नः परस्य श्रेष्ठस्य गुणवर्णनेऽनुरागवान् दृश्यते ॥ ३२ ॥

वृन्दाकाननकमनीयनीपकुञ्जे
गोपीनाममलकवृतं समीक्ष्य वक्त्रम्।
क्ष्माऽऽयातं मधुरगिरेव वारिवाहः
सास्त्रं याचति शशिनं कुलाङ्गनास्ताः ॥ ३३ ॥

वृन्दावनस्य कमनीये कदम्बकुञ्जे व्रजाङ्गनानां मुखं विलोक्य मेघः पृथिवीं प्राप्तं स्वं चन्द्रं मत्वा ताः कुलाङ्गनाः अश्रुपूर्णनयनेन प्रार्थयते। गोपीनां मुखं चन्द्रत्वेनोत्प्रेक्ष्यते, गर्जनवर्षणे च साश्रु याचनात्वेनोत्प्रेक्ष्येते ॥

खद्योतद्युतिलसितासिता तमिस्रा
गर्जत्केसरिकरिकाननस्थलीका।
मञ्जीरध्वनिरहितां नताननाब्जां
नारौत्सीदभिसरणे प्रमत्तकान्ताम् ॥ ३४ ॥

असिता; शब्दं कुर्वन्तः केसरिणः करिणश्च यस्यां सा, तथाभूता काननस्थली यस्यां सा रात्रिः, नूपुरध्वनिशून्यां नम्राननां मदोन्मत्तां कान्तामभिसरणोद्देश्यांनिरोद्धुं नाशकत् ॥ ३४ ॥

कासारा जलदजलात् सभीतिभङ्गाश्
शैवालोत्सरणपराः सरोजशून्याः।
जम्बालाविलपयसोऽभवन् प्रमत्ताः
स्वं भावं जहति जडा न संगतोऽपि ॥ ३५ ॥

मेघजलस्यागमनेन भयङ्करतरङ्गा अत एव शैवालानां समुत्सारणं कुर्वन्तः कमलैः शून्याः कर्दमेन मलिनजलाः कासाराः प्रमत्ता अभवन्।

विवेकशून्याः सत्संगतिमवाप्यापि स्वभावं न त्यजन्ति ॥ ३५ ॥

कल्लोलावलिकलितास्तमालमाला
यादोभिर्जनितभया पगाधनद्यः।
निर्दोषास्तटतरवो न पातनीया
इत्येवं विहगकुलैः स्तुता वहन्ति ॥ ३६ ॥

कल्लोलजालयुक्ताः, तमालैरावृताः, जलजन्तुभयजनिकाः 'हे अगाधा नद्यः, तटे वर्तमाना दोषरहिता वृक्षा न पातनीयाः'—इत्थं विहगसमुदायैः प्रार्थिताः प्रवहन्ति ॥ ३६ ॥

वक्षोजानतशिरसो नितम्बगुर्व्यो
गौराङ्ग्यः स्मितवदनास्त्रिहल्यवप्रे ।
पङ्कामज्जितचरणा अवामरामा
गायन्त्यो मृदुकलमान् विरोपयन्ति ।। ३७ ।।

पीनपयोधराभ्यामानतशिरस्का बृहन्नितम्बा गौरशरीराः स्मेराननाः सरलाः स्त्रियः कर्दममग्नपादा गायन्त्यो बीजकलमान् त्रिःकृष्टक्षेत्रे रोपयन्ति ।। ३७ ।।

आशु श्यामकयवनालनालजालैश्
श्यामा भूश्चिरसमयं प्रतीक्षमाणैः ।
श्यामा योषिदिव कृषीवलैरवाप्ता
भव्ये वस्तुनि मरुतोऽपि रागवन्तः ।। ३८ ।।

आशुश्यामकयवनालानां (सरया, सावां, बाजरा) समूहैः हरिता भूः बहुकालं प्रतीक्षमाणैः कृषीवलैः श्यामा रमणीव प्राप्ता । मनोहरे पदार्थे देवा अपि रागवन्तो भवन्ति ।। ३८ ।।

वेशन्ते चिक्किलमये वराहयूथं
कीलाले महिषनिभं मुदा समन्तात् ।
मूस्तामूलमवनितो विनापि यत्नं
'घोम्' ध्वानं खनति च चर्वति प्रकामम् ।।३९ ।।

महिषसदृशं शूकरयूथं पल्वले कर्दममये जले मुदा समन्तात् मूस्ता (मोथा) मूलं यत्नं विनापि पृथिवीतः 'घों घों' इति शब्दं कुर्वत् निष्कासयति, प्रकामं चर्वति च ।। ३९ ।।

गाहन्ते प्रियसलिलाः शरीरपीनाः
पानीयं ललिततरङ्गमीनवाप्याः ।
भेकानां 'टर, टर' शब्दशूलजालैः
शार्दूला अपि सहसाऽपयान्ति कूलात् ।। ४० ।।

पुष्टा महिषा मनोहरतरङ्गमत्स्ययुक्ताया वाप्याः सलिलं गाहन्ते । मण्डूकानां 'टर, टर' इति शब्दशूलसमूहैः शार्दूला अपि तटात् पलायन्ते ।।

रामाः प्रोषितपतिका विकीर्णकेशाः
प्रक्षीणाननशशिकास्तडिल्लताभाः ।
अस्राणामविरलताक्तमेदिनीकाः
स्पर्धन्ते स्तनितकुपिताश्च कालिकाभिः ।। ४१ ।।

प्रोषितभर्तृकाः शिथिलकेशाः विवर्णचन्द्राननाः कनककान्तयो रामा अश्रुविन्दुभिः पृथिवीं सिञ्चन्तोऽतिक्रुद्धाः कादम्बिन्या स्पर्द्धन्ते ॥ ४१ ॥

झिल्लीका 'झन झन' निःस्वने निशीथे
रन्तुं केतकुसुमनोमनोभिरामे ।
राधायाः पुलकितपाणिमादधानः
कालिन्दीमतितरलामगान् मुरारिः ॥ ४२ ॥

झिल्लीकानाम् (झींगुर) 'झन, झन'शब्दयुक्ते केतकपुष्पैर्मनोऽभिरामे निशीथे श्रीराधाया रोमाञ्चितं हस्तं दधानो मुरारिरतितरलां यमुनामगात् ॥ ४२ ॥

बिम्बोष्ठे प्रियमुरलीं मुदा दधानः
कौशेयं कनकनिभं कटौ वसानः ।
कृष्णो मन्दमधिनिशं निवर्षतीन्द्रे
राधाप्रार्थितगमनो हि याति कुञ्जम् ॥ ४३ ॥

अधरोष्ठे वंशीं मुदा दधानः, सुवर्णवर्णं क्षौमं कटिप्रदेशे धारयँश्च कृष्णो निशीथे मेघे मन्दं मन्दं वर्षति श्रीराधाप्रार्थितः कुञ्जं याति ॥४३॥

वारिप्लावितविपिने धराधरेन्द्रो
गोपैराश्रितशरणो मुरारिरूपः ।
आदित्यैर्दितिजनितैश्च मथ्यमाने
क्षीरोदे गिरिरिव मन्दरो विभाति ॥ ४४ ॥

वारिणि मग्ने वृन्दावने गोपानां शरणं मुरारिस्वरूपो गोवर्द्धनो देवै राक्षसैश्च मथ्यमाने क्षीरसमुद्रे मन्दराचल इव विभाति ॥ ४४ ॥

जीमूतो झिमिरझिमिस्वनानुहारी
श्रीवातायनमभितो भ्रमन् निशीथे ।
मञ्जीरश्रुतिमधुरध्वनिं प्रनृत्यद्
गोपीभ्योऽवहितमना अहो अधीते ॥ ४५ ॥

'झिमिर, झिमिर' इति शब्दं कुर्वन् गवाक्षं परितो निशीथे भ्रमन् मेघो नृत्यन्तीनां गोपीनां कर्णमधुरं नूपुरध्वनिमधीते ॥ ४५ ॥

दोलायां मणिमयपीठदीपितायां
सज्जायां ललिततमालमालतीभिः ।
अन्योन्यं किमपि रहस्यमालपन्तो
वीक्षन्तेऽम्बुदसुषमां सदारकान्ताः ॥ ४६ ॥

मणिभिर्निर्मितायां कोमलतमालैर्मालतीपुष्पैश्च सज्जितायां दोलायां परस्परं किमपि रहस्यमालपन्तः प्रियाभिः कान्ता जलदशोभां प्रेक्षन्ते ॥

सस्यश्यामलवसनावगुण्ठिताङ्गी
कर्णालम्बिकनककङ्गुमञ्जरीका ।
बिम्बोष्ठी रसलसिता धराऽभिरामा
कान्तोत्का कुलरमणीव संविभाति ॥ ४७ ॥

सस्यैश्श्यालवस्त्रैराच्छादितशरीरा, कर्णयोर्लम्बमाना कनककङ्गोर्मञ्जरी यस्याः सा, तथा जलशोभिता, बिम्बफलमेवाधरोष्ठो यस्याः सा, तथाभूता मनोहरा धरा कुलाङ्गनेव कान्तोत्सुका विभाति ॥ ४७ ॥

सारङ्गा मधुरगिरः पिपासयार्ता
अक्षिप्ता परुषगिराऽचिरप्रभायाः ।
निन्दन्तो न हि सलिलं पिबन्ति हन्त
स्त्रीमुख्यो निखिलगुणोऽपि निन्द्यतेऽलम् ॥ ४८ ॥

पिपासया पीडिता अपि मधुरभाषिणश्चातका विद्युतः कठोरवाचा अधिक्षिप्ता मेघं निन्दन्तः पयो न पिबन्ति ।
निखिलगुणोऽपि स्त्रीप्रधानोऽलं हन्त निन्द्यते ॥ ४८ ॥

वर्षर्तोर्विभवभरां वसुन्धरां तां
वृन्दाकाननलतिकां फलानताञ्च ।
राधाया यदुकुलनन्दनस्य चापि
वीक्ष्यैवं समुदभवत् परा रिरंसा ॥ ४९ ॥

एवं वर्षर्तोः सम्पदाभृतां तां वसुन्धरां फलसमृद्धां वृन्दावनलताञ्च समीक्ष्य श्रीराधायाः श्रीकृष्णस्य च रन्तुं समीहा समभूत् ॥ ४९ ॥

नीपानामलिकुलगीतकम्रताकं
कुञ्जं पुष्पिततरुराजि राजितक्ष्मम् ।
नन्दग्रामकवरसानुसीममानं
संकेतस्थलमभवत् तयोरतुल्यम् ॥ ५० ॥

द्विरेफैर्यस्य कमनीयता गीयते, यच्च कुसुमितानां तरूणां पंक्तिभिर्विराजितम्, येन नन्दग्रामवरसानुसीमा मीयते, तदनुपमं कुञ्जं राधामाधवयोः संकेतस्थलमभवत् ॥ ५० ॥

कालिन्दी कलकलनिःस्वनोच्छलन्ती
मंदारद्रुमकुसुमालिचुम्बिवातः ।

भूभागो नवकिसलप्रसूनशय्यो
नृत्यन्तः शिखिशिशवो घना वनालिः ॥ ५१ ॥

तस्य संकेतस्थलस्य परिसरे कलकलध्वनिं कुर्वन्ती कालिन्दी प्रवहति, मन्दारकुसुमसौरभमादाय वायुः प्रवाति, भूभागश्च नवपल्लव-कुसुमसज्जितः, यत्र च वनालिः घनाऽस्ति, मयूरशावकाश्च नृत्यन्त आसन्, सा भूमिः संकेतस्थली अभूत् ॥ ५१ ॥

कूजत्कोकिलकलहंससारसालिर्
गुञ्जन्ती मधुपततिर्विकस्वराब्जे ।
मालत्याः सुरभिसुमैः सुगन्धिताशा
यत्र श्रीर्वसति भृता समृद्धिसारैः ॥ ५२ ॥

यत्र कोकिलाः कूजन्ति, कलहंसाः सारसाश्च मधुरं ध्वनिं कुर्वन्ति, विकसति कमले मधुपा गुञ्जन्ति, मालतीसुरभिपुष्पैर्दिशः सुरभयः, श्रीश्च सकलसमृद्धिभिर्भृता वसति । तन्निर्दिष्टं संकेतस्थलं प्रयातीति उत्तरे-णान्वयः ॥ ५२ ॥

अभ्याजन् सुरभिचयं गृहीतदण्डो
गोपानां समवयसां पुरस्सरस्तत् ।
आभीरोचितवसनो मनोजकान्तो
निर्दिष्टं नटनृपतिः स्थलं प्रयाति ॥ ५३ ॥

आभीरस्य वेशं दधानः समवयस्कानां गोपानामग्रेसरो हस्ते दण्डमादाय मदनतुल्यशरीरो नटराजः श्रीकृष्णो गाः पुरः कुर्वन् निर्दिष्टं तत् स्थलं प्रयाति ॥ ५३ ॥

भक्तं पायसमवलम्ब्य वामपार्श्वे
तस्याचारणमिषतो वनं प्रयाति ।
राधोत्कण्ठितहृदयो निगूढभावः
प्रत्यूषे लघु जननीनिवारितोऽपि ॥ ५४ ॥

श्रीराधायै काममुत्कण्ठितः श्रीकृष्णः पयसा संस्कृतं भक्तं वामभागेऽ-वलम्ब्य राधाविषयकं भावं निगूहन् यशोदया वारितोऽपि गोचारणव्याजेन प्रातर्वनं शीघ्रं प्रयाति ॥ ५४ ॥

आपादं कलितसुदामदीप्तकण्ठो
गोपीपत्रितवदनो मयूरबर्हैः ।
भङ्ग्या वादितमुरलिः कलानदीष्णो
विक्रीडन् पथि विहगैः प्रयाति कुञ्जम् ॥ ५५ ॥

पदपर्यन्तं लम्बितया वनमालया शोभितकण्ठः; यशोदया कृतया पत्रलेखया भूषितमुखः; शिरसि मयूरपिच्छ; कलाकुशलः, कलया मुरलीं वादयन्, मार्गे पक्षिभिः क्रीडन् कृष्णः संकेतकुञ्जं प्रयाति ॥ ५५ ॥

गोपानां फलदलभक्षणाभिलाषाद्
आरोहंस्तरुशिखरं विहङ्गगत्या ।
कान्तानां शबरभुवां फलोपहारान्
रम्भाणां हरितदले निवेशितांश्च ॥ ५६ ॥

प्रीतानां करकमलैः पुरस्कृतांस्ता
आगृह्णन् यदुकुलमण्डनो मुरारिः ।
सम्भाव्यागमदनुरक्तकञ्जनेत्रैर्
नादत्ते किमपि बुधो विना हि वस्नम् ॥ ५७ ॥

गोपानां फलभक्षणाभिलाषात् पक्षिगत्या वृक्षशिखरमारोहन्, कदलीदले प्रसन्नानां शबरीणां करकमलैः पुरस्कृतान् फलोपहारान् स्वीकुर्वन्, यदुवंशालङ्कारो मुरारिस्ताः शबरीः प्रीतियुक्तैर्नयनसरोजैः सम्भाव्य निर्दिष्टां संकेतस्थलीमगमत् । यतो हि बुधो विना किमपि मूल्यं कस्यचित् किमपि वस्तु न गृह्णाति ॥ ५६-५७ ॥

वृन्दाकाननसदने तपश्चरन्त्या
रम्भायाः किसलदले मुरारिमूर्त्तिम् ।
कुब्जाया अभिलषितां विलिख्य सद्यो
रम्भात्वं विदधदितो मतो मुरारिः ॥ ५८ ॥

वृन्दारण्ये कदलीदलेऽभीप्सितां मुरारेर्मूर्ति विलिख्य तपः कुर्वन्त्याः कुब्जायाः देवाङ्गनात्वं कुर्वन् अभीष्टो मुरारिर्गतः ॥ ५८ ॥

नीपानां शबरवधूविहारकुञ्जे
गायन्त्यो मधुरमृदंगवाद्यघोषैः ।
राधाराधननवनां सुधोपमार्यां
दृग्रज्ज्वा यदुपतिनाऽबलानिबद्धाः ॥ ५९ ॥

कदम्बानां शबरीविहारे लतागृहे मधुरमृदङ्गशब्दैः राधास्तवनमयीं सुधातुल्यामार्यां गायन्त्यः शबर्यो दृग्रश्मिभिर्निबद्धाः । श्रीकृष्णेनेति शेषः ॥

गोपालैर्यदुकुलमण्डनो मुरारिर्
वक्षोजाततकटिपूर्वकामिनीनाम् ।

मध्ये वेणुवदनचुम्बिताधरोष्ठः
शम्पामध्यगजलदो व्यभादिवाहो ॥६०॥

गोपशिशुभिर्वेष्टितो मुरारिरुन्नतपयोधराणां शवरीणां मध्ये वेणुचुम्बिताधरोष्ठो विद्युन्मालाया मध्ये मेघ इव व्यभादित्याश्चर्यम् ! असम्भावितोपमा ॥ ६० ॥

आश्लिष्यन् कनकलताः पुलिन्दबाला
गाढोद्वर्तितकुचकुङ्कुमाक्तवक्षाः ।
हस्तामृष्टमृदुकपोलकेशपाशो
बिम्बोष्ठं पिबति च पालयन् प्रतिज्ञाम् ॥ ६१ ॥

गौराङ्गी पुलिन्दरमणीराश्लिष्यन् अत एव तत्कुचकुङ्कुमैर्लिप्तवक्षाः कराभ्यां कपोलौ केशपाशश्चामृशन् कृतां प्रतिज्ञां पालयन् तासां शबरीणां बिम्बोष्ठं पिबति ॥ ६१ ॥

विश्रम्य क्षणमुपगूहनं प्रगाढं
देहि त्वं रमण चिरात् प्रतीक्ष्यमाणः ।
कन्दाशैरुपवसनैरकल्मषाणां
स्वान्ते नो निगडितपाद कुत्र यासि ॥ ६२ ॥

हे रमण, चिरात् प्रतीक्ष्यमाणस्त्वं क्षणं विश्रम्य प्रगाढमालिङ्गनं देहि । कन्दफलोपवासकारिणीनामत एव निष्पापानामस्माकमन्तःकरणे हे निगडितचरण, कुत्र यासि ! ॥ ६२ ॥

पाथोजाङ्घ्रिमृदुरजः स्तने विलेप्तुं
पन्थानं प्रिय सततं विलोकयन्त्यः ।
एकैकं क्षणमपि कल्पकोटितुल्यं
ज्वालालीढसुमनसः कथं नयेम ॥ ६३ ॥

हे प्रिय, तव पादपद्मस्य रजः स्तने विलेप्तुं सततं पन्थानं विलोकयन्त्य एकैकमपि क्षणं कोटिकल्पसमं विरहज्वालादग्धहृदया वयं केन प्रकारेण नेष्यामः ॥ ६३ ॥

स्वार्थान्धो न्ववमनुते परस्य पीडां
कामान्धोऽपि न नियतं समीक्ष्यकारी ।
विद्याचन्दनरसमण्डितोऽकुलीनो
दुर्गन्धो भवति कुलीनसंसदिस्थः ॥ ६४ ॥

स्वार्थसाधकः परस्य पीडां न गणयति, कामवाणविद्धो हि निश्चयेन विवेकहीनो भवति, विद्याचन्दनलिप्तोऽपि दुष्कुलीनः कुलीनसंसदि दुष्पर्शो भवति ॥ ६४ ॥

वन्यानां कुसुमनिभं निदाघतप्तं
मीनानां कुलमिव वारिदागमेऽङ्ग ।
त्वत्पादाम्बुजमकरन्दविप्रलब्धं
स्वान्तं नो निरतिशयं सुखं समैति ॥ ६५ ॥

हे अङ्ग, ग्रीष्मतापतप्तं मत्स्यानां वारिदागमे कुलमिव तव चरणकमलस्य रसरहितमस्माकं वन्यानां रामाणां कुसुममनो नितरां प्रसीदति ॥

प्रत्यङ्गं विशति सुधाह्लदप्रवाहे
रोमाञ्चाञ्चिततनुरातनोति हार्दम् ।
स्वेदानां गिरितटिनीतटं भिनत्ति
धत्ते वेपथुरधुना तु पारवश्यम् ॥ ६६ ॥

प्रत्यङ्गं सुधाजलाशयस्य प्रवाहे पतति, रोमाञ्चितशरीरभागो हृदयस्य भावमातनोति, स्वेदनिर्झरिणी सीमानमुल्लङ्घयति, शरीरे कम्पोऽधुना परवशतां नयति ।

सम्प्रति सात्त्विकभावः समुदितोऽस्माकमिति भावः ॥ ६६ ॥

अश्रूणामविरलधारया धरेयं
पङ्कैराविलरसराशिका प्रियाली ।
अस्माकं तरुततिरद्य ते वियोगात्
किञ्चिद् व्याहरति न योगिनीव ॥ ६७ ॥

अस्माकं प्रियसखी इयं धरा तव सम्भावितवियोगाद् अश्रूणां सततधारया पङ्कैराविलजला भवति । वृक्षावलिश्चाद्य योगिनीव किञ्चिन्न व्याहरतीव ॥ ६७ ॥

हुङ्कृत्या परुषगिरा कपोतपाली
वन्यानाञ्च सततगर्जनैर्वनाली ।
सत्त्वानां दयित निषेधतीव विज्ञ
प्रस्थानं तव च विहाय नस्त्वदीयाः ॥ ६८ ॥

कपोतपाली कठोरशब्दैः हुङ्कारैः, आरण्यकजन्तूनां सततगर्जनैश्च हे विज्ञ दयित, त्वदीया अस्मान् विहाय तव प्रस्थानं निषेधतीव ॥ ६८ ॥

मेघो यच्छति समयेऽप्ययाच्यमानः
कासारोपि न विरतो जलप्रदानात् ।
श्रेष्ठानां चरितमिदं श्रुतं श्रुतेभ्यस्
तन्मा भूद् वितथमहो महात्मनस्ते ॥ ६९ ॥

पर्जन्योऽयाच्यमानोऽपि यथासमयं जलं प्रयच्छति, कासारोऽपि सर्वेभ्यो जलं ददाति । चरितमिदं महात्मनां शास्त्रेभ्योऽस्माभिः श्रुतम् । तच्च भवद्विषयेऽसत्यं मा भूदिति वयं कामयामहे ॥ ६९ ॥

आकारो व्यभिचरितो रसाद् विहीने
माधुर्यं त्वयि परवञ्चनाय कृष्ण ।
आभीरोचितकुलरीतिरेव सैषा
कार्यं कारणगुणवद् विलोक्यते हि ॥ ७० ॥

हे कृष्ण, रसाद् विहीने त्वयि मनोहर आकारो व्यभिचरितः, यतो हि 'यत्राकृतिस्तत्र गुणा वसन्ति' इति सामुद्रिकवचनम् । माधुर्यं तु परवञ्चनायैव, न परशान्तये । सा एषा आभीराणां समुचिता कुलरीतिः; यतः कारणगुणाः कार्ये भवन्त्येव ॥ ७० ॥

पारुष्यं हृदयविहीनवृत्तिधर्मः
किन्तिष्ठेत् सहृदयमानसे त्वदीये ।
वासन्तीवृषभविषाणयोः कदाचित्
संयोगः क्वचन बुधैरदृष्टपूर्वः ॥ ७१ ॥

हृदयहीने जने कठोरता वर्तते, सा च सहृदये त्वयि कथं वर्तेत ! अतिसुकुमारवासन्तीकुसुमस्यातिकठोरवृषभविषाणस्य च संयोगः कदापि कुत्रापि कैश्चिदपि बुधैर्दृष्टः ? ॥ ७१ ॥

पत्नीं तां जनकसुतां कठोरगर्भां
तीर्थेभ्योऽपि परमपावनीं च साध्वीम् ।
निर्वास्य स्वकसदनाच्छलादवापत्
मर्यादा पुरुषवरत्वमेव पूर्वम् ॥ ७२ ॥

रामावतारे कठोरगर्भां परमपावनेभ्यस्तीर्थेभ्योऽपि पावनीं प्रसिद्धां जनकसुतां जानकीं कपटेन स्वसदनान्निर्वास्य मर्यादापुरुषोत्तमत्वं यश एव केवलमापत् ॥ ७२ ॥

किं किं वाच्यमवचनं नरोत्तमस्य
नासाच्छेदनमबलाजनस्य कृत्यम् ।
पर्याप्तस्तव हृदयं समीक्षितुं हेतू
रामाणामनुसरणेऽनुभूतपूर्वम् ॥ ७३ ॥

पुरुषोत्तमस्य तव तस्याबलाजनस्य नासाच्छेदनमवक्तव्यं किं किं कृत्यं कथनीयम् ! रामाणामनुरागविषये पूर्वमनुभूतं तव हृदयं ज्ञातुम् पर्याप्तोऽयमेव हेतुः ॥ ७३ ॥

मुञ्च स्वभावमधुना दयया निरीक्ष्या
वन्या वतं त्वशरणाः शरणं त्वमेव ।
रामा स्वभाववशतः प्रतिकूलवाचो-
ऽस्माकं क्षमस्व सकलाः करुणार्द्रकान्त ॥ ७४ ॥

हे कान्त, स्वभावं त्यक्त्वा दयार्द्रदृष्टचा वयं निरीक्ष्याः । अरण्यवासिन्योऽशरणाः स्मः, त्वमेव शरणमसि, स्त्रीस्वभावाद्यदि प्रतिकूलमवादिष्म, तत् हे करुणार्द्र कान्त, सर्वं क्षमस्व ॥ ७४ ॥

वन्यस्वभावमधुराधरसारभागं
वाचोमुखेन शबरीनिवहैः प्रदत्तम् ।
प्रेमोपहारममृतं श्रुतिभाजनाभ्याम्
आकण्ठमाकलयता मुमुदे रसेन ॥ ७५ ॥

वन्यस्वभावेन मधुराधरस्य सारभागं वाणीद्वारा शबरीभिः समर्पितं प्रेमोपहारममृतं कर्णपात्राभ्यामातृप्ति पिबता श्रीमुरारिणा मुमुदे ॥ ७५ ॥

नीलाब्जे नयने पयोधरयुगे मुक्तायमानांस्तदा
कान्तानां मृगशावकेक्षणजुषां प्रेमाश्रुबिन्दून् मुदा ।
प्रोञ्छन् कामदमाधवो मृदुकरैश्चेलाञ्चलैरादराद्
राधां गन्तुमना नवाम्बुदसखो बिम्बाधरं चुम्बति ॥ ७६ ॥

मृगशावकेक्षणानां शबरीणां नीलसरोरुहनयने स्तनमण्डले च पतितान् मुक्तासदृशान् प्रेमजन्याश्रुबिन्दून् मुदा पीताम्बराञ्चलैरादरात् प्रोञ्छन् राधां गन्तुमुत्सुको नवनीलनीरदसमः श्रीकृष्णः शबरीणां बिम्बाधरं चुम्बति ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः ।
काव्ये पवित्रशबरीचरितप्रधानः
सर्गः समाप्तिमगमद् दशमस्तदीये ॥ ७७ ॥

श्रीचन्द्रशेखरात् श्रीमङ्गलायां जातेन श्रीकालिकाप्रसादशुक्लेन रचिते राधाचरितमहाकाव्ये पवित्रशबरीचरितप्रधानो दशमः सर्गः समाप्तिमगमत् ॥ ७७ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्त-
शब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन
प्राप्तस्वर्णपदकेन श्रीजानकीजानिना व्याख्यातसम्पा-
दितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये दशमः सर्गः समाप्तः ॥

एकादशः सर्गः

राधासरोजहृदये मनसा निबद्धो
देहेन चापि शबरीकबरीतमाले ।
स्थातुं न यातुमशकद्‌हरिचञ्चरीको
रामा स्वरूपमधुराऽपि निसर्गवामा ॥ १ ॥

चञ्चरीक इव स हरिः श्रीराधाकमलमनसा निबद्धः । अर्थात् मनस्तु राधायां रमते । शरीरेण च शबरीणां कबरीतमाले निबद्धः । अतश्शबरीणां पार्श्वे स्थातुं श्रीराधापार्श्वे यातुञ्चापि न समर्थोऽभूत् । स्त्रियः स्वरूपेण मधुरा अपि स्वभावतो वामा भवन्ति ॥ १ ॥

यस्यां तनौ जगदिदं विलसत्यजस्रं
यस्या विरञ्चि शिव देव महर्षिवृन्दम् ।
ध्याने रतं विषयवासनया निवृत्तं
सैवाबलानिगडिता मृदुरागतन्तौ ॥ २ ॥

भगवतः श्रीकृष्णस्य यस्मिन् शरीरे निखिलमिदं जगदजस्रं विलसति, यस्य च ध्याने विषयवासनारहितं विरञ्चिप्रभृतयो देवा महर्षयश्च समाहिताः, सैव तनुः कोमलरागतन्तुनाऽबलाभिर्निबद्धेति महदाश्चर्यम् ॥ २ ॥

दिव्याम्बरैरमरवामवधूकराब्जैर्
निस्स्वेदितो मणिमये हि सुरेन्द्रहर्म्ये ।
सोऽयं पुलिन्दतनयावदनान्यरण्ये
प्रोच्छन्नहो हि नितरां मुमुदे मुरारिः ॥ ३ ॥

यः सुरेन्द्रभवने सुरीणां करकमलैर्दिव्यवसनद्वारा निस्स्वेदतां नीतः, सोऽयं सम्प्रति कानने शबरीमुखानि स्वयं प्रोञ्छन् मुरारिः नितरां मुमुदे इत्यहो आश्चर्यम् ॥ ३ ॥

उद्यानमञ्जुलरसालमरन्दसक्त
वन्यां सुमावलिलतां किमु सेवसे त्वम् ।
कृष्णस्य कृष्णचरितं भवति स्वभावाद्
इत्यामनन्ति सुधियः सततं द्विरेफ ॥ ४ ॥

उद्याने मनोहररसालस्य मञ्जरीरसपानकृत् हे द्विरेफ, वनस्य कुसुमितलतां त्वं किमु सेवसे !

कृष्णस्य चरितमपि स्वभावात् कृष्णं भवतीति सुधियो वदन्ति ॥४॥

आर्यं विहाय विधिमप्यथवा महात्मा
तन्वन्ननार्यचरितं न हि लिप्यतेऽघैः ।
रामावधो न रघुनन्दनदूषणाय
माहात्म्यमेव ननु हन्ति सहस्रदोषान् ॥ ५ ॥

अथवा महात्मा आर्यं विधिं विहायानार्याचरणं कुर्वन्नपि पापैर्न लिप्यते । यतो हि रामावधेनातिपापकर्मणापि श्रीरघुनन्दनो न दूषितः । माहात्म्यमेव सहस्रं दोषान् हन्ति ॥ ५ ॥

द्राक्षारसोपमवचश्शबरीमुखेभ्यः
कृष्णो निपीय मधुराधरपल्लवं च ।
मन्दस्मितेन विनिवारितपर्वचन्द्रो
रामा अवामनयना मधुरं बभासे ॥ ६ ॥

ततश्श्रीकृष्णश्शबरीमुखेभ्यो द्राक्षारसमधुरं वचो मधुराधरपल्लवञ्च तासां निपीय मन्दहासेन पूर्णचन्द्रं तिरस्कुर्वन् सरलाः ताः शबरीः मधुरं जगाद ॥ ६ ॥

पारुष्यमस्ति पुरुषस्य वचस्सु सत्यं
चेतस्सु नैव वनिताः प्रति वो विशेषात् ।
स्त्रीणांतु वक्षसि तदेव विरूढमूलं
तस्मात् तदुद्धतमुखं स्फुटतामुपैति ॥ ७ ॥

हे शबर्यः, पुरुषस्य वचसि सत्यं पारुष्यमस्ति, परन्तु चेतसि नास्ति । विशेषेण भवादृशीः वनिताः प्रति तु नैव । किन्तु तदेव पारुष्यं स्त्रीणां हृदये दृढमूलं भवति । अत एव तदुद्धतमुखं प्रकाशमेति ॥ ७ ॥

स्वान्तं कठोरमिति चोलिकया निबद्धं
पीयूषपूर्णमधरं रसिकाः पिबन्ति ।
आशीविषैः कुटिलकुन्तलकान्तपाशैर्
वध्यन्त एव पुरुषा विवशा वशाभिः ॥ ८ ॥

नारीणां हृदयं कठोरं भवतीति चोलिकया निबद्धम् । पीयूषपूर्णमधरं रसिकाः पिबन्ति । वक्रकेशपाशैराशीविषैः पुरुषाः पराधीनाः कृता वनिताभिर्बध्यन्ते ॥ ८ ॥

बद्धान् स्वभावसरलान् मतिहीनपुंस
आश्वास्य धीरवचनैश्छलनापरैश्च ।
सम्मोह्य कृत्रिमविलासमहोत्सवैश्च
सम्पातयन्ति जलधावतिचीननाभौ ॥ ९ ॥

पूर्वोक्तप्रकारेण बद्धान् निष्कपटान् मतिमन्दान् कपटधीरवचनै- र्विश्वासमानीय कृत्रिमहावभावैः सम्मोह्य च गभीरनाभौ जलधौ निपातयन्ति ॥ ९ ॥

यासां बलेन मदनः कुसुमायुधोऽपि
तेजस्विनो मुनिजनानमरांश्च वीरान् ।
युद्धं विना विजयते सततं निरङ्गः
नारी निरन्तरमरीयति विश्वविश्वे ॥ १०॥

पुष्पबाणोऽपि कामो वामानां बलमादाय देवान् तेजस्विनो मुनीन् वीरांश्चाशरीरो युद्धं विना विजयते । अतः सम्पूर्णेऽपि विश्वे नारी निरन्तरमरीयति ॥ १० ॥

लङ्काधिराजभगिनीं किल कामरूपां
सौमित्रिमप्यहह दूषयितुं प्रवृत्ताम् ।
वैरूप्यमेव तरसा नृपतिर्निनाय
दुर्वृत्तनिर्वहणमपि क्षितिपस्य धर्मः ॥ ११ ॥

सद्वृत्तं लक्ष्मणमपि दूषयितुं प्रवृत्तां कामरूपां रावणभगिनीं शूर्पणखां वैरूप्यं राजा निनाय, न तु मादृशः सामन्यः पुरुषः । दुश्चरितानां दण्डप्रदानं राज्ञो धर्म एव ॥ ११ ॥

सा ताडका तालविशालकाया
तमस्विनीव्रातविवर्णरूपा ।
निर्दोषपाकाशनजन्यलाभं
प्राप्ता स्वयं कस्य हि दोषलेशः ॥ १२ ॥

तालविशालदेहा घोररात्रिवर्णस्वरूपा सा ताडका निर्दोषशिशु- मारणजन्यं फलं स्वयमेव प्राप्ता । नात्र कस्यचन दोषलेशः ॥ १२ ॥

सीता तदीयं हृदयं शबर्यः तस्या विवासः स्वविवास एव ।
स्वं रक्षणीयं न हि रक्षणीयं प्रजाहितं स्वामिभिरेव चिन्त्यम् ॥

हे शबर्यः, सीता रामस्य हृदयमासीत्, तस्या निर्वासनं स्वस्यैव निर्वासनम् । आत्मा रक्ष्यो न वा रक्ष्यः, स्वामिभिः प्रजाहितमेव चिन्तनीयम् । निर्वासने प्रजाहितं तु रामायणादौ विलोकनीयम् ॥ १३ ॥

वक्षोजशोथनिजदोषफलं तरुण्यः
संवेदयन्ति पुरुषान् महतोऽपि विज्ञान् ।
भ्रान्त्या रथाङ्गजघनस्य विलोलयन्ते
मूर्खाः स्वदोषमपरं प्रतिरोपयन्ते ॥ १४ ॥

तरुण्यो वक्षसि जातस्य निजदोषस्य शोथस्य फलं चतुरान् महतोऽपि पुरुषान् अनुभावयन्ति। अर्थादप्राप्ताभ्यां कुचाभ्यां महान्तोऽपि विषीदन्ति। स्वचक्रनितम्बस्य भ्रान्त्या तरुण्यः परान् विलोलयन्ति। एवं धूर्ताः स्वदोषेणापरान् दूषयन्ति ॥ १४ ॥

तस्मादलं समययापनया वधूट्यो
मिथ्या मिथो वृजिनकीर्तनपापवृत्त्या।
वेलातियाति नियतस्य विधेरिदानीं
बिम्बाधरस्य सुधया गमनं मनुध्वम् ॥ १५ ॥

हे वधूट्यः, तस्माद्धेतोः समयातिक्रमो व्यर्थः परस्पररहस्योद्घाटनं व्यर्थम्, निश्चितस्य कार्यस्य समयोऽपयाति। अतो बिम्बाधरस्य रसपानेन गमनाय मामनुजानीत ॥ १५ ॥

आपृच्छ्य वामवदना मदनाभिरामा
आमृश्य कान्तकबरीं च तमालमालाम्।
आपीय बिम्बमधरं पथि शम्बलं हि
राधा समुत्सुकमनास्तरसा गतोऽजः ॥ १६ ॥

मदनरसेन कमनीया वामवदनास्ताः शबरीरामन्त्र्य तासां तमाल-सदृशीं मनोज्ञां वेणिं समामृश्य मार्गे पाथेयं बिम्बाधरममृतमातृप्ति पीत्वा श्रीराधायां समुत्सुकः श्रीकृष्णस्तरसा निर्गतः ॥ १६ ॥

मध्येपथं कुसुमराजिभिरर्च्यमानः
कुञ्जद्रुमावलिमिषाद् वनदेवताभिः।
संस्तूयमानचरितः कलहंसनादैः
संकेतभूमिमगमद् व्रजपः पदातिः ॥ १७ ॥

मध्येमार्गं कुञ्जवृक्षाणां व्याजाद् वनदेवताभिः कुसुमव्रातैः पूज्यमानो मरालानां ध्वनिभिर्गीयमानयशाः स कृष्णः पदातिः संकेतभूमिमगमत् ॥१७॥

भूतार्थकामा विबुधा हि युक्त्या
विशंसनं वैधमुदाहरन्ति।
शरीरसंरक्षणसाधकस्य
लोलाविशेषस्य विशिष्टयोगे ॥ १८ ॥

सत्यमर्थं गवेषयन्तो बुधाः शरीरसंरक्षणसाधिकाया अपि रसनायाः खेचरीमुद्रायाः सिद्धौ कर्त्तनं वैधमामनन्ति ॥ १८ ॥

कुसुमितसहकारशृङ्गवृन्दं
परभृतकूजितराधिकाविधानम् ।
अनुहरदपि राधिकाकलापन्
अलिकुलमभ्यगमत् समीक्षमाणः ॥ १९ ॥

पुंस्कोकिलानां शब्दितं श्रीराधिकाया अभिधानं यस्मिन् तत्, आम्रमञ्जरीमञ्जुलशिखरं तथा श्रीराधायाः काञ्चीध्वनिमनुहरद् भ्रमरस्कुल-मीक्षमाणो माधवः संकेतस्थलमगात् ॥ १९ ॥

लतावितानैर्नियतार्कदीधितिः
तमालपत्रैर्मृदुतल्पपद्धतिः ।
मयूरनृत्यैर्मुदितश्च राधिकां
गाहमानो विपिनं समागमत् ॥ २० ॥

लताभिः सूर्यस्य तेजो यस्य मार्गे निवारितम्, यस्य मार्गः तमालदलैर्मृदुतां नीतः, मयूराणां नृत्यं पश्यन् प्रसन्नो मुरारिर्वनं गाहमानः श्रीराधां समागमत् ॥ २० ॥

स साभिलाषः सरसीरुहेक्षणः
सितच्छदानां मिथुनं रसाप्लुतम् ।
विलोकयन्नर्धनिमीलितेक्षणो
रसाधिराजः प्रययौ श्रियो वनम् ॥ २१ ॥

पथि रसान्वितं हंसमिथुनमर्द्धेक्षणेन निरीक्षमाणः कमलनयनः साभिलाषो रसाधिराजः श्रीकृष्णः श्रीराधाया वनं गतः ॥ २१ ॥

मातङ्गसारङ्गकुरङ्गवाद्यैर्
वनावलिर्वन्यविहङ्गगीतैः ।
मरुच्चलैर्वारिजतालवृन्तै
राधाधिपं श्रीविपिने सिषेवे ॥ २२ ॥

तदा वनालिरारण्यकानां पक्षिणां गीतैर्हस्तिसारङ्गमृगाणां वाद्यैः, वायुना प्रचालितैः कमलैस्तालवृन्तैः श्रीकृष्णं राधाविपिने सिषिवे ॥ २२ ॥

राधापदालक्तकरञ्जितायां
बाधाहरायां मणिमण्डितायाम् ।
चन्द्रप्रभायां स हि शाद्वलानाम्
उपाविशच्छैलतले धरायाम् ॥ २३ ॥

तत्र श्रीवने ततस्ततो भ्रमन्त्याः श्रीराधायाः पादयोरलक्तकेनाङ्किताया सुखदायां चन्द्रस्य प्रभया शोभितायां तृणमय्यां मणिभिर्भूषितायां धरायां शैलपीठे समुपविष्टः ॥ २३ ॥

श्रीवृक्षमोचकमधूककदम्बकाद्यैर्
न्यग्रोधकेसररसालविशालसालैः ।
पुन्नागचम्पकजपागिरिमल्लिकाभिः
पुष्पैः फलैश्च सततं परिवारितायाम् ॥ २४ ॥

पिप्पलमोचक(सहिजन)मधूक(महुवा)कदम्वन्यग्रोधकेसराम्रपुन्नाग-चम्पकजपागिरिमल्लिकानां पुष्पैः फलैश्च वेष्टितायां धरायां शैलपीठे समुपाविशत् ॥ २४ ॥

मन्दारजातिफलिनीनवमालिकानां
बन्धूककेतककुसुम्भकयूथिकानाम् ।
कुन्दातिमुक्तकसरोजहलिप्रियाणां
गन्धैर्विमुग्धमधुपैः परिसेवितायाम् ॥ २५ ॥

मन्दारजात्यादीनां पुष्पाणां सौरभैर्विमोहितैर्भ्रमरैः परिसेवितायां धरायां शैलपीठे समुपाविशत् ॥ २५ ॥

तस्या भुवश्चैकतमप्रदेशे
सरःसरोजैः कलितान्तरालम् ।
विहङ्गमैः सेविततीरभागं
व्यभासतालं स्फटिकाभतोयम् ॥ २६ ॥

पूर्वोक्ताया धराया एकस्मिन् प्रदेशे कमलैर्व्याप्तं पक्षिभिः सेवितं निर्मलतोयं सरोऽशोभत ॥ २६ ॥

उल्लोलकल्लोलचलत्सरोजैः
करैः खगानां विरुतैर्वनालिः ।
छायापि राधाविपिने निषिद्धा
पुंसामिति ख्यापयतीव शश्वत् ॥ २७ ॥

वनालिर्महातरङ्गैरीरितैः कमलैः करैः पक्षिणां शब्दैश्च श्रीराधाया वनेऽस्मिन् पुरुषाणां छायापि वर्जितेति समुद्घोषयति ॥ २७ ॥

कुमुदिनीमकरन्दभरालसो
विमलवारिदिगाहनशीतलः ।
प्रसृतजातिवधूवदनासवो
वहति मारुतजवोऽपि वनानिलः ॥ २८ ॥

कुमुदिनीपुष्परसभरैरलसः, निर्मलजलावगाहनेन शीतः, जातिवधू-मुखासवस्य प्रसारकः, मन्दो वनानिलोऽपि वहति । अर्थात् सुरभिः शीतो मन्दश्च वायुः वहति ॥ २८ ॥

मृदुपुलिन्दवशावदनाम्बुजं
सुरतशुक्तिजघर्मपृषल्लसत् ।
मृदुलतालवलीवनलम्पटो
मृदु मृदु श्रयतीह समीरणः ॥ २९ ॥

सुरतकालिकैर्मुक्तामणिभिः स्वेदबिन्दुभिर्लसत् कोमलं शवरीमुखकमलं कोमललवलीलतालम्पटः पवनः शनैः शनैः सेवते ॥ २९ ॥

नवपयोदघनां जलनीलिकां
स्नपनहीरकवेदिधिया नवा ।
समधिरोढुमिता स्खलिताऽबला
विहसितालिजनैर्विमनायिता ॥ ३० ॥

वर्षणोन्मुखमेघसमानं सेवालं घनीभूतं हीरकनिर्मितां वेदिकां मत्वा काचन वधूटी अधिरोढुं गता स्खलिता च सखीजनैरुपहासितां गता विमनस्काऽभूत् ॥ ३० ॥

स्फटिकनिर्मिततीर्थसरोवरे
स्नपनकालगता रमणीमणिः ।
वदनमण्डनसाधकदर्पणा–
नयनभारसहा न पुलिन्दजा ॥ ३१ ॥

रमणीषु वरा काचन शवरी मुखमलङ्कर्तुं दर्पणं नानीतवती, यतो हि स्फटिकनिर्मितसोपानमेव दर्पणस्थानीयममन्यत ॥ ३१ ॥

विपुलकुङ्कुमरागकषायितो
व्रजवनीवनिताभिषवक्षणे ।
पृथुनितम्बविमर्दतरङ्गितः
सुभगतामुपयाति जलाशयः ॥ ३२ ॥

स्नानकाले व्रजाङ्गनानामङ्गरागेण कुङ्कुमेन कषायितः, विशाल-नितम्बैः विमर्दितो जलाशयः काममशोभत ॥ ३२ ॥

यं वीक्ष्य विच्युतिभिया नवनीरदाभं
नीवीं दृढं पिदधते वनिताः सुराणाम् ।
सोऽयं पदातिरयते गहनेऽप्यरण्ये
राधामुखाब्जमवलोकयितुं सतृष्णः ॥ ३३ ॥

यं घनश्यामं समवलोक्य स्रंसनभिया सुराङ्गना नीवीं दृढं ग्रथ्नन्ति; सोऽयं धने वने श्रीराधामुखकमलं प्रेक्षितुं सतृष्णः पदातिरयते ।। ३३ ।।

यस्यारविन्दपदकामनया मुनीशो
घोरे वने तपति शान्तमना अजस्रम् ।
सोऽप्यद्य भानुखरदीधितिसम्परीतो
राधाधरामृतलवाय पदेन याति ।। ३४ ।।

यस्य श्रीकृष्णस्य पदकमलस्य प्राप्तये शान्तचेता मुनीशो घोरे वने नित्यं तपति, सोऽपि सम्प्रति सूर्यस्य तीक्ष्णतेजसा सन्तप्तो राधाया अधरस्य बिन्दुलवाय पदेन याति ।। ३४ ।।

यत्पादपङ्कजरसं कपिलादयोऽपि
नित्यं समाहितधियो हृदयाब्जकोशैः ।
आस्वादयन्ति परमं पुरुषः स एव
राधापदाब्जमकरन्दलवाय याति ।। ३५ ।।

कपिलादयोऽपि समाधौ इन्द्रियाणि निरुध्य हृदयकमलपात्रैर्यस्य चरणकमलस्य परमं रसं पिबन्ति, स एव पुरुषो राधाचरणकमलस्य रसलवं पातुं याति ।। ३५ ।।

कोऽयं कुतो वा नवगीरदाभो
मयूरपिच्छाङ्कितकाकपक्षः ।
श्रीकौस्तुभालंकृतचारुवक्षा
इतीव सख्यो निनदन्ति तारम् ।। ३६ ।।

अयं नूतनमेघवर्णः कः, कुतश्च समागतः, अस्य शिरो मयूरपक्षैर्भूषितम्, वक्षश्च कौस्तुभमणिना शोभितम्—इत्येवं सख्यस्तारं शब्दायन्ते ।।

नीलाब्जनेत्रं मखचन्द्रकान्तिः
पीताम्बरं चारु कटिप्रदेशे ।
ओजस्विता चास्य गभीरवाण्यं
लोकोत्तरत्वं प्रथयत्यजस्रम् ।। ३७ ।।

अस्याज्ञातपुरुषस्य नीलकमलनयनम्, मुखे चन्द्रज्योत्स्ना, कटिभागे चारु पीताम्बरम्, गभीरववने तेजस्विता चालौकिकत्वं सदा प्रथयति ।।

इत्थं सरस्याः कमनीयकूले
परस्परं तर्कपरासु काचित् ।
संरक्षिकासु प्रमुखा बभाषे
विज्ञायतामालि युवा क एषः ।। ३८ ।।

महासरसः कमनीयपुलिने पूर्वोक्तप्रकारेण परस्परं तर्कं विदधतीषु संरक्षिकासु काचिज्जगाद यद् हे आलि, 'अयं युवा कः' इति विज्ञायताम् ॥

योगैरगम्ये विधिनाप्यदृष्टे
राधापदालक्तकमण्डितेऽस्मिन् ।
भक्त्यैकलभ्ये पुलिने सरस्याः
कुतोऽनुभावी नटवेश एषः ॥ ३९ ॥

श्रीराधापदालक्तकेन शोभिते योगक्रियाभिरगम्ये ब्रह्मणाप्यदृष्टे केवलं भक्त्यैव लभ्येऽस्मिन् सरस्यास्तटेऽयं प्रभावसम्पन्नो नटवेशः कुतः समागतः ॥ ३९ ॥

अहो प्रमादः प्रतिहारभूमौ
यतः समायादतिकामरूपः ।
अन्तर्धिविद्यापिहितोऽथ वायं
ततोऽन्यतो वा नटवत् प्रविष्टः ॥ ४० ॥

प्रतिहारभूमौ अहो अनवधानता ! यतोऽतिकामरूपः समायातः । अथवाऽयमन्तर्धिविद्ययाऽऽत्मानं निगूह्य प्रवेशद्वारतोऽन्यतो वा नट इव प्रविष्टः ॥ ४० ॥

वंशीरवैर्मोहितवन्यजन्तुः
सौन्दर्यमाधुर्यविलुब्धवामः ।
शैलूषकार्ये नितरां प्रवीणः
प्राकारमुत्प्लुत्य समागतः स्यात् ॥ ४१ ॥

अथवः वंशीनादैर्वन्यान् जन्तून् मोहयन् सौन्दर्येग माधुर्येण च वामा विलोभयन् नटकृत्ये नितरां निपुणः प्राकारमुल्लङ्घ्य समागतो भवेत् ॥

यथा तथा वा पुरुषस्त्वपूर्वो
योगीव शैलूष इवाथ वाऽगात् ।
अलं विमर्शेन परं वयस्याः
किमर्थमागात् पुरुषैरगम्ये ॥ ४२ ॥

हे सख्यः; योगीव शैलूष इव वा यथा तथा वाऽगात्, परन्तु पुरुषस्तु अपूर्व एव । तत्त्वविमर्शेनालम्, पुरुषैरगम्ये स्थानेऽस्मिन् किमुद्दिश्यायं समागतः ? ॥ ४२ ॥

सौम्याकृतिश्शोभनवंशभृत्ति

वेशस्तु शैलूषकुलप्रसूतिम् ।

कर्मेदमाख्याति कुलञ्च दस्योर्
वैषम्यमेतन्निखिलं नरेऽस्मिन् ॥ ४३ ॥

अस्य मनोहराकृतिः सत्कुलप्रसूतिमाख्याति, परिधानं तु नटकुलोद्भवमाख्याति, इदं कर्म च चौरकुलोद्भूतिमाख्याति। अस्मिन् निखिलं विलक्षणमेवाभाति ॥ ४३ ॥

हिमगिरिगहने समाधिकाले
प्रकृतिविकारपरः स्वशक्तिमत्तः।
पशुपतिशिखिभस्ममात्रशेषो
मनसिज एष सविग्रहः कथं नु ॥ ४४ ॥

हिमालयस्य घनेऽरण्ये समाधौ प्रजानां मनोविकारः स्वशक्त्या प्रमत्तः शङ्करस्य नयनाग्निना प्राग्भस्मीभूतः पुनः सशरीरो मदनः कथं न स्यात् ॥

भुवनपरिसरेऽनवस्थितेऽस्मिन्
दशशतलोचनभाभिरप्यदृश्ये।
सुरयुवतिविलासभीरुरिन्द्रो
हरिसदने गजवाहनः कथं स्यात् ॥ ४५ ॥

अस्मिन् त्रिभुवनेऽवर्तमाने श्रीराधाविपिने सहस्रनयनैरप्यदृश्ये, इन्द्रप्रासादे सुररमणीभिः सह विलाससक्तोऽत एव भीरुः, सोऽपि हस्तिवाहनः कथं स्यात्! न स्यादित्यर्थः ॥ ४५ ॥

इति वदति सखीजने सरोषे
स्फुरदधरे हरिणीविशालनेत्रे।
त्वरितगतिचलत्पयोधरांशा
व्रजललना कमना जगाद काचित् ॥ ४६ ॥

इत्थं रोषात् चञ्चलोष्ठे विशालनेत्रे सखीजने वदति सति त्वरितया गत्या चञ्चलपयोधरा काचन कमना व्रजललना जगाद ॥ ४६ ॥

व्रजविपिनमहीमहेन्द्रलक्ष्मीर्
यदुकुलभूषणनन्दवंशचन्द्रे।
दृढतररतिवन्ध्यपाशबद्धा
सुरवनिता अद आदरात्तदोचुः ॥ ४७ ॥

व्रजमही महेन्द्रस्य लक्ष्मीः श्रीराधा यदुकुलभूषणनन्दवंशस्य चन्द्रे श्रीकृष्णेऽतिशयानुरागपाशे बद्धेति देवाङ्गना आदरादूचुः ॥ ४७ ॥

राधाविनिर्दिष्टवनप्रदेशां
मरुल्ललत्पङ्कजधूलिपुञ्जाम् ।
संकेतभूमिं पिहितां लताभिश्
शैलूषवेशः समगान्मुकुन्दः ।। ४८ ।।

मरुता ललतां पङ्कजानां धूलेः पुञ्जो यस्यां ताम्, लताभिर्वेष्टिताम्, श्रीराधाया विनिर्दिष्टां संकेतभूमिं नटवेशो मुकुन्दोऽगात् ।। ४८ ।।

इति सुरवनितानिरूपितोऽयं
मृदुमुरलीध्वनिवश्यवन्यजन्तुः ।
समधिगतविलासलास्यजातः
सखि रजनीमुख आगतः कुतश्चित् ।। ४९ ।।

हे आलि, इत्थं सुराङ्गनाभिः प्ररूपितः, वंशीमृदुध्वनिभिर्वशीकृतवन्यजन्तुः, विलासे लास्ये च निपुणे सन्ध्याकाले कुतश्चित् समागतः ।। ४९ ।।

अत्रान्तरे सा प्रतिहाररक्षी
संकेतभूमेरखिला वयस्या ।
संकेतयन्ती वृषभानुजायाः
समागमं साधु ननाद ढक्काम् ।। ५० ।।

अस्मिन् प्रसङ्गे सा द्वारपालिका संकेतस्थलस्य सर्वाः सखी श्रीराधाया आगमनं सूचयन्ती ढक्कां वादयामास ।। ५० ।।

सख्यस्तदानीं सरसीरुहाक्ष्यो
वासन्तिकश्रीपरिधानसज्जाः ।
सन्तानपुष्पाञ्जलयो विनम्रा
जयध्वनिं प्रीतिमुखं वितेनुः ।। ५१ ।।

ढक्कानिनादकाले कमलनयनाः पीताम्बरपरिधानभूषिताः कल्पवृक्षकुसुमानि अञ्जलिभिर्दधानाः प्रसन्नतया जयध्वनिं वितेनुः ।। ५१ ।।

क्षौमाम्बरा तिलकभूषितभव्यभाला
गौरप्रभा प्रहतवन्यतमिस्रजाला ।
सौदामिनीव घननीरदरम्यरन्ध्राद्
आविर्बभूव विपिनाद् वृषभानुजा सा ।। ५२ ।।

कौशेयं वासो वसाना तिलकेन शोभायमानललाटा गौरप्रभया विपिनतिमिरं विनाशयन्ती निविडमेघैकदेशादाविर्भवन्ती विद्युल्लतेव विपिनात् श्रीराधा आविर्बभूव ।। ५२ ।।

सच्छिद्रवेणुकलिताधरसारभूतः
पाषाणकौस्तुभविमर्दितवत्सभागः ।
ब्रूतालयः कुटिलकुन्तलचुम्बितास्यः
कोऽयं विलक्षणजनः प्रमदावनेऽस्मिन् ॥ ५३ ॥

वंशीच्छिद्रेण पीयमानाधरसुधः, कौस्तुभपाषाणेन घृष्टवक्षा विलक्षणजनोऽयं कुटिलालकेन व्याप्तकपोलोऽस्मिन् प्रमदावने कुतः समागत इति हे सख्यो ब्रूत ॥ ५३ ॥

ततो वयस्या मृदुहासशीला
वाचंयभास्ता अवनिं लिखन्त्यः ।
विलोलवेण्योऽवनिजानुयुग्माः
संकेतयामासुरसंस्तवं स्वम् ॥ ५४ ॥

ततो मन्दस्मिता मौनमवलम्बमाना अङ्गुष्ठेन पृथिवीं लिखन्त्यो निहितावनिजानवो मस्तकं धुन्वानाः स्वकीयमपरिचयं संकेतयामासुः ॥५४॥

गच्छालि कुञ्जं नवनीपपुञ्जं
ज्योतिष्मतीद्योतितकाननश्रि ।
विश्रम्य तस्मिन् क्षणमेव कञ्चिज्
जानीहि तं त्वं पुरुषं विचित्रम् ॥ ५५ ॥

हे सखि श्रीराधे, नूतनकदम्बकरम्बितं ज्योत्स्नाप्रकाशितकाननशोभं कुञ्जं गच्छ । तत्र क्षणं विश्रम्य तं विचित्रं पुरुषं त्वं जानीहि ॥५५॥

प्रस्वेदगात्रि पुलकाञ्चितचम्पकाङ्गि
स्मेरानने स्फुरितवाममृगाक्षि विज्ञे ।
एकापि रम्यरजनी स्वजनार्पणेन
सम्भाव्यतां रमसि कुञ्जनिवासशीले ॥ ५६ ॥

हे पुलकाङ्कितगौरशरीरे, स्वेदार्द्रदेहे, मन्दस्मिते, स्फुरितमनोहरनयने, चतुरे, रमणीया एकापि रात्रिः कुञ्जनिवासेनं रहसि सम्भाव्यताम् । एतेन श्रीराधायाः सात्त्विकभावोदयवर्णनं सखीमुखेनोक्तम् ॥ २६ ॥

स्वर्णप्रभे हसितिपार्वणशर्वरीशे
यस्त्वं बिभर्षि सततं कबरीमिषेण ।
तद्रूपमेव धृतपङ्कजपाणिपादं
साक्षादुपेतमधुना तव पादमूलम् ॥ ५७ ॥

हे गौराङ्गि, चन्द्रमुखि, त्वमद्यावधि केशपाशव्याजेन धारयसि, तदेव रूपं कमलपाणिपादमद्य तव चरणे साक्षात् उपेतम् ॥ ५७ ॥

त्वं रोचना चम्पकपुष्पकान्तिः
पुमानयं नीलसरोजलक्ष्मीः ।
संसर्ग आस्तां युवयोरिदानीं
विद्युल्लता गच्छतु वारिवाहम् ॥ ५८ ॥

हे आलि, त्वं गौरशरीरकान्तिः, अयं पुरुषश्च नीलकमलकान्तिः, त्वयोर्द्वयोः सम्बन्धो विद्युल्लता-जलदयोरिव भवतु ॥ ५८ ॥

गर्गोऽवदत् प्रियमिदं तव जन्मकाले
कृष्णेन केन विपिने सखि नीपकुञ्जे ।
संरंस्यसे शरदि पार्वणचन्द्रिकायाम्
इत्यामनन्ति समये समये हि वृद्धाः ॥ ५९ ॥

हे सखि, तव नामकरणसंस्कारे 'वृन्दाविपिने कदम्बकुञ्जे केनापि कृष्णेन शरदि पूर्णचन्द्रचन्द्रिकायां त्वं रंस्यसे' इति वृद्धाः समये समये वार्ताप्रसङ्गे कथयन्ति ॥ ५९ ॥

यल्लक्षणं शुभफलं मुनिना तदोक्तं
देवेन्द्रदुर्लभमिदं निखिलं तदस्मिन् ।
संलक्षितः स समयोऽस्त्यशरीरवाचा
तं त्वं विभावय रसेश्वरि कुञ्जवासैः ॥ ६० ॥

हे रसेश्वरि श्रीराधे, जन्मकाले गर्गेण शुभफलदायकं यद्यल्लक्षणं शक्रदुर्लभं प्रतिपादितं तत् सर्वमपि पुरुषेऽस्मिन् वर्तते । आकाशवाण्याऽपि लक्षितः स समयः समागतः । अतः सम्प्रति निकुञ्जनिवासैः त्वं तं समयं सम्भावय ॥ ६० ॥

अन्वर्थतां भजति भूमिरियं व्रजस्य
यत्रेन्दिरा श्रयति विष्णुपदं विहाय ।
ग्रामस्य नन्दवसतेरपि नन्दनेऽपि
किं मालती त्यजति सौरभमालि कच्चित् ॥ ६१ ॥

व्रजभूमिरियमन्वर्थतां भजति; 'व्रजति गच्छति श्रीर्यत्र स व्रजः' इति व्युत्पादनात् । यत्र विष्णुपदं विहाय इन्दिरा वसति । नन्दग्रामस्य नन्दनोऽपि वसति । हे सखि, मालती कदापि सौरभं त्यजति किम्! न त्यजतीत्यर्थः ॥

संकेतयन्ती वृषभानुजा ता
मार्गान्तरान्नेतुममुं युवानम् ।
उत्सङ्गसंश्लेषसमुत्कचेता
ज्योत्स्नेव चन्द्रं तरसा जगाम ॥ ६२ ॥

अथ वृषभानुजा मार्गान्तरेण तं युवानं नेतुं ताः सखीः संकेतयन्ती युवक्रोडसम्पर्कायोत्कण्ठितमनाश्चन्द्रिकेव चन्द्रं वेगेन जगाम ॥ ६२ ॥

पूर्णानुरागसरसीमवगाहमाना
तत्तन्मनोरथशतं हृदि कल्पमाना ।
नीलं महो मनसि तद् हृदये दधाना
राधा जगाम सपदि स्वपदे विलीना ॥ ६३ ॥

श्रीकृष्णे परमं प्रेमाणमावहन्ती, मनसि तत्तन्मनोरथशतं चिन्तयन्ती, नीलं महो मनसि दधाना, स्वस्यामेव विलीना श्रीराधा सपदि ततो जगाम ॥

आलीभिरस्याः करपल्लवैश्च
संकेतितोऽसौ रसराज आशु ।
स्वामेव वृत्तिं तरसाऽभियातुं
कदम्बकुञ्जाभिमुखं प्रतस्थे ॥ ६४ ॥

ततः श्रीराधायाः सखीभिः पाणिपल्लवैः संकेतितोऽसौ रसराजः तूर्णं स्वामेव वृत्तिं गन्तुं कदम्बानां कुञ्जं प्रतस्थे ॥ ६४ ॥

हंसस्वनैः कोकिलकूजितैश्च
मरीचिजालै रजनीवरस्य ।
स्पन्दैश्च वामेतरनेत्रभागे
प्रोत्साहितः काम्यपदं प्रयातुम् ॥ ६५ ॥

हंसानां निनादैः कोकिलानां कलकूजनैः शशाङ्कस्य किरणैर्दक्षिण-नेत्रस्य स्फुरणैरिष्टस्थानं गन्तुं श्रीकृष्णस्तदानीं प्रोत्साहितः ॥ ६५ ॥

निवृत्ततर्षो विषयाच्च बाह्यात्
स्वस्मिन् समावेशितबुद्धिवृत्तिः ।
विगाहमानः स्वरसं पयोधिं
योगीव राध्यां पदवीं दधानः ॥ ६६ ॥

बाह्यविषयान्निवृत्ततृष्णो वशीकृतेन्द्रियः स्वरसंपयोधम वगाहमानो योगीव राधनीयवस्तु मनसि दधानः प्रतस्थे ॥ ६६ ॥

ततो वयस्यानुमतो मुरारिर्
वृन्दाटवीगोकुलचारणस्य ।
फलं लभेयेति तदा विचिन्तन्
कुञ्जं प्रपेदे मनसा क्षणेन ।। ६७ ।।

ततः सखीभिरनुमोदितः स कृष्णो वृन्दावने गवां चारणस्य फलमद्य प्राप्स्यामीति चिन्तयन् मनसा क्षणेन कुञ्जं गतः, शरीरेण तु विलम्बेनेति भावः ।। ६७ ।।

गन्तव्यकुञ्जो न ततो विदूरः
क्षणेन शक्यो व्रजितुं तदानीम् ।
सोऽपि क्षणः कोटियुगायतेऽस्य
प्रियात् पदार्थादसह्यो वियोगः ।। ६८ ।।

स च गन्तव्यः कुञ्जस्ततो विदूरो नासीत्, क्षणेन गन्तुं शक्य आसीत्, तथापि स क्षणः कोटियुगमिवाभूत् । यतो हि प्रियस्य वस्तुनो वियोगो मनागपि दुःसह्यो भवति ।। ६८ ।।

आलीभिराभीरसुताभिरध्वा
प्रदर्शितोऽपि व्रजराजसूनोः ।
न दृश्यतामाप मनोगतत्वाद्
राधानिकुञ्जं प्रसभं पुरस्तात् ।। ६९ ।।

सखीभिर्गोपीभिर्निर्दिष्टोऽपि पन्थाः श्रीकृष्णेन लक्ष्यमाणो नाभूत्, यतो हि तस्य मनसः पूर्वमेव श्रीराधाकुञ्जं गमनादिन्द्रियैः संयोगाभावात् मार्गज्ञानं नाभूत् ।। ६९ ।।

पन्थानमेव गिरिराजगुहानिकुञ्जं
मत्वा मुरारिरवदद् व्रजसुन्दरीस्ताः ।
साक्षात्करोमि रमणीं रमणीयतान्तां
नीये कथं घनवनीं स्वसमीहितार्थम् ।। ७० ।।

पन्थानमेव गिरिराजगुहानिकुञ्जं मत्वा ता व्रजसुन्दरीरवदत् यदिहैवातिसुन्दरीं तां रमणीं पश्यामि । किमर्थं पुनः स्वसमीहितार्थं घनं वनमहं नीये ! ।। ७० ।।

नेयं सखी न च किशोरघना वनालिर्
नायत् प्रयोजनमपि स्वयकोहितं नः ।

त्वत्कामनाविवशमानसमस्मदीयं
गन्तव्यमेव नयतीति विभावय त्वम् ॥ ७१ ॥

हे किशोर, इयं ते सखी न, न चेयं घना वनालिर्न, त्वया तर्कितं प्रयोजनमप्यस्माकं नास्ति, परन्तु तव कामनया वशीकृतात्माऽस्माकं त्वां गन्तव्यमेव स्थानं नयतीति त्वं जानीहि ॥ ७१ ॥

नेदिष्ठं कदली कलापकलितं नीपावलीनीलितं
कातर्यंव्रजवल्लवीहृदयराड् हित्वा निकुञ्जं व्रज ।
यत्र श्रीर्विरहाकुला प्रतिपलं मार्गं चिराद् वीक्षते
वैयात्यं व्रजसुन्दरीषु भवतो विख्यातमेव स्वयम् ॥ ७२ ॥

हे व्रजवल्लवीहृदयेश, कातरतां विमुच्य समीपे वर्तमानं कदली-कदम्बकल्पितं कदम्बैः परिवारितं निकुञ्जं गच्छ । यत्र श्रीराधा विरहाकुला प्रतिपलं तव मार्गं प्रतीक्षते । व्रजसुन्दरीषु तव धार्ष्ट्यं च प्रथितमेव ॥

अन्योन्यं व्रजधामवामनयनाप्रत्यक्षमालिङ्गतो
राधामाधवयोर्विहारविपिनं पृक्तं तुषारैः सदा ।
कालिन्द्या मृदुमालतीसुरभितं मौनैर्मुदाऽऽशंसितं
भक्तानां भवतापभीतिहरणं भूमण्डले राजताम् ॥ ७३ ॥

परस्परं गोपिकानां प्रत्यक्षमालिंगनतोस्तयो राधामाधवयोः कालिन्द्यास्तुषारैः सिक्तं मालतीकुसुमैः सुरभितं मुनिवृन्दैराकांक्षितं भक्तानां भवतापभीतिहरणं विहारविपिनं भूलोकेऽस्मिन् राजताम् ॥ ७३ ॥

धन्या व्रजस्य ललनाः कमनाः सुरीणां
यासां विलोलनयनानि रसाप्लुतानि ।
राधामुरारिनटनं विपिने यतो हि
पश्यन्ति सादरमहो सुरराजकाम्यम् ॥ ७४ ॥

सुरांगनानामपि कमनीया व्रजस्य ललना धन्याः, यतो हि यासां चञ्चलानि रसैः प्लुतानि नयनानि विपिने इन्द्रेणापि काम्यं राधामाधवयोर्नटनं सादरं पश्यन्ति ॥ ७४ ॥

यश्चन्द्रशेखरबुधात् किल मङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः ।
तद्राधिकाचरणचिन्तनचारुकाव्ये
एकादशत्वमगमत् मधुवर्षिसर्गः ॥ ७५ ॥

श्रीचन्द्रशेखराद् मङ्गलायां जातेन श्रीकालिकाप्रसादशुक्लेन विरचिते श्रीराधाचरणचिन्तनचारुकाव्ये मधुवर्षी एकादशः सर्गः समाप्तः ।। ७५ ।।

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये एकादशः सर्गः समाप्तः ।।

द्वादशः सर्गः

कुसुमितवनराजौ झङ्कृतायां द्विरेफैः
पिककुलकलरावे मञ्जरीमञ्जुचूते।
मदनरससरस्यां वन्दिते जन्तुजाते
त्रिभुवनकमनीया केलिराविर्बभूव ॥ १ ॥

वनराजौ पुष्पितायां भ्रमरैः झङ्कृतायां सत्यां मञ्जरीभिर्मनोहरे रसाले पिकानां मनोहरे शब्दे सति, कामरससम्भृते महति सरसि प्राणिसमूहे स्नाते सति त्रिभुवनकमनीया राधामाधवयोः केलिः प्रारब्धा ॥ १ ॥

सरसिजदलकान्ते राधिकायाः कपोले
मृदुकुसुमशलाकाप्रान्तभागैः सलीलम्।
करधृतहनुजानुः पुष्पनिःष्यन्दसारैः
पुलकितवनमाली चित्रलेखां विधत्ते ॥ २ ॥

कमलपत्र इव कान्ते श्रीराधायाः कपोले पुष्पशलाकायाः प्रान्तभागैः कुसुमरसैः श्रीराधाया हनुजानुनी धृत्वा रोमाञ्चितो वनमाली सलीलं चित्रलेखां करोति ॥ २ ॥

सुरभिकुसुममालां केशपाशेऽपि गुम्फन्
असितभुजगलीले गन्धवाहाभिलोलात्।
जघनशयितराधापक्वविम्बाधरोष्ठं
मधुकर इव पद्मं सेवते साभिलाषः ॥ ३ ॥

श्रीकृष्णः श्रीराधायाः पवनेरिते कृष्णसर्पलीलां विदधति केशपाशे सुरभिपुष्पमालां गुम्फन् जघने शयितायास्तस्याः पक्वबिम्बाधरोष्ठं पद्मं भ्रमर इव साभिलाषः पिबति ॥ ३ ॥

अमरकुसुमहारं कम्बुकण्ठप्रदेशे
स्तनयुगमनुलम्बं राधिकायाः परायाः।
निजकरकमलाभ्यां योजयन् शिल्पिराजः
सुरनरवनितानां साधुवादान् प्रपेदे ॥ ४ ॥

परायाः श्रीराधायाः कम्बुकण्ठे स्तनयुगपर्यन्तं लम्बमानं पारिजातपुष्पहारं प्रकृष्टः शिल्पी श्रीकृष्णो निजकराभ्यां योजयन् सुराङ्गनानां साधुवादान् प्राप्त ॥ ४ ॥

विकसितमुखकुन्दं कर्णजाहे निबध्नन्
कमपि कमपि भावं भावयन् रङ्गजीवः ।
अतिशयपरिवीक्षाव्याजतो गण्डपालिं
स्पृशति कमलरागां राधिकाया व्रजेशः ॥ ५ ॥

रङ्गजीवो नटः श्रीकृष्णोऽनिर्वचनीयं कमपि भावं मनसि निधानोऽतितरां समीक्षणव्याजेन श्रीराधायाः कपोलौ स्पृशन् अर्द्धविकसितं कुन्दकुसुमं कर्णमूले निबध्नाति ॥ ५ ॥

वलयितमणिबन्धे बिम्बितांशं मृणालैः
किसलयदलरागैः सिक्तकामाङ्कुशं हि ।
प्रतिपलमपि पश्यन् शर्वरीशं प्रियाया
अधररसपरीतं माधवश्चानुमेने ॥ ६ ॥

मृणालतन्तुभिर्वलयितमणिबन्धे नवपल्लवरसैः रञ्जितं प्रतिबिम्बितं नखं प्रतिपलं पश्यन्नपि माधवः प्रियाया अधररसरञ्जितं चन्द्रमुत्प्रेक्षितवान् ॥ ३ ॥

अतितनुकटिकाञ्चीं चम्पकैश्चारुगन्धैर्
मदनसदननाभ्या चीनया ग्रस्तमध्याम् ।
विपुलजघनलम्बां दृष्टिपीयूषवापीं
कलयति वनमाली कोऽपि धन्यो विधिज्ञः ॥ ७ ॥

सुरभिभिश्चम्पकैरतिसूक्ष्मकटौ मदनसदनचीननाभ्या कवलितमध्यभागां विशालजघनभागपर्यन्तालम्बां चक्षुषोऽमृतवापीं मेखलां कोऽपि धन्यो विधिज्ञः श्रीकृष्णो निर्माति ॥ ७ ॥

ललितसुरभिकुन्दैर्निर्मितौ नूपुरौ तौ
अनुकृतविधुबिम्बौ पादलग्नौ प्रियायाः ।
अवनितलशिरस्को वीक्षते लीलया च
प्रणमति मृदुहासः फुल्लपादारविन्दम् ॥ ८ ॥

माधवस्तदनु श्रीराधाया ललितैः सुरभिभिश्च कुन्दकुड्मलैर्निर्मितौ चन्द्रबिम्बमनुकुर्वन्तौ पादेलग्नौ नूपुरौ धरातले शिरो निधाय लीलया वीक्षते मृदुहासः सन् विकसितकमलं पादं प्रणमति च ॥ ८ ॥

निकृतकमलकोशं गन्धलुब्धद्विरेफं
पदयुगतलभागं स्वीयपादेऽपि धृत्वा ।
नवकिसलशलाकां पुष्पनिःष्यन्दलिप्तां
व्यफलवदसिमार्गं रञ्जयन् मो क्रमेण ॥ ९ ॥

गन्धस्य लोभेन भ्रमद्भ्रमरं कमलं निराकृत्य सेवितभ्रमरं श्रीराधा-पादं स्वपादे धृत्वा पुष्परसलिप्तां नवकिसलयशलाकां भ्रमेण न रञ्जयन् विफलतामनयत् । अतिशयलौहित्यं पादस्य व्यञ्जितम् ॥ ९ ॥

इत्थं प्रसाधिततनुः कमनीयरूपा
मन्दस्मिता पुलकपल्लविताऽप्यवादीत् ।
दासीपदे तव नियोजनमस्तु कच्चित्
शीघ्रं समीहितफलं त्वरितं लभस्व ॥ १० ॥

पूर्वोक्तप्रकारेणालङ्कृतशरीरा कमनीयरूपा पुलकिता श्रीराधा मन्दं हसन्ती श्रीकृष्णमवादीत् यत् अतः परं तव दासीपदे नियुक्तिर्भवतु । तेन त्वं त्वरितं समीहितफलं प्राप्स्यसि ॥ १० ॥

तत्त्वं गृहाण रमणीरमणीयरूपं
सिन्दूरमेदुरतमालकचालिमध्यम् ।
मुक्तावलीलसितसारसकम्बुकण्ठं
यावानुरञ्जितकुशेशयपाणिपादम् ॥ ११ ॥

तस्मात् त्वं नारीणां कमनीयं रूपं गृहाण, तमालसदृशकेशपाशमध्ये सिन्दूररेखा विराजताम्, सारससदृशे लम्बे कम्बुकण्ठे मुक्तावलिर्लसतु, कमलपाणिपादं चालक्तकरागरञ्जितं भवतु ॥ ११ ॥

शाटिच्छटानिकृतचम्पकपुष्पकान्ति
वेणीलसत्कनककुण्डलकान्तकर्णम् ।
मञ्जीरमण्डितमनोहरगोहिरं हि
त्रैलोक्यमञ्जनगभीरवलीतनाभि ॥ १२ ॥

शाटककान्त्या चम्पकपुष्पकान्तिः तिरस्कृता भवतु, केशपाशेन लसद्भ्यां कनककुण्डलाभ्यां कर्णौ शोभेताम्, नूपुरेण पादौ मण्डितौ भवताम्; त्रैलोक्यस्य मज्जनाय त्रिवलीयुता गभीरा नाभिर्भवतु । एवम्भूतं तव रमणीरूपं भवतु ॥ १२ ॥

मदनविजययूपं कामिनिकल्पवृक्षं
युवकहृदयरागोत्पादनारङ्गकल्पम् ।
उरसि वसनबद्धं यौवनाबद्धमूलं
वद नट नवकुम्भं को विदध्यादकस्मात् ॥ १३ ॥

हे नट, पूर्वोक्तं सर्वमपि वस्तु त्वयि सम्भाव्येत, किन्तु कामस्य विजय-

स्तम्भं कामिनीनां कल्पवृक्षं यस्य मूलं यौवनविरूढं यूनां मनोरागवर्द्धकं

नारङ्गं वक्षसि वसनबद्धं नव कुम्भोपमं स्तनं कोऽकस्माद् विदध्यात् । को ब्रह्मा विदध्यात् ? ॥ १३ ॥

कश्चित् कदाचित् तरुणः प्रमत्तः
सौन्दर्यसाराम्बुधिमग्नचित्तः ।
बलात् तव स्पर्शसुखं यदीच्छेत्
विडम्बना नः कियती तदा स्यात् ॥ १४ ॥

यदा कश्चन प्रमत्तस्तव सौन्दर्यमुग्धचेता बलात् कदाचित् स्पर्शसुखं वाञ्छेत् तदास्माकं कियती विडम्बना स्यादिति तर्कयसि ! ॥ १४ ॥

दासीति मत्वा व्रजवल्लवीनां
काचित् कदाचित् परिरब्धुकामा ।
पुम्भावमासाद्य विनोदकाले
मध्ये सखीनां कथमाचरेन्नु ॥ १५ ॥

त्वां दासीं मत्वा कदाचिद् विनोदकाले काचन परिरब्धुकामा गोपी तव पुरुषत्वमासाद्य सखीनां मध्ये कथमाचरेदिति वितर्कः ॥ १५ ॥

व्रजाङ्गनानां कुशला वयस्या
पुमानिति त्वां स्वरतोऽध्यवस्य ।
निशान्तनारीश्च कथं प्रविष्टो
वामाकलङ्कोऽयमिति प्रतर्केत् ॥ १६ ॥

व्रजसुन्दरीणां काचन चतुरा सखी त्वां 'पुमानयम्' इति स्वरेणाध्यवस्य केनोद्देश्येन केन च पथा नारीकलङ्कोऽयं प्रविष्ट इत्यादि तर्कपरा स्यात् ॥ १६ ॥

गोपीषु काचित् तनुलक्षणज्ञा
पुनः पुनः शान्तमना निरीक्ष्य ।
कराब्जलेखां ललितां स्फुरन्तीं
सन्देहदोलायितमानसा स्यात् ॥ १७ ॥

व्रजाङ्गनासु शरीरलक्षणविज्ञा काचन समाहितमना अस्य करे स्फुटां मनोहरां रेखां पुनः पुनः समीक्ष्य, अस्य वेशो रामोचितः, हस्तरेखा च पुरुषस्य इति सन्देहदोलामधिरूढा स्यात् ॥ १७ ॥

वक्षोजभारानतपूर्वकायं

गतिं मरालीं जघनस्य भारात् ।

रामास्वभावे निहितां ह्रियं वा
नोद्वीक्ष्य सख्यः किमु तर्कयेयुः ॥ १८ ॥

स्तनगौरवान्नतं पूर्वकायं नितम्बस्य भारात् हंसगतिं स्वभावाद् रमणीषु वर्तमानां लज्जां वा नोद्वीक्ष्य सख्यः किमाशङ्केरन् ॥ १८ ॥

यावद्विलासविशिखा वनितासु दृष्टा
नैकोऽपि तेषु परिचुम्बति यौवनं ते ।
अन्तःपुरेऽधिवनितं वसतिं वदातः
षण्ढाः कथं कपटकामिनि मर्षयेयुः ॥ १९ ॥

वनितासु यावन्तो विलासवाणा उपलभ्यन्ते, तेषु एकोऽपि तव यौवने नोपलभ्यते । अतो हे कपटकामिनि इहान्तःपुरे वनितानां मध्ये तव वसतिं वर्षवराः कथं सहेरन् ! ॥ १९ ॥

प्रत्नप्रयत्नैः स्थगिता दुकूलैर्
दिव्याङ्गरागैरतिसंस्कृतापि ।
आमूलसंकर्तितकूर्चवाला
कपोलपालिर्न जहाति रौक्ष्यम् ॥ २० ॥

नवनवोपायैर्वस्त्रैराच्छादिता बहुमूल्यैरङ्गरागैः संस्कृतापि श्मश्रूणां वालेषु सम्यक् कर्तितेषु तव कपोलपालिर्न रौक्ष्यं जहाति ॥ २० ॥

पदे पदे त्वं निपुणं निरीक्ष्यो
व्रजाङ्गनाभिश्चतुराभिरङ्ग ।
वामाङ्गहीनो मदनाङ्कमूढो
निष्कासनीयोऽपि निगूहितः स्याः ॥ २१ ॥

चतुराभिर्व्रजबालाभिः प्रतिपदं त्वं वामानां विशिष्टाङ्गहीनो मदन-चिह्नहीनश्च निरीक्षमाणः सन् मया निगूहितोऽपि निष्कासनीयो भविष्यसि ॥ २१ ॥

आल्यस्त्वदर्थं हरितालिकाहे
गौरीं समचर्यागुरुचन्दनाब्जैः ।
देवि प्रपन्नेति सखी मदीया
वरं वरं देहि निवेदयेरन् ॥ २२ ॥

हरितालिकाव्रतदिने त्वदर्थं भगवतीं गौरीं चन्दनपुष्पधूपदीपैः विधिना सम्पूज्य हे देवि, 'इयं मदीया सखी कुमारी त्वां प्रपन्ना', इति अस्यै कान्तं पतिं देहीति सख्यो निवेदयेरन् ॥ २२ ॥

त्वत्कान्तिपीयूषरसार्द्रचित्ता
आभीरबाला मदनानभिज्ञाः ।
प्रत्युत्सवं देवकुलं प्रयाताः
सौभाग्ययाच्ञां तव संविदध्युः ॥ २३ ॥

तव कान्तिसुधयाऽऽर्द्रमनसः कामानभिज्ञा आभीरबालाः प्रत्युत्सवं देवस्थानं गतास्त्वदर्थं सौभाग्यप्रार्थनां कुर्युः ॥ २३ ॥

कुलाङ्गनास्ता वयसापि वृद्धा
नैमित्तिकान् वन्यलतागृहस्थान् ।
साधूंश्च पाणिग्रहणे त्वदीये
सौभाग्यकालादि निवेदयेयुः ॥ २४ ॥

वयसा वृद्धा अपि कुलस्त्रियो दैवज्ञान् योगिनः साधूँश्च तव पाणिग्रहणमुहूर्तादिकं पृच्छेयुः ॥ २४ ॥

गौरीदिनं शोभनमद्य बाले
सौभाग्यसिद्धौ नितरां प्रशस्यम् ।
कलिन्दकन्याविमलाम्भसि त्वं
स्नात्वा व्रतं चाचर देवकन्ये ॥ २५ ॥

सौभाग्यस्य सिद्धये कामं प्रशस्यं शोभनमद्य गौरीदिनम्, अतो हे बाले देवकन्ये, यमुनाया निर्मले जले स्नात्वा गौरीव्रतं समाचर ॥ २५ ॥

उपोष्य सम्यग् दिवसं समग्रं
भुङ्क्ष्वाबले पायसमेकमन्नम् ।
सम्पूज्य गौरीं विधिवच्च सायं
पतिं लभस्वात्ममनोऽनुकूलम् ॥ २६ ॥

हे अबले, समग्रं दिवसमुपोष्य सायं विधिवद् गौरीं सम्पूज्य केवलं पायसान्नं भुङ्क्ष्व । तेन स्वमनोऽनुकूलं पतिं लभस्व ॥ २६ ॥

इत्येवमाभीरकुलाङ्गनाना-
माशीविशेषैरभिनन्द्यमाना ।
न त्वं स्मरेरात्मनि किञ्चिदेव
पुमानहं वा विमला वधूटी ॥ २७ ॥

व्रजाङ्गनानामित्येवमाशीर्भिर्वर्ध्यमाना त्वं मनागपि न स्मरिष्यसि यदहं पुमान् निर्मला वधूटी वेति ॥ २७ ॥

शनैश्शनैरेष उदन्त उग्रो
मातुर्निवासं प्रविशेद् यदा हि ।
दोष्पाशबद्धः कुचमुद्गरैश्च
कुट्टिष्यसे गोपविलासिनीभिः ॥ २८ ॥

अतिगभीर एष वृत्तान्तो यदा शनैश्शनैर्मातुर्निवासं गमिष्यसि, तदा त्वं भुजाभ्यां निबद्धः स्तनमुद्गरैर्गोपीभिस्ताडयिष्यसे ॥ २८ ॥

व्रजाङ्गनापाणिपयोजशुम्बैः
पुनः पुनस्त्वं प्रतिकृष्यमाणः ।
न्यायालये मातुरनीशकायः
प्रेक्षिष्यसे मामतिकातराक्षः ॥ २९ ॥

व्रजवनितानां करकमलरश्मिभिः पुनः पुनः प्रतिकृष्यमाणो मातुर्न्यायालयेऽनीशकायस्त्वं मामतिकातराक्षः प्रेक्षिष्यसे ॥ २९ ॥

रे धूर्त रूपव्यभिचारकारिन्
मुग्धाबलाः पांसुलतां नयंस्त्वम् ।
प्रच्छन्नवेशो न हि लज्जसेऽद्धा
प्रताडितः स्या इति रक्षिकाभिः ॥ ३० ॥

रे धूर्त, स्वरूपविरुद्धं प्रच्छन्नवेशस्त्वं मुग्धाबालानां पांसुलतानयनरूपं कर्म कुर्वाणो मनाक् न लज्जस इति कथयन्तीभी रक्षिकाभिः प्रताडितः स्याः ॥ ३० ॥

दासश्च दासीति परी क्षणार्थं
देशे विविक्ते च दिगम्बरत्वम् ।
काचिच्चिरण्टी यदि त्वां नयेत
किन्नाटकं वाचरितं त्वया स्यात् ॥ ३१ ॥

त्वं दासो दासी वेति परीक्षणार्थं यदि काचन वधूटी त्वां विविक्ते देशे दिगम्बरतां नयेत तदा त्वया किं नाटकमाचरितं स्यात् ! ॥ ३१ ॥

आभीरवामाशतमण्डलस्य
मध्ये सखे कन्दुकतामुपेतः ।
पादप्रहारैः कलया विलुण्ठन्
स्या हासपात्रं हि कुमारिकाणाम् ॥ ३२ ॥

हे सखे, आभीरवामानां मण्डले तासां पादप्रहारैः कन्दुकतामुपेतोऽत एव कलया भूमौ विलुण्ठन् कुमारिकाणां त्वं हासास्पदं स्याः ॥ ३२ ॥

पूर्णेन्दुसुन्दरमुखः सरसीरुहाक्षः
कामारिदग्धमदनं ननु जीवयन् सः ।
वामाकटाक्षविशिखैरपि हन्यमानः
पादप्रहारशतकं नु कथं सहेत ॥ ३३ ॥

पूर्णचन्द्राननः, कमलनेत्रः, शङ्करेण प्रज्वालितमपि कामं निश्चयेन जीवयन्; वनितानां कटाक्षैर्बाणैर्हन्यमानोऽपि स शतं पादप्रहारान् कथं सहेतेति वृद्धावचस्तव रक्षणाय भविष्यतीति परेण सम्बन्धः ॥ ३३ ॥

पुष्पप्रहारमपि सोढुमनीशकायं
कस्यापि वंशजलधेः प्रियपर्वचन्द्रम् ।
व्यर्थं कदर्थयथ सख्य इति विषण्णं
वृद्धावचस्तव भविष्यति रक्षणाय ॥ ३४ ॥

पुष्पप्रहारमपि सोढुमक्षमं कस्यचिद् वंशसमुद्रस्य पूर्णचन्द्रं विना प्रयोजनं हे सख्यः कदर्थयथ इति दीनं वृद्धायाः कस्याश्चिद् वचस्तव रक्षणं करिष्यति ॥ ३४ ॥

नो ताड्यतामधिनिशान्तममन्दगामी
बालोऽपि दुष्टचरितो वपुषा कुलीनः ।
सम्मोहयन्नखिलवामदृशां मनांसि
को वा विधुं पदतलेन विमर्दयेत ॥ ३५ ॥

निखिलानां रमणीनां मनांसि विमोहयन् दुष्टचरितोऽपि वपुषा कुलीनोऽन्तःपुरे स्वच्छन्दगामी बालोऽयं न ताडनीयः । पादतलेन चन्द्रं को वा विमर्दयेत ! ॥ ३५ ॥

नैवं शिशो त्वमपि कार्यमनार्यजुष्टं
कुर्याः कुलं तव कलङ्कमुपैतु येन ।
इत्यादि नीतिनिपुणाः कुलवृद्धरामास्
त्वां क्रोधवित्तवनिताश्च निवेदयेयुः ॥ ३६ ॥

हे शिशो, त्वमपि दुष्टं कर्म न कुर्याः, येन तव कुलं कलङ्कयुक्तं मा भूदिति कुलवृद्धा रामाः क्रोधयुक्ता वनितास्त्वां निवेदयेयुः ॥ ३६ ॥

ज्ञात्वाऽपि वृत्तं कतिचिद् वयस्याः
सङ्गोपयन्त्यश्चरितं त्वदीयम् ।
नोद्घाटयेयुः परमं रहस्यं
पुनः पुनः प्रश्नपरा भवेयुः ॥ ३७ ॥

काचन सख्यो वृत्तं ज्ञात्वापि त्वदीयं चरितं गोपयन्त्यः परमं रहस्यं न प्रकाशयेयुः, किन्तु पुनः पुनः प्रश्नं कुर्युः ॥ ३७ ॥

कुतहलाक्रान्तनिशान्तवामा-
मध्ये प्रवृद्धा वयसा च बोधात् ।
माया दुरन्तेति विभोरचिन्त्या
प्रावोचतालीर्मधुराक्षराणि ॥ ३८ ॥

कुतूहलाक्रान्तानामन्तःपुरनिवासिनीनां सुन्दरीणां मध्ये वयसा ज्ञानेन च वृद्धा काचन गोपी 'भगवतो माया दुरन्ता, अत एव न चिन्तनीया' इति मधुराक्षराणि सखीः प्रावोचत् ॥ ३८ ॥

मधुरमधुरहासैर्मध्यमध्ये कटाक्षैर्
निकृतनिगमसारां प्रीतिमात्रावधाराम् ।
मुनिजनसमभीष्टां कृष्णसाराञ्च वाणीं
कतिपयपलमुक्त्वा मौनितामाप राधा ॥ ३९ ॥

मन्दस्मिता कटाक्षयुक्ता श्रीराधा वेदसारां प्रीतिमात्रनिष्कर्षां मुनिजनाभिमतां कृष्णतत्त्वैकसारां वाणीं कतिपयपलमुक्त्वा मौनितां जगाम ॥

अवसितवचनां तां कौमुदीं शारदीं स्वां
कलितललितलीलो मार्गशीर्षो मुरारिः ।
तुहिनदशनदीप्त्या भासयन् राध्यराधां
नवजलधरकान्तिर्मन्दहासो न्यगादीत् ॥ ४० ॥

पूर्वोक्तवाक्यानन्तरं स्वकीयां शारदीं ज्योत्स्नां श्रीराधां दन्तकान्त्या प्रकाशयन् कृतानेकलीलो मार्गशीर्षो नूतनमेघरूपो मन्दस्मितो मुरारिरवादीत् ॥ ४० ॥

स्निग्धे त्वयोक्तं निखिलं सहिष्ये
यतोऽङ्गनावामपदावमर्दे ।
रजांसि भूयांसि मदीयदेहाच्
चण्डातकैः स्युः परिमार्जितानि ॥ ४१ ॥

हे प्रिये, त्वया प्रतिपादितं सर्वं सहिष्ये । यतो वामानां सुन्दरचरणैर्विमर्दे मदीयशरीरस्य भूयांसि रजांसि तासां चण्डातकैः (घाघरा) अपसारितानि भविष्यन्ति ॥ ४१ ॥

भूमौ निपात्य करतालिकयाऽवघाते
वक्षोजवाससि झटित्यवनिं प्रयाते ।

मन्दस्मिते तु मयि पश्यति ते वयस्या
हासह्रिया हि परमां मुदमादधीत ॥ ४२ ॥

मां भूमौ निपात्य करतालिकाभिस्ताडने वक्षोजवसने पृथिवीं प्रयाते मन्दस्मिते मयि पश्यति तव सखी हासह्रीभ्यां परमां मुदं प्राप्नुयात् ॥४२॥

सम्पीडचतां कुलकलङ्ककुमार एष
काम्योऽप्यकाम्यचरितो वपुषेति मात्रा ।
आज्ञापिता शशिकला ललिता किशोरी
मामङ्कपालिवसनैः पिहितं विदध्यात् ॥ ४३ ॥

शरीरेण स्पृहणीयोऽपि कर्मणा निन्दनीयोऽत एव कुलकलङ्कोऽयं कुमारस्ताडचतामिति मात्रा कीर्त्याऽऽज्ञापिता शशिकलेव किशोरी ललिता तव सखी मामङ्कपालिवसनैः पिदध्यात् । तदापि ममाभीष्टसिद्धिः स्यात् ॥ ४३ ॥

कोऽयं शठो व्रजवनीवनिताधराणाम्
अम्भोजिनीदलमरन्दमिव द्विरेफः ।
साक्षात् पिबन् रसभरं न बिभेति किञ्चित्
आक्रोश एव मधुरो मयि दण्डभाजि ॥ ४४ ॥

कोऽयं धूर्तः, यः कमलिनीनां मकरन्दं पिबन् भ्रमर इव व्रजवनितानामधररसं साक्षात् पिबन् मनागपि न बिभेति, एष तव मातुर्मयि दण्डचे क्रोधो मधुर एव स्यात् ॥ ४४ ॥

चन्द्रावली दशनदीधितिदीपिताशा
स्मेरानना कनककुण्डलमण्डितास्या ।
हस्तौ निगृह्य मम कान्तकपोलपालिं
लाक्षारसेन मृदुकान्तकरेण लिम्पेत् ॥ ४५ ॥

दन्तकान्त्या दिशः प्रकाशयन्ती सुवर्णकुण्डलाभ्यां मुखं मण्डयन्ती स्मितवदना चन्द्रावली मम करौ निगृह्य कान्तकपोलौ स्वकोमलकरेणालक्तकरसेन लिम्पेत् । एतदपि ममाभीष्टमेव स्यात् ॥ ४५ ॥

रे धृष्ट शिष्टरमणीरमणक्षमासु
पुष्पावनद्धनवसौरभमालतीषु ।
मत्तद्विरेफ इव कामयसे विहर्तुं
सख्या इदं प्रवचनं मयि सौधधाराः ॥ ४६ ॥

रे साहसिक, कुलवधूनां रमणयोग्यायामवनौ पुष्पितासु अत एव सुरभिषु मालतीषु मत्तभ्रमर इव त्वं विहर्तुमिच्छसि। इदं सख्याः प्रौढं वचो मयि सुधाधाराः स्यात् ॥ ४६ ॥

इत्थं हि चाटुवचनैर्भगवान् मुरारिः
सम्बोध्य राधितपदां वृषभानुजां ताम्।
अन्तर्हितो नवनिकुञ्जविहारभूमा-
वालिङ्गनैर्बहुविधैश्च सभाजयन् सः ॥ ४७ ॥

इत्थं स भगवान् मुरारिः सम्माननीयां तां श्रीराधां चाटुवाक्यैः सम्बोध्यानेकैरालिङ्गनैश्च सभाजयन् नवनिकुञ्जविहारभूमावन्तर्हितः ॥

कलितललितलीलो नाटकीयैर्हि वेशैर्
व्रजविपिनविहारादाप्तकामः समन्तात्।
परिहृतबहुवेशो दारुरूपो मुरारिस्
त्रिभुवनकमनीयामुत्कलेलां प्रतस्थे ॥ ४८ ॥

शैलूषवेशैः कृतानेकलीलो व्रजभूमिविहारेण समन्तात् पूर्णकामोऽत एव सर्वविधं वेशं परिहृत्य दारुरूपो मुरारिस्त्रिभुवनकमनीयामुत्कलभूमिं प्रतस्थे ॥ ४८ ॥

कालाद् बहोरुत्कलराजलक्ष्म्यास्
तपश्चरन्त्याः पुलिने महाब्धेः।
पानीयमेकं किल लाङ्गलेयं
पर्याप्तमासीदसुरक्षणाय ॥ ४९ ॥

समुद्रस्य तीरे बहोः कालात् नारिकेलस्य केवलं जलं पीत्वा उत्कल-देशराजलक्ष्मीः तपश्चरन्त्यासीत् ॥ ४९ ॥

अब्दान्यनेकानि तु माथुरीणाम्
उद्विग्नचेता अधरामृतेन।
खर्जूरकान्ताधरमुत्कलीनां
पातुं हरिः स्तूयत एव लक्ष्म्या ॥ ५० ॥

तपश्चरणे हेतुमाह—वर्षाणि यावन् माथुरीणामधरामृतेनोद्विग्नमना हरिः खर्जूरभक्षणेनोत्कलीनां वामानां रसाप्लुतं कान्तमधरं पातुं लक्ष्म्या स्तूयते ॥ ५० ॥

कारीलनीरसफलैर्यवनालजातैः
क्षारैर्जलैश्च विरसं हृदयं स्वकीयम्।

खर्जूरपाकमधुरासवनारिकेलैः
शाल्योदनैश्च रसवत् तनु गोघृताक्तैः ॥ ५१ ॥

हे हरे, करीलानां नीरसफलैर्योनल(जोन्हरि)चन्द्रिकाभिः क्षारैर्जलैश्च स्वकीयं विरसं मनः खर्जूरफलैः गोघृताक्तैः शाल्योदनैश्च सरसं कुरु ॥

गोप्यो व्रजे श्रुतय एव मतं मदीयं
गोपाः सुराः सुरपुरं परिहाय जाताः ।
वृन्दावने निवसने न यतो महत्त्वं
तस्मात् त्वमेहि पतितोद्धरणाय कृष्ण ॥ ५२ ॥

हे कृष्ण; व्रजे श्रुतय एव गोप्यः, सुरा एवामरावतीं त्यक्त्वा गोपा अभवन् । यतो वृन्दावने निवसने तव किमपि महत्त्वं नास्ति । अतोऽत्र पतितानामुद्धरणाय त्वमेहि ॥ ५२ ॥

तस्माद् व्रजावनिजना निजपुण्यजातैः
पारं भवस्य जलधेः सुतरां व्रजेयुः ।
आचारशास्त्रविमुखांस्तव भक्तिहीनान्
उत्कोत्कलान् विरह ईक्षितुमात्वरस्व ॥ ५३ ॥

अतो व्रजनिवासिनो जना निजैः पुण्यैरेव भवाब्धेः पारं कामं गच्छेयुः । आचारशास्त्रविमुखान् भक्तिहीनान् तव विरहे उत्कण्ठितान् उत्कलान् वीक्षितुं शीघ्रमागच्छ ॥ ५३ ॥

शान्ताः स्वभावसरलाः पुरुषास्तवैव
हीना धनेन सततं त्वयि दत्तचित्ताः ।
वामाः कटाक्षरहिता अपि यौवनाप्ताः
पश्यन्ति पद्धतिमहो शबरीव नित्यम् ॥ ५४ ॥

अत्रोत्कलाः पुरुषाः स्वभावतः सरलाः निर्धना अपि सततं तव ध्यानैकरताः, यौवनसम्पन्ना अपि रामाः कटाक्षविमुखाः शबरीव नित्यं तवैव पन्थानं पश्यन्ति । अतस्त्वरस्वेति भावः ॥ ५४ ॥

पलालजालैः पिहितं कुटीरं
सद्गोमयैः साधु विलिप्य नित्यम् ।
द्वारे शुभे स्वस्तिकमङ्कयित्वा
पश्यन्ति मार्गं तव कातराक्ष्यः ॥ ५५ ॥

हे मुरारे, पलालैः (पुआल) आच्छादितं कुटीरं गोमयैः सम्यगुपलिप्य तत्रत्याः स्त्रियः कातराक्ष्यस्तव पन्थानं नित्यं पश्यन्ति ॥ ५५ ॥

इत्थं निशम्य भगवान् करुणा द्र्चेता
लक्ष्म्या नते शिरसि कान्तकरं दधानः ।
तस्याः सरोजनयनाश्रुसमर्चिताङ्घ्रिस्
तस्थौ हरिः पतितपावनतामुपेतः ॥ ५६ ॥

एवं श्रुत्वा दयालुर्भगवान् श्रियो नम्रे शिरसि हस्तं दधानस्तस्याश्चक्षुःकमलाश्रुभिः पूजितपादः पतितानां पावनरूपेण उत्कले तस्थौ ॥ ५६ ॥

तस्मिन्निवासाय मनोऽनुकूलां
धरां विचिन्वन्नमरैरगम्याम् ।
दिव्यावनिं तां विमलां ययाचे
जगन्निवासोऽपि निवासकामः ॥ ५७ ॥

तस्मिन्नुत्कले निवासकरणाय मनोऽनुकूलां भूमिमन्विष्यन् अमरैरगम्यां मनोहरां भूमिं प्रसिद्धां विमलां प्रार्थितवान् मुरारिः । अहो जगतां निवासोऽपि स्वंनिवासं कामयते ! ॥ ५७ ॥

यस्येन्दिरा चुम्बति पादपद्मं
ब्रह्मादयो यं सततं स्तुवन्ति ।
सोऽप्यत्र याच्ञां कुरुते निवस्तुम्
अहो प्रभूणामगमा समीहा ॥ ५८ ॥

लक्ष्मीर्यस्य पादंकमलं चुम्बति, यं मुरारिं ब्रह्मादयो देवाः सततं स्तुवन्ति, सोऽप्यत्र निवासं कर्त्तुं प्रार्थनां करोति । अहो प्रभूणां समीहा दुर्गमा भवति ॥ ५८ ॥

दक्षप्रजापतिमखे स्वपतेरवज्ञां
गौरी विलोक्य विजहौ सहसा किलासून् ।
तद्देहमाशु नयतस्त्रिपुरस्य शत्रोर्
अङ्कात् परापतितवान् इह पाद एकः ॥ ५९ ॥

दक्षप्रजापतेर्यज्ञे स्वपतेश्शङ्करस्यावमाननां विलोक्य सती सहसा प्राणान् तत्याज । किलेति ऐतिह्ये । तस्याश्शरीरं शीघ्रं नयतश्शङ्करस्याङ्कादेकः पाद इहैव पतितः ॥ ५९ ॥

इन्द्रादिदेवैर्गुरुणा समेतैः
सम्यक् स्तुता वेदपुराणवाक्यैः ।
मुखत्विषा निन्दितपर्वचन्द्रा
ततः सती पादतलाद् बभाषे ॥ ६० ॥

गुरुणा समेतैरिन्द्रादिदेवैः वेदपुराणवाक्यैः सम्यक् स्तुता चन्द्रमुखी सती पादतलादुवाच ॥ ६० ॥

स्मेरानना दशनकुन्दविभाविताशा
देवान् समानभयमुद्रितपद्महस्ता ।
आश्वास्य कञ्जनयना विमलाभिधानाद्
अत्रोत्कले ननु निवासमहं करिष्ये ॥ ६१ ॥

ततः प्रसन्नवदना कुन्ददशनैर्दिशो भासयन्ती कमलकरा कमलनयनाऽभयंमुद्रया सर्वान् देवानाश्वास्य विमलानाम्ना उत्कलेऽस्मिन्नहं निवासं करिष्य इति बभाष इति परेणान्वयः ॥ ६१ ॥

तदा प्रभृत्येव तदङ्घ्रिपूते
क्षेत्रे सदास्मिन् विमलाऽनुशास्ये ।
नानुज्ञया पद्मभुवोऽपि वासस्
तच्छक्तिपीठं मुनयो वदन्ति ॥ ६२ ॥

ततः प्रभृति तेनांघ्रिपवित्रे विमलया सदानुशासिते क्षेत्रेऽस्मिन् तस्या अनुज्ञां विना ब्रह्मणोऽपि प्रवेशो निषिद्धः । तस्मादिदं क्षेत्रं मुनयः शक्तिपीठं कथयन्ति ॥ ६२ ॥

मह्यं निवेदनमृते भवतः प्रसादो
न स्यात् कदापि भुवनेषु महाप्रसादः ।
वासस्त्वतो भवतु ते जगतां निवास
नारीप्रभुत्वमतियात्यपि देवदेवम् ॥ ६३ ॥

हे जगतां निवास, भवतः प्रसादो मह्यं निवेदनमन्तरा महाप्रसादो भुवनेषु कदापि न स्यात् । अनया प्रतिज्ञया यदि निवासं वाञ्छसि, तदात्र निवासं विधेहि । अहो नारीणां प्रभुत्वं देवानामपि देवमतियाति ॥ ६३ ॥

'ओम्' गामुदीर्य विनतो भगवान् मुरारिस्
तस्थौ प्रसन्नवदनो विमलासमक्षम् ।
वृन्दावने निगडितो वृषभानुपुत्र्या
नीलाचले स्वपरिधौ गिरिराजपुत्र्या ॥ ६४ ॥

पूर्वोक्तार्थो विशद्यते—ततो विनतो भगवान् मुरारिः प्रसन्नवदनो विमलासमक्षं तस्थौ । आश्चर्यमिदं यद् वृन्दावने वृषभानुपुत्र्या निगडितो मुरारिः नीलाचले तु स्वपरिधौ गिरिराजपुत्र्या । अबन्धस्यापि बन्ध इति महदाश्चर्यम् ! ॥ ६४ ॥

नृत्यन् व्रजे नटवरो व्रजसुन्दरीभिर्
गाश्चारयंश्च विपिने सह गोपबालैः ।
द्वारावतीप्रियपुरे नृपतिर्भवन् हि
प्रेम्णोत्कले पतितपावन एष वृत्तः ॥ ६५ ॥

कृष्णः स व्रजसुन्दरीभिर्व्रजे नटवरः सन् नृत्यन्, विपिने गोपबालैः सह गाश्चारयन्, द्वारकायां राजा भवंश्चात्रोत्कले प्रेम्णाऽयं पतितानां पावनो जातः ॥ ६५ ॥

कारागृहाङ्कजननं यदुवंशलीला
राधाप्रियाङ्कशयनं मधुमल्ललीला ।
नीलाचले च वसतिः किल दारुरूपा
सर्वं हि कृष्णचरितं मनसाऽप्यगम्यम् ॥ ६६ ॥

मधुपुर्यां कारागारे जन्म, लीला च यदुवंशे, मथुरायां मल्ललीला, राधायाः प्रियेऽङ्के शयनम्, नीलाचले च दारुरूपेण निवासः—इत्येतत् सर्वं कृष्णचरितं मनसाऽपि बोद्धुमशक्यम् ॥ ६६ ॥

तत्रावनौ सुरगणैर्जगतां निवासः
संनिर्मिते सपदि नूतनदिव्यधाम्नि ।
संस्थापितोऽघहरणः श्रुतिमन्त्रगीतै-
राचारलाजमहितः पुरकामिनीभिः ॥ ६७ ॥

श्रीविमलानिर्दिष्टायां भूमौ देवैः सपदि निर्मिते दिव्यमन्दिरे नूतनेऽघहरो जगतां निवासः श्रीनिवासः श्रुतिमन्त्रगीतः पुरकामिनीभिराचारलाजैर्महितश्च संस्थापितः ॥ ६७ ॥

देवप्रार्थितविश्वशिल्पकुशलः श्रीविश्वकर्मा तदा
पाषाणैरतिदीर्घकान्ततनुभिर्देवालयं निर्ममौ ॥
यश्शृङ्गैर्निशितैः पयोदपटलं भिन्ते रुषा सर्वदा
तत्र श्रीविमलानुमोदितपदो राराजते विश्वराट् ॥ ६८ ॥

तदा विश्वनिर्माणचतुरो देवैः प्रार्थितः श्रीविश्वकर्माअतिदीर्घैः कान्तैः पाषाणैः सुरालयं निर्ममौ । यो देवालयो निशितैश्शिखरैः मेघपटलं रुषा सर्वदा भिनत्ति । तस्मिन् मनोहरे मन्दिरे श्रीविमलासमर्थितस्थाने विश्वस्वरूपः श्रीजगन्नाथो विराजते ॥ ६८ ॥

औन्नत्यं सुरसद्मनश्च मनुजा नापारयन् वीक्षितुं
कार्यः प्रस्तरभेदभित्तमथवा नो गोचरोऽभून्मतेः ।

निर्माता सुरसद्मनोऽस्य कतमो न ज्ञातमित्यप्यहो
ऐश्वर्यं जगदीशितुर्न विषयः कस्याप्यमुष्यां क्षितौ ॥ ६९ ॥

अस्य देवालयस्यौन्नत्यं वीक्षितुं मनुष्या न पारयन्ति, कीदृशस्य प्रस्तरस्य शकलमत्र संहितमिति कारोरपि मतिविषयतां न याति, अस्य निर्माता क इत्यपि न ज्ञायते। अहो जगदीश्वरस्य माहात्म्यं भुवनेऽस्मिन् कस्यापि विषयो नास्ति ॥ ६९ ॥

श्रीनाथं परितो नभोगशिखरा दीव्यन्ति देवालया
राजन्ते विविधाश्च तेषु विबुधाः सम्पूजिताश्चन्दनैः।
कस्तूरीघुसृणैः कुशेशयचयैर्मन्दारमालाशतैर्
मन्यन्ते त्वनुशासनं प्रतिदिनं श्रीमज्जगत्स्वामिनः ॥७०॥

श्रीजगन्नाथस्य परिसरे गगनचुम्बिशिखराः देवालया राजन्ते, तेषु च चन्दनपुष्पधूपकेसरकस्तूरीदीपैरर्चिता देवा राजन्ते। ते च प्रतिदिनं श्रीजगन्नाथस्वामिनोऽनुशासनं पालयन्ति ॥ ७० ॥

श्रीरामानुजसंस्तवं स भगवानादृत्य भक्तेर्वशः
श्रीमन्नारदपाञ्चरात्रविधिना जग्राह पूजनायविधिम्।
अर्चायामधिकारिणस्तु मम ये नीलाचले वासिनः
श्रीमद्दर्शितमार्ग एव सुखदः श्रेयोऽधिगन्तुं सदा ॥ ७१ ॥

स भगवान् जगन्नाथो भक्तेरधीनो नारदपाञ्चरात्रप्रदर्शितं पूजाविधिं स्वीकृतवान्। परन्तु नीलाचलनिवासिन एव जना अर्चायामधिकारिणो भवेयुः। एष एव पन्थाः कल्याणकरो भविष्यति ॥ ७१ ॥

सौवर्णी न च रोचते हि सुभगा मूर्त्तिस्तु मह्यं सुरा
देशेऽस्मिन् धनहीनमानवमये स्वर्णस्य किं गौरवम्।
पाषाणी सुमनोऽतिकोमलमनोलक्ष्म्याश्च हास्यास्पदं
तस्माद् दारुमयी स्वभावसरला संस्थाप्यतां भूतिदा ॥

ततः श्रीजगन्नाथो देवान् प्रबोधयामास यत् हे देवाः, अस्मिन् निर्धनप्रदेशे मम सुवर्णस्य मूर्तिर्मा भवतु। यतो हि सुवर्णस्यात्र गौरवं न स्यात्, पाषाणी चातिकोमलमनस्काया लक्ष्म्या हास्यास्पदं स्यात्। तस्मात् स्वभावसरला काष्ठमयी मे प्रतिमा भवतु। सैव च कल्याणकरी सम्पत्स्यते ॥

इत्थं विबोध्य मरुतो जगतामधीशो
दृष्ट्या स्वयाऽहरत दिव्यचितश्च तेषाम्।
ते मानवा इव सुखं न्यवसन् हि पुर्यां
पूजाविधिं विदधतः पुरुषोत्तमस्य ॥ ७२ ॥

जगतामधीश इत्थं देवान् सम्बोध्य तेषां दिव्यज्ञानं स्वदृष्टयाऽहरत। ते च श्रीजगन्नाथस्य पूजाविधिं कुर्वन्तो मानवा इव सुखं जगन्नाथपुर्यां न्यवात्सुः ॥ ७३ ॥

एवं निलिम्पन्युषितप्रदेशं
सर्वात्मना पूतमवेक्ष्य सम्यक्।
वदन्ति विज्ञाः पुरुषोत्तमस्य
क्षेत्रं त्विदं भुक्तिविमुक्तिदायम् ॥ ७४ ॥

सर्वतो भावेन पवित्रं देवैः कृतनिवासं मनोहरं क्षेत्रमिदमवेक्ष्य बुधा भुक्तिमुक्तिदं क्षेत्रं पुरुषोत्तमस्य वदन्ति ॥ ७४ ॥

ततः समुद्रस्तरलैस्तरङ्गैर्
उद्घोषयश्चारु जयेतिशब्दम्।
नतिश्च मूर्ध्ना नटयन् समन्तात्
समागतः पावनदर्शनाय ॥ ७५ ॥

भगवतो जगन्नाथस्य प्रतिमा प्रतिष्ठापनानन्तरमुत्तालतरङ्गैः समुद्रो 'जय जय' इति गभीरं मधुरञ्च शब्दमुद्घोषयन् नतिश्च समन्तान्नटयन् पतितपावनस्य दर्शनाय तत्र समागतः ॥ ७५ ॥

लोलैस्तरङ्गैः करकञ्जतालैर्
मीनाक्षिभङ्ग्या जलजन्तुवाद्यैः।
नृत्यन् मुदा गायति कीर्तिमुच्चैर्
जगन्निवासस्य परस्य वार्धिः ॥ ७६ ॥

अथ समुद्रस्तरलैस्तरङ्गैः करतालैः, मत्स्यनेत्रभङ्ग्या जलजन्तुभिर्वाद्यैश्च नृत्यन् सर्वतः श्रेष्ठस्य श्रीजगन्निवासस्य यश उच्चैर्गायति ॥ ७६ ॥

कल्लोलहस्तैर्मणिरत्नदीपैर्
असङ्ख्यशङ्खैः शफराक्षिकञ्जैः।
घण्टानिनादैर्मकरौघशब्दैर्
मुक्ताक्षतैर्भाजनशुक्तिभातैः ॥ ७७ ॥

विहङ्गवाग्भिः परिवादिनीभिः
फेनैर्दुकूलैः पयसां प्रवाहैः।
वेलामतिक्रम्य रमाप्रसूती
रमापतिं रम्यपुरे समार्चीत् ॥ ७८ ॥

लक्ष्मीपिता समुद्रः तरङ्गकरैः, मणिरत्नप्रदीपैः, असङ्ख्यशङ्खैः, शफरीमत्स्यनयनकमलैः मकरनक्रशब्दैः घण्टानिनादैः पात्रे निहितैर्मुक्ता-

क्षतैः, विहङ्गानां वचोभिर्वीणाशब्दैः, फेनैः श्वेतवसनैः, जलप्रवाहैश्च तट-मतिक्रम्य रम्यपुरे श्रीजगन्नाथपुरे रमापतिमपूपुजत्। लोकेऽपि गृहागतं जामातरं श्वशुरो वस्त्रादिभिः समर्चति ॥ ७७-७८ ॥

नक्रैस्तिमिङ्गिलगिलैरतिभीतिदोऽपि
माणिक्यमौक्तिकचयैर्हृदयङ्गमश्च ।
देवाङ्गनास्तनविलेपकषायितोऽपि
भक्तिप्रपन्न उदधिर्मुनिवृन्दवन्द्यः ॥ ७९ ॥

नक्रैर्भयङ्करमत्स्यैश्चातिभयङ्करोऽपि समुद्रो माणिक्यैर्मौक्तिकादिभि-श्चातिश्लाघ्यः, सुराङ्गनानां स्नानकाले स्तनविलेपकषायितोऽपि समुद्रो भगवद्भक्तिप्रवणत्वात् मुनिभिर्वन्द्यः ॥ ७९ ॥

उद्वेलरत्नाकररत्नजालैर्
धरा पुरीयं प्रथिता त्रिलोक्याम् ।
किं दुर्लभं श्रीपतिराजधान्यां
रत्नाकरः किङ्करतां यतोऽगात् ॥ ८० ॥

स्वसीमानमतिगच्छतो रत्नाकरस्य रत्नसमूहैः समन्विता इयं पुरी त्रिभुवने विख्यातास्ति। अत्र श्रीपतिराजधान्यां किं दुर्लभम्? यतो रत्नाकरोऽपि किङ्करतां गतः ॥ ८० ॥

ततोऽवनिः कान्तवनी सुसज्जा
सरोजहस्ता रविगौरवासाः ।
सरस्वता सज्जितराजमार्गा
प्रत्युद्गता श्रीजगदीश्वरस्य ॥ ८१ ॥

अथ मनोहरवनभूमिभागा हस्ते कमलमादाय रविकिरणमेव दुकूलं परिदधाना समुद्रेण मुक्तादिरत्नैः सज्जितराजमार्गा पृथिवी श्रीजगदीश्वरस्य स्वागताय प्रत्युद्गता ॥ ८१ ॥

रम्ये पुरीपरिसरे च शिरीषपुष्पैः
सम्यक् प्रसाधितपथे किसलप्रवालैः ।
रम्भादलैर्महितमण्डपमध्यभागे
नीराजनं वसुमती वसुभिर्विधत्ते ॥ ८२ ॥

पुर्याः परिसरभागे शिरीषकुसुमैः किसलयैश्च सज्जिते पथि रम्भाणां स्तम्भैः भूषिते मण्डपस्य मनोहरे भागे वसुमती वसुभिर्नीराजनं विधत्ते ॥

दिव्यानुभावचकिताखिललोकपाला
सन्तानदामकबरीमुषितान्तराया ।
दासीपुरस्कृतरमा रमणीयहस्ता
ताम्बूलवीटिमपि योजयते मुखेऽस्य ॥ ८३ ॥

दिव्येनानुभावेन निखिलान् तत्रोपस्थितान् लोकपालान् विस्मयोदधौ निमज्जयन्ती, पारिजातपुष्पमालालङ्कृतकेशपाशेन सर्वान्तरायान् विनाशयन्ती, दासीभिः पुरस्कृता, रमणीयकरा रमा भगवतोऽस्य मुखे ताम्बूलवीटिं निवेशितवती ॥ ८३ ॥

महोदधिक्षालितपादपांसुः
श्रीमत्सुभद्राबलरामवामः ।
घृताक्तशाल्योदननारिकेलं
जगन्निवासो वसतीह चाश्नन् ॥ ८४ ॥

समुद्रेण यस्य चरणरेणुः प्रतिदिनं प्रक्षाल्यते, यश्च श्रीं सुभद्राबलरामाभ्यां शोभमानः, गोघृताक्तशाल्योदनं नारिकेलञ्चाश्नन् जगतां निवासः श्री जगन्नाथः पुर्यामिह निवसति ॥ ८४ ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः ।
तद्राधिकाचरणचिन्तनचारुकाव्ये
श्रीद्वादशः समगमन् महनीयसर्गः ॥ ८५ ॥

श्रीचन्द्रशेखरशुक्लेन श्रीमङ्गलायां जातेन कालिकाप्रसादशुक्लेन रचिते श्रीराधाचरितमहाकाव्ये द्वादशः सर्गः समाप्ति गतः ॥ ८५ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण
प्राप्तशब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधि-
भूषितेन स्वर्णपदकप्राप्तेन श्रीजानकीजानिना व्याख्यात-
सम्पादितानेकग्रन्थेन श्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये द्वादशः सर्गः समाप्तः ॥

त्रयोदशः सर्गः

कलिन्दकन्यासलिलैः सलीलं
सोपानवीथिं व्रजवल्लवीनाम् ।
यत्रालयानां परिमार्ष्टि नित्यं
विभाति भव्या मथुरा पुरी सा ॥ १ ॥

यस्यां पुर्यां यमुना सखेलं गोपाङ्गनानां प्रासादानां सोपानमार्गं सलिलैः नित्यं परिष्करोति, सा मनोहरा मथुरा पुरी विभाति ॥ १ ॥

व्रजाङ्गनानां वदनप्रभाभिर्
ज्योतिष्मती चन्द्रमृतेऽपि रात्रिः ।
तमालकल्पैर्वनितालकैर्हि
तमिस्रपक्षो नितरां निरीक्ष्यः ॥ २ ॥

गोपबालानां मुखकान्तिभिश्चन्द्रं विनैव रात्रिर्ज्योतिष्मती भवति। नन्वेवं तर्हि कृष्णपक्षो नास्ति तत्र ? इति शङ्कायामाह–तमालनीलैर्वनिताकेशैः कृष्णपक्षोऽनुमातुं शक्यते ॥ २ ॥

लोलत्तरङ्गा यमुना हि नित्यं
वक्षोजकश्मीरजगन्धधूल्या ।
कषायिता माथुरभामिनीनां
काणादसिद्धान्तमपाकरोति ॥ ३ ॥

तरलतरङ्गा यमुना हि माथुरीणां स्तनानां कस्तूरीकुङ्कुमक्षोदैः कषायिता सती 'अभास्वरं शुक्लं रूपं जले' इति काणादसिद्धान्तं दूषयति॥

वक्षोजविल्वैश्च नितम्बचक्रैः
सुराङ्गनानामपि माथुरीणाम् ।
विदीर्णदेहा स्नपनोत्सवे सा
जहाति नैनां मधुरां पुरीलाम् ॥ ४ ॥

देवाङ्गनानां माथुरीणां विल्वोपमैर्वक्षोजैश्चक्रोपमैर्नितम्बैश्च स्नानकाले क्षतविग्रहापि सा कालिन्दी तां मथुरावनिं न जहाति ॥ ४ ॥

भङ्गोष्मणा घर्मलभीमकायाः
कौपीनवस्त्रा अपि मस्तुभक्षाः ।
'जयेति पूर्वं यमुने' नदन्तो
ब्राह्माभिषेकं दधते पुरीस्थाः ॥ ५ ॥

भङ्गायाः पानानन्तरं प्रस्वेदशरीराः कौपीनवन्तोऽपि दुग्धतत्त्वाशिनः (मलाई) माथुराः 'जय यमुने' इति गर्जन्तः प्रातःस्नानं कुर्वन्ति ।। ५ ।।

यमस्वसा नीलसरोजनीला
तमालनीपावलिकेशमाला ।
अनेकजन्मार्जितपापमाला
धुनोति वात्येव मृणालमालाः ।। ६।।

नीलकमलवन्नीला तमालकदम्बतरव एव केशपाशो यस्याः सा, तथाभूता यमुनाऽनेकजन्मनः पापमाला मृणालमाला वात्येव नाशयति ।।६।।

यत्र व्रजे मधुपुरी मधुरैव धन्या
पातुं रसं रसमयो वनिताधराणाम् ।
कारागृहेऽप्यजननो जननं जगाम
कान्ताधरो हि महतामपि बन्धहेतुः ।। ७ ।।

व्रजे मधुपुरी एव मधुरा, अत एव धन्या । अत एव साक्षाद्रस-स्वरूपोऽपि कृष्णो गोपाङ्गनानामधररसं पातुं जन्मशून्योऽपि जनिं जगाम, तत्रापि कारागृहे । हन्तु, कान्तानामधरो महतामपि बन्धहेतुः ।। ७ ।।

श्रीमाधवे मधुपुरीमवनौ प्रयाते
तत्पादपङ्कजपरागवियोगदीनाः ।
देवाङ्गना झटिति दिव्यपुरीं विहाय
गोपाङ्गनात्वमधुनापि भजन्ति तत्र ।। ८ ।।

यदा भगवान् श्रीकृष्णो भूमौ मधुपुरीं समायातः, तदा तच्चरण-कमलस्य वियोगेन कष्टमसहमाना देवाङ्गना दिव्यपुरीं विहायाधुनापि गोपाङ्गनात्वं व्रजे भजन्ते ।। ८ ।।

राधा परा सहचरी व्रजभूमिराका
दोलोत्सवं विदधती विधुमाधवेन ।
श्रीभानुजापुलिननीपविहारभूमौ
संलक्ष्यते हि मधुराव्रजभामिनीभिः ।। ९ ।।

व्रजभूमे राका श्रीकृष्णस्य परा सहचरी राधा यमुनापुलिने कदम्बकुञ्जे माधवचन्द्रमसा दोलोत्सवं कुर्वन्ती माथुरीभिर्दृश्यते ।। ९।।

शास्त्रे नदीष्णा अपि लौकिका ये
प्राप्ताः पुरीं तामतिसन्दिहन्ति ।
शास्त्रे रतेरेकविधत्वमुक्तं
एतः महत्त्व हि निभालयामः ।। १० ।।

शास्त्रपरिशीलनचतुरा अथ लोकप्रवीणा ये केचन मथुरां पुरीं समागच्छन्ति, ते संशेरते यत् शास्त्रेषु एकैव रतिः प्रतिपादिता, अत्र तु सहस्रं रतयो दृश्यन्ते ॥ १० ॥

मञ्जीरमण्डितपदाः पुलिनाप्तपङ्क्तीर्
नीलाम्बरा नलिननेत्रतमालकेशाः ।
चोलावनद्धकुचमण्डलनागरङ्गाः
सौदामिनीभ्रम उदेति निरीक्ष्य शश्वत् ॥ ११ ॥

पादेषु मञ्जीरं परिधाय नीलं शाटकञ्च परिधाय नलिनचक्षुषस्तमालकेशाः चोलानिबद्धकुचपरिणाहाः पुलिने पङ्क्तिबद्धा माथुरीर्निरीक्ष्य जनानां तडितो भ्रम उदेति ॥ ११ ॥

नक्तं विवाहोत्सवमण्डपेषु
पुराङ्गनाभूषणसंविधाभिः ।
भ्रान्ताः समं भूषणमेककाले
क्रेतुं महेढ्याः परितोभ्रमन्ति ॥ १२ ॥

विवाहस्योत्सवमण्डपेषु माथुरीणां विविधभूषणैर्भ्रान्ता धनिका एकत्रैव निखिलं भूषणं क्रेतुं परितो भ्रमन्ति ॥ १२ ॥

किं वा वदामि मथुरामहिमानमत्र
यस्याः पुरः परिसरे प्रतिहारभूमौ ।
हृद्या सखी तरणिजा मधूसूदनस्य
दौवारिकीव सततं श्रयते पुरन्ध्रीः ॥ १३ ॥

मथुराया माहात्म्यं वर्णयितुं न शक्यते; यतो हि यस्याः पुरः परिसरे प्रतिहारभूमौ श्रीकृष्णस्य प्रिया सखी यमुना दौवारिकीव व्रजाङ्गनाः सेवते ॥ १३ ॥

विमलसलिलधारा पापतापासिधारा
सुरमुनिनुतपादा राध्यराधानुरोध्या ।
इह तरणितनूजा माथुरीः सेवते याः
सुरगुरुरपि तस्या वर्णने को वराकः ॥ १४ ॥

विमलसलिला पापानां विनाशायासिधारेव देवैर्मुनिभिः सततं स्तूयमाना परमराध्यया राधयापि काम्या यमुना मथुरायां रमणीः सेवते, तस्या मथुराया वर्णने बृहस्पतिरपि न समर्थः ॥ १४ ॥

प्रियविरह उदन्तं गोपिकानामजस्रं

सखि नयसि दयार्द्रं तस्य कृष्णस्य पार्श्वे ।

उपचितवरिवस्यस्ते पदं सन्दधामि
मम किमपि रहस्यं नीयतां सावधानम् ॥ १५ ॥

हे दयार्द्रे यमुने, श्रीकृष्णस्य विरहोदन्तं गोपिकानां यदि नित्यं नयसि, तर्हि हे सखि, त्वां समर्च्य ते पदं गृह्णामि यत् ममापि किमपि रहस्यं तस्य पार्श्वे सावधानं नीयताम् । रहस्यभेदो मा भूदित्यर्थः ॥ १५ ॥

भगवति गिरिकन्ये गोपकन्याविलापाद्
विमलसलिलपूरा त्वं द्रुतत्वं गतासि ।
विरहविपदि नित्यं भुज्यमानः समन्तात्
तव पदनतमूर्द्धोपेक्ष्यमाणः कथं स्यात् ॥ १६ ॥

हे कलिन्दगिरिकन्ये, यदि गोपकन्यानां विलापात् त्वं द्रुता सती विमलवारिप्रवाहाऽभूत्, तदा तव विरहविपदि नित्यं पच्यमानस्तव च चरणे नतमूर्द्धा कथं त्याज्यो भविष्यति ! ॥ १६ ॥

लोलत्तरङ्गततिनर्तितभानुजायाः
कूले कदम्बकुलकल्पितचारुतायाः ।
नित्यं तमालतरुवर्द्धितकृष्णताया
इत्थं स्तुवन्ति मुनयो मधुरापुरीस्थाः ॥ १७ ॥

नीपानां समूहैः कल्पितं सौन्दर्यं यस्याः, तस्या नृत्यत्तरङ्गैर्नर्तितायाः तमालैर्वर्द्धितकृष्णतायाः श्रीयमुनायाः कूले मथुरानिवासिनो मुनयः (पूर्वोक्तश्लोकवर्णितप्रकारेण) तरणिजां स्तुवन्ति ॥ १७ ॥

परिसरभुवि तस्या दिव्यपुष्पावलीतः
सुरभितवनराजिर्मत्तगुञ्जद्द्विरेफः ।
पिककुलकलनादो नन्दनानन्दशीलो
जयति तरणिजाया भव्य आराम एषः ॥ १८ ॥

तस्याः श्रीयमुनायाः परिसरभुवि पुलिने मनोहरपुष्पैः सुरभितो मत्तमधुपैर्गुञ्जितः कोकिलकुलेन निनादितः कश्चन दिव्यो यमुनारामः (यमुनाबाग) नन्दनवनसदृशो वर्तते ॥ १८ ॥

कलेऽनुकूले यमुनादुकूलः
सुराङ्गनानामपि वीक्षणीयः ।
राधापदालक्तकरज्यमान
आराम एषोऽस्ति विरामऋद्धेः ॥ १९ ॥

देवाङ्गनाभिरपि आश्चर्यचकिताभिर्निपुणं निरीक्ष्यमाणो राधापदा-

लक्तकरज्यमानो यमुनावसन एव आरामः समृद्धेर्विरामो मनोहरे यमुनापुलिने वर्तते ॥ १९ ॥

यमस्वसुस्तोयसुधातुषारैः
सिक्तालवाला मधुलुब्धभृङ्गा ।
सुखं समीरेण समीरितैति
न म्लानतां पौरकपुष्पराजिः ॥ २० ॥

श्रीयमुनायाः सुधातोयबिन्दुभिः सिक्तालवाला पुष्परसलुब्धभृङ्गा वायुना प्रेरिताऽपि आरामस्य कुसुमराजिर्म्लानितां न याति ॥ २० ।

पुन्नागचम्पकपरागपरीतपीनः
श्रीभानुजाविमलवारिकृतावगाहः ।
गोपाङ्गनाकचकलापविलोलशीलः
खेदं विधूनयति गन्धवहः समन्तात् ॥ २१ ॥

पुन्नागचम्पकपरागैर्व्याप्तः, अत एव पीनः, मन्द इत्यर्थः, श्रीयमुनाया विमले वारिणि स्नातः, अत एव शीतः, गोपाङ्गनानां केशकलापस्य विलोलनकुशलः, अत एव सुखकरो वायुरारामस्य समन्तात् शरीरश्रमं व्यपनुदति ॥ २१ ॥

किसलयदलवस्त्रा मञ्जुमञ्जीरहंसा
पिककुलकलगीता मत्तमायूरनृत्या ।
कमलकलितमालोद्यानलक्ष्मीरजस्रं
सुरभिकुसुमकाया राजते राजलक्ष्मीः ॥ २२ ॥

किसलयदलान्येव वस्त्राणि यस्याः सा, मञ्जुमञ्जीरवत् हंसा यस्याः सा, पिककुलस्य कलं मधुरं गीतं यस्यां सा, मत्तानां मयूराणां नृत्यं यस्यां सा, कमलानां कलिता माला यस्याः सा, सुरभीणि कुसुमान्येव शरीरं यस्याः सा, तथाभूतोद्यानलक्ष्मी राजलक्ष्मीरिव राजते ॥ २२ ॥

वकुलकुलमरन्दैर्मण्डितायां धरायां
मधुकरकलरावैर्झङ्कृतायां वनाल्याम् ।
कमलकुमुदगन्धैर्वासितायां सरस्यां
विहरति युववृन्दं भानुजोद्यानवीथ्याम् ॥ २३ ॥

यत्रोद्याने वकुलकुलस्य परागैर्मही मण्डितास्ति, भृङ्गाणां झङ्कारैर्वनालिः झङ्कृतास्ति, सरसी कमलानां कुमुदानाञ्च गन्धैः सुरभिर्वर्तते, तस्यां यमुनोद्यानवीथ्यां युववृन्दं विहरति ॥ २३ ॥

माद्यन्मधुव्रतविलोलितमागधीनां
शेफालिकाकुटजचन्दनमालतीनाम् ।
श्रीद्वारकेशगललम्बिसुगन्धिमाला
लक्ष्मी यशो वितनुते पुरपौरकस्य ।। २४ ।।

माद्यद्भिर्मधुपैश्चुम्बितरसानां मागधीनां शेफालिकायाः कुटजस्य चन्दनस्य मालत्याश्च सुरभिर्माला श्रीद्वारकेशस्य गले विराजमाना माला नगरोद्यानस्य यमुनारामस्य शोभायशो वितनुते ।। २४ ।।

मूढा अशोकतरवः प्रमदापदानां
स्पर्शात् सुखाद् ददति पाटलपुष्पराजिम् ।
नेत्रैर्निपीय रसिका वनिताधराणां
पीयूषमत्र विपिने समदा भवन्ति ।। २५ ।।

जडा अप्यशोकवृक्षा वनितानां पादस्पर्शजन्मसुखात् रक्तपुष्पराजि ददति । रसिका अत्रोद्याने वनिताधराणां सुधां नयनैर्निपीय परमानन्दभाजो भवन्ति ।। २५ ।।

कान्ताजनस्य सततं जघनोपमेय-
रम्भा सुधोपमफलैः कमना वनश्रीः ।
संसेवते हि मधुराधिपमर्चनीयं
देव्योऽपि दिव्यमनुभावमहो भजन्ते ।। २६ ।।

कान्ताजनस्य जघनेनोपमितायाः रम्भायाः फलैः मनोरमा वनश्रीः पूजनीयं मधुराधिपं श्रीकृष्णं सेवते । दिव्यशक्तयोऽपि दिव्यं प्रभावं सेवन्ते ।। २६ ।।

प्रकृतिखचितचित्रैः प्रस्तरैस्ताम्ररङ्गैः
परिसरभुवि पुष्पारामरम्भैकदेशे ।
विहितसदन ऐशे छत्रिताकारभव्ये
पशुपतिरधिपीठं राजते ज्ञानमूर्तिः ।। २७ ।।

ताम्रवर्णैः खचितचित्रैः पाषाणखण्डैः निर्मिते छत्राकारे शङ्कर-मन्दिरे यमुनारामस्यैकस्मिन् प्रदेशे ज्ञानरूपः पशुपतिः पीठे राजते ।। २७ ।।

वामास्तनोपमफलोपहिता महान्तो
मालूरदिव्यतरवः परितो लसन्ति ।
येषां दलानि दलिताखिलकश्मलानि
काकोलतप्तशिरसं शमयन्ति शम्भुम् ।। २८ ।।

वामानां स्तनैरुपमितैः फलैर्लसिता महान्तो बिल्ववृक्षा अभितो

लसन्ति। येषां निवारितपापानि पत्राणि काकोलविषेण सन्तप्तशिरसं शम्भुं शमयन्ति ॥ २८ ॥

प्रतिदिनवलिमिष्टं भक्तवृन्दोपनीतं
विविधरसरसालं श्रौत्रमन्त्रैः पवित्रम्।
समशितुरतिमात्रं धेनुमुद्राप्रदर्शं
जठरमलविकारं शोधयत्येव शम्भोः ॥ २९ ॥

भक्तसमूहैः प्रतिदिनं पूजायां समर्पितं विशिष्टरसान्वितं श्रुतिमन्त्रपूतं धेनुमुद्रासम्भावितमतिमात्रं मिष्टं भक्षयितुः शङ्करस्योदरमलविकारं शोधयत्येव ॥ २९ ॥

श्रीभानुजायास्तरलैस्तरङ्गैर्
दयालवैः श्रीवृषभानुजायाः।
उद्यानवृक्षावलिपुष्पराजि
पातीव पुष्टः शिवकान्तनन्दी ॥ ३० ॥

श्रीयमुनाया उत्तालतरङ्गैः श्रीराधाया दयया पुष्टो नन्दी यमुनारामस्य वृक्षान् पुष्पपङ्क्तिं च पातीव ॥ ३० ॥

आमोदमुग्धमनसो मुनयोऽपि हन्त
यस्मै फलाय सततं स्पृहयन्ति नित्यम्।
तस्मै भृशं परिणताय हिताय कुक्षौ
रोगोदराः कृतधियो गृहिणः कथं न ॥ ३१ ॥

यस्य बिल्वफलस्यामोदेन मुग्धा मुनयोऽपि स्पृहां कुर्वन्ति, तस्य परिणतस्योदरकल्याणकारिण रोगव्याप्तोदरा गृहस्था बुद्धिमन्तः कथन्न कामनां कुर्युः! ॥ ३१ ॥

गोवर्द्धनोऽगो गुरुतां दधानस्
तस्यैकदेशे सुषमां समीक्ष्य।
पाषाणरूपोऽपि जगाम चित्रं
सौन्दर्यमाकर्षति विश्ववन्द्यम् ॥ ३२ ॥

गोवर्द्धनगिरिरपि गुरुः तस्य सौन्दर्यं समीक्ष्यैकदेशे पाषाणः सन्नपि जगामेति चित्रम्! सौन्दर्यं विश्ववन्द्यमप्याकर्षति ॥ ३२ ॥

मन्ये जलप्लावनशीर्णकायो
गोप्तुं गिरिः स्वं धृतसूक्ष्मरूपः।
निरापदि स्थान इहैव शान्ते
सुखं न्यवात्सीन्मथुरापुरीस्थे ॥ ३३ ॥

इन्द्रकोपात् जलप्लावनेन विदीर्णशरीरः सूक्ष्मरूपधरः स्वं रक्षितुं मथुरापुरीस्थे यमुनारामे निरापदि स्थाने शान्ते सुखं न्यवात्सीदिति मे वितर्कः ॥ ३३ ॥

वामाङ्गनाराजितवामभागः
पयोऽभिषेकाद् बहुवस्नपात्रैः ।
मुक्तो भवेद् यस्य दयार्द्रमूर्त्तेः
सोऽप्यत्र लीनो लघुकामरूपः ॥ ३४ ॥

यस्य करुणाकलितचेतसो गोवर्द्धनस्य बहुमूल्यपात्रैः दुग्धाभिषेकाद् पत्नीद्वितीयोऽवश्यं मुक्तो भवति, सोऽपि गिरिराजोऽत्र लघुशरीरो लीयते ॥ ३४ ॥

सोऽयं गिरिर्यस्य परिक्रमातः
कलाधरे विश्वकलामुपेते ।
शक्रायते क्षुद्रजनोऽपि सद्यः
का नाम वार्ता हि महाकुलस्य ॥ ३५ ॥

सर्वकलासम्पन्ने-भगवति कलानिधौ गिरेरस्य परिक्रमातः साधारण-जनोऽपि शक्रायते । यदि कश्चन कुलीनो विधिवत् तत् कर्म कुर्यात्, तदा तत्फलं वर्णयितुं न शक्यते ॥ ३५ ॥

न कापि सिद्धिर्जगतामधीशे
न पूर्णतामेति गिरौ प्रसन्ने ।
सोऽयं शरण्योऽपि शरण्यकामः
कलिन्दकन्योपवनं प्रयातः ॥ ३६ ॥

जगतामधीशेऽस्मिन् गिरौ प्रसन्ने सति सर्वापि सिद्धिः पूर्णतामेति । सोऽयं स्वयं शरण्योऽपि सम्प्रति शरण्यकामो यमुनारामं निषेवते ॥ ३६ ॥

व्रजाङ्गनानां कुटिलालकानां
देवोऽप्ययं केलिदिदृक्षयाऽत्र ।
पाषाणभावं महसा प्रपेदे
केलिः स्त्रियाः कर्षति वीतरागम् ॥ ३७ ॥

अयं देवोऽपि वक्रकेशानां व्रजवधूनां क्रीडादर्शनेच्छया स्वतेजसा पाषाणत्वमापत् । रामाणां केलिर्वीतरागमपि कर्षति ॥ ३७ ॥

उद्यानवीचीषु निकुञ्जपुञ्जे
निपीतभङ्गा नवशुभ्रवेशाः ।

तमालपत्रास्तरणेषु वामाः
सायं युवानो रमयन्ति कान्ताः ॥ ३८ ॥

उद्यानवीथिषु निकुञ्जे निर्मलवसना भङ्गां पीत्वा मत्ता युवानस्तमालदलासनेषु मनोहराः कान्ताः सायं रमयन्ति ॥ ३८ ॥

माध्वीकमत्ता अपराश्चिरण्टचः
क्वचित् क्वचिच्छाद्वलभूप्रदेशे ।
विहाय कान्तं स्वकमन्यसक्तं
क्रीडन्ति केनाप्यपरेण यूना ॥ ३९ ॥

अपराः काश्चन युवतयः क्वचित् क्वचित् शष्पमयप्रदेशेऽन्यसक्तं स्वं कान्तं विहाय परेण केनापि यूना क्रीडन्ति ॥ ३९ ॥

मार्गश्रमस्विन्नमृणालमृद्वी
पुष्पाटवीलम्पटमारुतेन ।
संवीजिता दक्षिणनामकस्य
क्रोडे स्वभर्त्तुः शयिता सतृष्णा ॥ ४० ॥

मार्गभ्रमणश्रमेण स्वेदार्द्रगात्री काचिन्मृणालमृद्वी पुष्पसौरभसंयुतेन वायुना संवीजिता दक्षिणनायकस्य स्वभर्त्तुरुत्सङ्गे शयिता ॥ ४० ॥

महोत्सवे पर्वणि पर्वणीह
सारस्वतैर्मण्डलगीतशब्दैः ।
वाद्यैः किशोर्यो मधुरांगमुग्धाः
प्रसादयन्ते वरदां किशोरीम् ॥ ४१ ॥

प्रतिपर्व महोत्सवे सारस्वतैर्मण्डलगानैर्वाद्यैश्च मधुराङ्गैर्मुग्धाः किशोर्यो वरदां श्रीराधां किशोरीं प्रसादयन्ते ॥ ४१ ॥

परागपुञ्जैः सुगमे हि मार्गे
गृहीतदण्डा गृहकार्यमुक्ताः ।
परस्परं सामयिकं लपन्तो
भ्रमन्ति वृद्धा विषयं प्रसन्नाः ॥ ४२ ॥

पुष्पपरागैः कोमले पथि गृहकार्यनिवृत्ता गृहीतदण्डा वृद्धाः प्रसन्नाः सामयिकं विषयं विचारयन्तो यमुनारामे भ्रमन्ति ॥ ४२ ॥

तमालमालापिहितोदरेषु
क्लान्ताः शिलानिर्मितकुट्टिमेषु ।
आरामसौन्दर्यविलुब्धचित्ताः
श्रमापनोदं विदधत्यजस्रम् ॥ ४३ ॥

क्लान्तास्ते वृद्धाः स्तमालैराच्छादितेषु पाषाणनिर्मितकुट्टिमेषु समुपविश्य यमुनारामसुषमयाऽऽकृष्टचेतसो मार्गजन्यकष्टापनोदनाय कालं यापयन्ति ॥

पुलिनविपिनलक्ष्मीर्नीलवासो वसाना
कुटजमुकुलमालागोस्तनीभिः प्रियालैः ।
खगकुलकलगीतैः स्वागतं मागधीभिर्
व्रजकुलललनानां व्याहरन्तीव भाति ॥ ४४ ॥

नीलशाटकं परिदधती पुलिनस्य वनलक्ष्मीः कुटजमुकुलमागधी-मालाभिः प्रियालैर्गोस्तनीभिः खगकुलस्य श्रुतिसुखदैर्गीतैश्च व्रजबालानां स्वागतं व्याहरतीव ॥ ४४ ॥

माद्यन्मरालमुखरीकृततत्प्रदेशे
कूजद्घनप्रियविसण्डितमञ्जरीके ।
पारावतप्रथितहुङ्कृतिसाधुवादैर्
अङ्गीकृता हरिकथा वनदेवताभिः ॥ ४५ ॥

मत्तैर्मरालैर्मुखरिते कोकिलकूजितचूतमञ्जरीके यमुनारामे पारा-वतानां हुङ्कारसाधुवादैर्वनदेवताभिः हरिकथा स्वीकृता ॥ ४५ ॥

तस्मिन्निवारितमहातपवारिवातं
दूष्यं दुकूलवसनैरुपकल्पितं च ।
स्तम्भैर्विशालतनुभिर्लसितं समन्ताद्
आकाशभाण्डमिव सम्पतनाद् बिभर्ति ॥ ४६ ॥

आरामे तस्मिन् क्षौमवस्त्रनिर्मितं महातपवारिवायुनिरोधकं वितानं विस्तारितम् । तत्र विशालैः स्तम्भैरभितः शोभितं तद् वितानं सम्पतनादा-काशपात्रं बिभर्त्तीव ॥ ४६ ॥

हेमन्तवाततरला कृतचित्ररूपा
सान्द्रा नवा जवनिका परितश्च दूष्यम् ।
भूदारमर्कटविडालविहङ्गजातात्
पातीव कृष्णसदनं प्रहरीव शश्वत् ॥ ४७ ॥

हेमन्ततु पवनैस्तरला विचित्ररूपा जवनिका दूष्यं परितो वर्तमाना कपिशूकरमार्जारेभ्यः प्रहरीव सततं कृष्णकथामण्डपं रक्षतीव ॥ ४७ ॥

दूष्यान्तरालसमभूमिविराजितायां
मुक्तामृणालदलराजितबालुकायाम् ।
विस्तारितं मसृणमासनमद्वितीयं
मध्यं रमासनमिवमनोऽनुकूलम् ॥ ४८ ॥

स्थलस्य (तम्बू) मध्येऽनुद्घातिन्यां भूमौ विभूषितायां मुक्ताभि-र्मृणालैर्दलैश्च राजितायां बालुकायां नवीनं शोभासम्पन्नं घनवतां मनसोऽनुकूलमपूर्वं कोमलमासनमास्तृतमासीत् ॥ ४८ ॥

पदे पदे मण्डितमण्डपेषु
कथामृतं श्रोतुमनीशकायान् ।
वातेरितान् नन्दयितुं धरास्थान्
विभान्ति वृष्यो बहुपंक्तिबद्धाः ॥ ४९ ॥

स्थाने स्थाने भूषितेषु मण्डपेषु भगवत्कथामृतं श्रोतुमसमर्थान् वायुरोगपीडितान् भूमिस्थान् जनान् सुखयितुमनेकश्रेणिविभक्ता वृष्यो विभान्ति ॥ ४९ ॥

आलम्बनार्थमतिवृद्धकिशोरकाणाम्
उच्छीर्षकाणि मृदुलान्यवलोकितानि ।
अन्ये च वस्तुनिवहा भगवत्कथार्हाः
सम्प्रेक्षिताः कविवरेण यथास्थितास्ते ॥ ५० ॥

वृद्धानां किशोराणामवष्टभ्य समुपवेशनार्थं तत्र तत्र समुपस्थापितानि उपधानानि (मसनद) अतिमृदूनि विलोकितानि । अथान्यानि भगवत्कथा-साधकानि वस्तूनि यथास्थानस्थितानि कविवरेण निरीक्षितानि ॥ ५० ॥

प्रसूनमालाशतसंकुलेभ्यश्
शनैश्शनैर्वातविधूननेभ्यः ।
तमालपत्रावलितोरणेभ्यो
नागभ्रमः पापधियामुदेति ॥ ५१ ॥

पुष्पाणां शतेन मालाभिर्व्याप्तेभ्यश्शनैश्शनैः पवनचालितेभ्यस्तमाल-तोरणेभ्यः पापात्मनां सर्पभ्रम उदेति ॥ ५१ ॥

तमोऽञ्जना कृष्णविभावरी सा
विद्युत्प्रकाशैस्तरलातिमात्रम् ।
पतिव्रतात्वं प्रविहाय सद्यो
विनोदितेवेन्दुशतैश्च मण्डपे ॥ ५२ ॥

अन्धकारकज्जला सा कृष्णा रात्रिस्तडित्प्रकाशैः प्रकामं तरला सद्यः पतिव्रतात्वं परित्यज्य निशाकरशतैर्मण्डपे विनोदिता ॥ ५२ ॥

स्तम्भैरनेकैः कलिता कदल्या
नानालताभिर्वलिता समन्तात् ।

सदीपमालैः कलशैर्धरासा-
वर्णनीयां सुषमां बिभर्त्ति ॥ ५३ ॥

अनेकैः कदल्याः स्तम्भैः कलिताः नानालताभिर्वेलिता दीपमालाभिः सहितैः कलशैः कलिता सा धरा वर्णनातीतां शोभां दधाति ॥ ५३ ॥

गन्धर्वकान्ता रमणोपगूढा
वृन्दावलीवन्दितवन्द्यभूमेः ।
गायन्ति यस्या विमलं यशस्कं
तत्रोरुगायस्य कथाप्रसङ्गः ॥ ५४ ॥

स्वकान्तैराश्लिष्टा गन्धर्वकामिन्यो वृन्दावलीभिर्वन्दिताया वन्दनीयाया यस्या भूमेर्विमलं यशो गायन्ति, तत्र भगवतः कथा प्रारब्धा ॥ ५४ ॥

राजोचितैश्चित्रपदार्थजातैः
सुसज्जिते वस्त्रजनाश्रयेऽस्मिन् ।
पीठत्रयं पौरुषमेकभागे
कारोः कलां ख्यापयतीव चित्राम् ॥ ५५ ॥

महामूल्यैरनेकैर्विचित्रैः पदार्थैर्मण्डितेऽस्मिन् वस्त्रमण्डपे भाग एकस्मिन् पुरुषप्रमाणं स्थापितं पीठत्रयं शिल्पिनो विचित्रामवर्णनीयां कलां प्रख्यापयतीव ॥ ५५ ॥

अघौघविध्वंसकरी यमी या
तरी भवाब्धेस्तरणेस्तनूजा ।
सुवर्णपात्राहितवारिरूपा
संस्थापिता सान्यतमे हि पीठे ॥ ५६ ॥

पापतापनिवारणसमर्था संसारसागरस्य नौः सूर्यस्य तनया या यमुना, सा एकस्मिन् पीठे वारिरूपेण कनकपात्रे संस्थापिताऽऽसीत् ॥ ५६ ॥

मालादलैर्मण्डितमप्रतीपं
चित्रैर्दुकूलैः परिवारितं च ।
ताः कृष्णलीला अनुकर्त्तुमेकं
पीठं च रिक्तं कथयोपनीताः ॥ ५७ ॥

अनेकाभिर्मालाभिर्भूषितं मनोहरैर्वस्त्रैः परिवेष्टितम्, अत एवाद्वितीयम्, कथाप्रसङ्गेन समागताः कृष्णलीला अनुकर्त्तुं रिक्तमासीत् ॥

तयोर्द्वयोर्मध्यगतं सुरम्यं
द्वे अग्र्यतिकस्य विराजते यत् ।

तद् व्यासपीठं प्रवदन्ति वृद्धाः
स्तुत्यात् परः स्तावक ईड्यते हि ॥ ५८ ॥

पीठद्वयापेक्षया कामं रमणीयं मध्ये स्थापितं व्यासपीठमस्तीति वृद्धा वदन्ति । यतो हि स्तुत्यापेक्षया स्तावक एव सम्मान्यते जगतीतले ॥ ५८ ॥

चन्द्रोदयस्य महसा महितेऽन्तरिक्षे
क्षौमोत्तरच्छदविशेषितपार्श्वभागे ।
रम्येऽधिमञ्चमवरोपितमञ्चके हि
काचित् कलेव शशिनो विदुषी व्यराजत् ॥ ५९ ॥

उल्लोचस्य (चांदनी) तेजसा व्याप्ते अन्तरिक्षे सति दुकूले विशाले मञ्चे स्थापिते मञ्चान्तरे शशिनः कलेव काचित् विदुषी व्यराजत ॥ ५९ ॥

श्रीवल्लभा जलधिवल्लभवंशलक्ष्मीर्
धीवल्लभा विबुधकैरवराजिराका ।
शुक्लाम्बरा सदनुभावभुखी कुमारी
दिव्येन्दिरैव यमुनातट इन्दते सा ॥ ६० ॥

शोभया वल्लभा सागरस्य वल्लभवंशस्य लक्ष्मीः, धिया वल्लभा विदुषां कैरवाणां राजौ पूर्णिमा, शुक्लंवस्त्रं परिदधाना, सद्भिरनुभावैः युक्ता सा कुमारी मन्ये, दिव्या इन्दिरैव इह यमुना तटे प्रकाशते ॥ ६० ॥

आश्रोणिलम्बनवनीरदमुक्तकेशा
वाह्लीकबिन्दुरविबिम्बविशालभाला ।
नीलाब्जवामनयनाप्युपनेत्रवामा
सैवेन्दिरा वचसि भाति सरस्वतीव ॥ ६१ ॥

कटिप्रदेशं व्याप्तैर्नवाम्बुदसन्निभैः मुक्तकेशैर्युक्ताः, रविबिम्बनिभेन कश्मीरजबिन्दुना भूषितविशालभाला; नीलनीरजनयना; धृतोपनेत्राः सैव प्रसिद्धा इन्दिरा वचसि सरस्वतीव शोभते । व्यासपीठ इति शेषः ॥ ६१ ॥

दन्तत्विषा दलिततैमिरराशिरारात्
पद्मासनाद् गमितसर्वकथाप्रसङ्गा ।
व्यासासनं समधिरुह्य ससाधुवादा
व्याहर्तुमारभत भागवतं पुराणम् ॥ ६२ ॥

दशनदीधितिभिराराद् विद्यमानं तमोराशिं दूरमपसारयन्ती, पद्मासनेन निखिलां कथां कथयन्ती; सभ्यानां साधुवादैः सह व्यासासनं समधिरुह्य हरिकथां कथयितु प्रवृत्ता ॥ ६२ ॥

मन्दारजातिकरवीरसरोजहारैर्
धूपप्रदीपहरिचन्दनकाकतुण्डैः ।
प्रातः प्रपूज्य यमुनां यमयातनाघ्नीं
श्लिष्टैः स्तवीति मधुरैर्वचनैः कुमारी ॥ ६३ ॥

कुमारी सा कथाप्रारम्भात् प्राक् यमस्य यातनाया विनाशकारिणीं तरणिजां प्रातः सुरभिपुष्पैः, धूपदीपहरिचन्दनादिभिश्च सम्पूज्य मधुरैः श्लिष्टैः पदैः स्तवीति ॥ ६३ ॥

देवि प्रसीद जगदीश्वरि मे शरण्ये
भक्तप्रिये यदुपतेर्हृदयाब्जवासे ।
त्वामन्तरा न शरणं मम दारिकायास्
तस्मात् क्षमस्व दुरितानि च तानि तानि ॥ ६४ ॥

आश्रयभूते, भक्तप्रिये, भगवतः श्रीकृष्णस्य हृदयाब्जकोशे निवासकारिणि हे तरणिजे, त्वं मयि प्रसीद । यतो हि त्वां विना मम बालिकायाः किमपि शरणं नास्ति । अतो मम सर्वाणि दुरितानि क्षमस्व ॥ ६४ ॥

कृष्णप्रिये हरसि गोपवधूविटस्य
कृष्णं मनो यदिह वामतरङ्गरिङ्गैः ।
राधाप्रिये निजजने मयि कृष्णताया
आकर्षणे त्वकरुणा भवसीति चित्रम् ॥ ६५ ॥

कृष्णप्रिये हे तरणिजे, यदि त्वं स्वमनोहरतरङ्गैर्वल्लवीनां विटस्य श्रीकृष्णस्य कृष्णं कर्षकम्, अथ च कालुष्यपूर्णं मनो मोहयसि, तर्हि राधाभक्ते निजजने मयि विद्यमानायाः कृष्णताया आकर्षणे कथं त्वमकरुणा भवसीति चित्रम् ! ॥ ६५ ॥

व्रजाङ्गनानामकुलाङ्गनानां
वियोगवार्तां नयसे यदि त्वम् ।
त्वन्मात्रमेवं शरणं गताऽहं
कुमारिकैषाऽप्यनुकम्पनीया ॥ ६६ ॥

कुलरहितानाम्, अथ च दिव्यानां गोपीनां वियोगवार्तां यदि त्वं कृष्णस्य पार्श्वे नयसि, तदा त्वन्मात्रशरणाया ममापि कुमारिकाया उपेक्षा नैव कार्या ॥ ६६ ॥

तरणिजे यदि तीरनिवासिनां
हरसि कल्मषमत्र न ते यशः ।

तटदविष्ठनिवासकुमारिकां
यदि पुनीहि तदा विमलं यशः ॥ ६७ ॥

भानुजे, यदि तव समीपे तीरे निवसतां पापं प्रक्षालयसि, अत्र ते विशिष्टं महत्त्वं नास्ति। यदि तव तटदूरनिवासिनीमिमां मां कुमारीं पुनीहि, तदा ते महत्त्वम् ॥ ६७ ॥

एलालवङ्गमृगनाभितनागवल्लीं
जम्बूरसालकदलीफलमर्पयन्ती।
गीतानि संस्तवमयान्युपवीणयन्ती
विद्वत्प्रशंसितयशा अधिमञ्चभागात् ॥ ६८ ॥

सा कुमारी, एलालवङ्गकस्तूरीयुक्तानि ताम्बूलानि, जम्बूरसालकदलीफलानि च कलिन्दकन्यायै समर्प्य, मधुराणि स्तुतिगीतानि संश्राव्य विद्वद्भिः प्रशंसितहरिकथामण्डपस्य व्यासपीठमध्यारोहत् ॥ ६८ ॥

चिन्मुद्रया ललितदक्षिणपाणिपद्मा
वामञ्च वामजघने करमादधाना।
दिव्येन्दिरा जघनगौरवनम्रपीठा
द्राक्षोपमां हरिकथां कथितुं प्रवृत्ता ॥ ६९ ॥

जघने मनोहरं सव्येतरं हस्तं दधाना, जघनभाराद् व्यासपीठं किञ्चिदधः कुर्वन्ती दिव्या सेन्दिरा ज्ञानमुद्रया द्राक्षासमां भगवतः कथां कर्त्तुं प्रारभत ॥ ६९ ॥

व्यासासनस्य सविधे मृदुलासनस्था
मन्दस्मिता च सुदती परिधानधन्या।
देवी निकुञ्जलतिका लतिकेव जातेः
श्रोतुं कथां रसमयीमयते कदाचित् ॥ ७० ॥

व्यासपीठस्य समीपे कोमल आसन आसीना मन्दस्मिता समुज्ज्वलं परिधानं दधाना जातेर्लतेव काचन निकुञ्जदेवी रसमयीं कथां श्रोतुं कदाचित् कदाचित् तत्रागच्छति ॥ ७० ॥

तामिन्दिरां पीठगतां निरीक्ष्य
भ्राम्यन्ति सद्यः सदसः सदस्याः।
रामावतारः शुक एव साक्षाद्
वाग्देवताया अपरोऽवतारः ॥ ७१ ॥

व्यासपीठमुपगतां तां लक्ष्मीं निरीक्ष्य सदस्या भ्राम्यन्ति यद् रामारूपेण साक्षात् शुक एव, अथवा सरस्वत्या अवतारान्तरमेतत् ॥ ७१ ॥

कृष्णेति तत्त्वममृतं हृदयान्तरालात्
कुम्भद्वयेन सततं परिपाययन्ती।
राधा परा नुतपदा सदसः सदस्यैः
सम्भाविता कविवरेण विशुद्धबुद्ध्या ॥ ७२ ॥

अमृतं कृष्णेति तत्त्वं सदस्यैः पाययन्ती, तैश्च सभ्यैः प्रणतपदा सा परा राधेति कविवरेण शुद्धान्तःकरणेन सम्भाविता ॥ ७२ ॥

सा शब्दशय्या गलमाधुरी सा
विवेचना सा विषयस्य तस्याः।
वीणास्वनं सत्कविशब्दशय्यां
बलादतिक्राम्यति पण्डितायाः ॥ ७३ ॥

पण्डितायास्तस्याः कोमलकान्तपदावली सत्कवीनामपि शब्दविन्यासं कण्ठमाधुर्यञ्च वीणाध्वनिं विषयविवेचना च पण्डितांश्चापि बलादतिक्राम्यति ॥ ७३ ॥

शब्दार्थनित्यत्वविचारणायां
पतञ्जलेर्भाष्यमुदाहरन्त्याः ।
सद्युक्तिभिस्तत्तु विवेचयन्त्या
विज्ञत्वमालक्ष्यत शब्दशास्त्रे ॥ ७४ ॥

प्रसङ्गात् समुपस्थितस्य शब्दार्थयोर्नित्यत्वस्य फणिभाषितभाष्यफक्किकया सद्युक्तिभिश्च समर्थनेन शब्दशास्त्रे प्रगाढं पाण्डित्यं तस्या लक्ष्यते ॥ ७४ ॥

रसस्वरूपे परमे प्रमाणं
'रसः स वै' श्रौतमुदाहरन्ती।
विश्लेषयन्ती भरतस्य वाक्यं
साहित्यशास्त्रे भरतायते सा ॥ ७५ ॥

परमतत्त्वस्य रसरूपतायां प्रमाणत्वेन 'रसो वै सः' इति' श्रुतिवाक्यं प्रमाणयन्ती 'विभावानुभावसञ्चारिभावाद् रसनिष्पत्तिः' इति भरतस्य वाक्यं विवेचयन्ती सा साहित्यशास्त्रे भरत इव भाति ॥ ७५ ॥

तत्त्वज्ञताचारुविचारचारुः
शास्त्रान्तरं गोचरतामनैषीत्।
पदे पदे दर्शनशास्त्रशैल्या
व्याख्याति पङ्क्तीः सुदती सभायाम् ॥ ७६ ॥

तत्त्वज्ञानस्य निपुणनिरूपणशीला कस्यचित् सिद्धान्तस्य विचारावसरे शास्त्रान्तरमपि समुदाहरति । व्याख्याने तु पदे पदे दर्शनशास्त्रशैलीमनुसरति ॥ ७६ ॥

संस्थाप्य मुक्तिं प्रबलैः प्रमाणैः
सिद्धौ च तस्याः सततं वितृष्णाः ।
कलत्रसक्ता विबुधा हि शश्वत्
वाञ्छन्ति तान्नो यदहो प्रमादः ॥ ७७ ॥

केनापि प्रसङ्गेन प्रबलैः प्रमाणैः मुक्तिं संस्थाप्य पण्डिताः कलत्रसक्तां मुक्तिं नेच्छन्ति इत्यहो प्रमादस्तेषामिति साटोपं व्याख्यत् ॥ ७७ ॥

स्वराणां भेदमात्रेण कथमर्थान्तरं भवेत् ।
'इन्द्रशत्रुर्हि वर्द्धस्व' वैदिकाख्यानमित्यपि ॥ ७८ ॥
तत्रोपस्थितविख्यातान् शाब्दिकान् मोहमानयत् ।
अहो हो माधुरी कण्ठे शब्दशास्त्रे च चातुरी ॥ ७९ ॥

एकस्य स्वरस्योच्चारणप्रसङ्गेऽपरस्य स्वरस्योच्चारणे कथमर्थभेदो भवतीत्यत्र वैदिकाख्यानमुदाहृत्य तत्र समुपस्थितान् शाब्दिकाननेकान् व्यामोहयंत् सा विदुषी, बुधाश्च 'अहो कण्ठे माधुरी, शब्दशास्त्रे च चातुरी' इति मुहुर्मुहुः प्राशंसन् ॥ ७८-७९ ॥

राजाधिराजमधुराधिपराजधान्यां
पीयूषवर्षि वचनं भगवत्कथाग्राम् ।
श्रोतुं पयोदपटलं सततं समागाद्
भूतिर्मनो हरति भूतिमतोऽपि हन्त ॥ ८० ॥

भगवतः श्रीकृष्णस्य राजधान्यां मथुरायां कथाकाले सुधोपमं वचनं निशम्य पयोदोऽपि समागतः । ननु ऐश्वर्यसन्पन्नोऽपि पयोदः कथं समागतः ? इत्यत आह—भूतिमतोऽपि मनोभूतिर्हरति ॥ ८० ॥

इत्थं पुराणवचसाऽऽश्रितशास्त्रसारा
सा दूरभाषविनियन्त्रितशब्दवारा ।
निष्ठापरान् सदसि भागवतान् बुधांश्च
प्राबोधयत् कमलराशिमिवेनभासा ॥ ८१ ॥

सर्वशास्त्रवित् सा विदुषी ध्वनिविक्षेपकयन्त्रेण प्रसारितशब्दकदम्बा पूर्वोक्तप्रकारेण श्रीमद्भागवतवचसा भक्तियुक्तान् श्रद्धावतो बुधाँश्च सूर्यस्य तेजसा कमलराशिमिव प्राबोधयत् ॥ ८१ ॥

राजद्विशालपटमण्डलमण्डपान्तर्
दूरागताः प्रवयसो युवजानयश्च ।
बालाश्च नव्यपरिधानविराजमानाः
पारेसहस्रमनुभूषितवन्त आसन् ॥ ८२ ॥

रमणीयविशालवस्त्रमण्डपे दूरादागता वृद्धा युवानो बालाश्च नूतनैर्वस्त्रैः शोभमानाः श्रीकृष्णकथां श्रोतुं सहस्रसंख्याकास्तत्रोपस्थिता आसन् ॥ ८२ ॥

नवीननेपथ्यसुवर्णवर्णास्
तमालकेशैर्जघनावलम्बैः ।
अकालधाराधरचारुशम्पाश्
चन्द्रानना भान्ति विनीतमुद्राः ॥ ८३ ॥

जघनपर्यन्तं गच्छद्भिस्तमालनीलैः केशैर्विभूषिता धृतनवीनवस्त्राभरणाः सुवर्णकान्तयोऽकाले समुदिते मेघे विद्युल्लता इव शान्ताकाराश्चन्द्राननना व्रजवाला भान्ति ॥ ८३ ॥

सभैकभागे मथुरारमण्यः
श्रीगुर्जरस्यापि ललामवामाः ।
सौन्दर्यमाधुर्यविशिष्टवेशैः
परस्परं चाधिकमाह्वयन्ते ॥ ८४ ॥

सभाया एकस्मिन् भागे मथुराया रमण्योऽपरतश्च गुर्जरदेशस्य ललामा वामास्तत्रोपविष्टाः सौन्दर्येण माधुर्येण च परस्परं स्पर्धन्ते ॥८४॥

व्रजांगनास्ता मथुरानगर्यास्
त्रिंशत्समा यौवनमत्तदेहाः ।
चोलीपिनद्धैः कुचमण्डलाग्रै र्
वृद्धास्तदन्या अपि यौवनाढ्याः ॥ ८५ ॥

त्रिंशद्वर्षदेशीया मथुराया व्रजाङ्गना यौवनमत्तदेहाः प्रतिभान्ति स्म । किन्तु चोलीपिनद्धकुचमण्डला गुर्जरदेशस्य वृद्धा अपि युवतय इव लक्ष्यन्ते स्म ॥ ८५ ॥

व्यासेन्दिराया हरिकीर्तिगानं
ताभिः कथायामनुगीयमानम् ।
सुधोपमं किन्नरसाधुगीतं
नित्यं सभायामधरीकरोति ॥ ८६ ॥

कथाप्रसङ्गे व्यासपीठं समुपविष्टाया भगवद्गुणान् गायन्त्याः साक्षादिन्दिरायास्ताभिश्चानुगीयमानं हरिकीर्त्तनं किन्नरगीतं सुधोपममपि सभायामधरीकरोति ॥ ८६ ॥

दूष्यस्य तस्यैकतमः प्रदेशो
विराजते केणिकयाऽत्र चार्वा ।
हरेः सपर्याविविधोपचारो
विधीयते गुर्जरगौरदारैः ॥ ८७ ॥

तस्य दूष्यस्य (तम्बू) एको भागो मनोहरया केणिकया (रावटी) शोभमान आसीत् । तत्र च भगवत्पूजायाः सर्वेऽप्युपचारा गुर्जरललनाभिः सम्पाद्यन्ते स्म ॥ ८७ ॥

स्थालेष्वनेकेषु विभिन्नरंगैः
सुचित्रितैः स्वस्तिकचित्रचित्रैः ।
कर्पूरधूपागरुदीपकाद्यैर्
नीराजनं मङ्गलगीतवाद्यैः ॥ ८८ ॥

अनेकै रङ्गैः सुचित्रितैः स्वस्तिकचित्रैः संभूषितेषु स्थालेषु स्थापितैः कर्पूरधूपागरुदीपकैर्मङ्गलगीतवाद्यैः सह भगवतो भक्ता नीराजनं कुर्वन्ति ॥

तन्मण्डपस्य सविधे च विशालमेकं
पाषाणमण्डपवपुर्नितरां विभाति ।
तत्रैव कुट्टिमतले मृदुमध्यपीठे
राधामुरारिचरणौ नितरां विभातः ॥ ८९ ॥

तस्य मण्डपस्य समीपे एको विशालः पाषाणमण्डपो विभाति । तत्रैव कुट्टिमतले मृदुनि मध्यपीठे स्थापितौ राधामुरारिचरणौ कामं विभातः ॥ ८९ ॥

तस्मिन् विशालभवने किल पंक्तिबद्धा
नानापुराणनिगमागमपारयाताः ।
ते माथुरा विमलचन्दनलिप्तभालाः
पारायणे कृतधियश्च गृहीतभङ्गाः ॥ ९० ॥

तस्मिन् विशाले भवनेऽनेकशास्त्रपारदृश्वानो निर्मलचन्दनचर्चितभालाः पीतभङ्गा माथुरा विद्वांसो भागवतस्य पारायणे संलग्ना आसन् ॥

शुक्लोत्तरीयलसदंसविशालकाया
वृद्धास्तथा कलितकम्बुविशालकण्ठाः ।

श्रीगोमुखीलसितदक्षिणपाणिभागा
गृह्णन्ति निष्क्रयमिहागतपूजकेभ्यः ॥ ९१ ॥

शुक्लेनोत्तरीयेण भूषितांशा विशालशरीराः तुलसीमालया सम्भृत-कण्ठा दक्षिणकरशोभितगोमुखीका ब्राह्मणा दूरादागतेभ्यो यजमानेभ्यो दक्षिणां गृह्णन्ति ॥ ९१ ॥

अन्येऽप्यगुर्जरभुवो विबुधा वरेण्याः
शिष्टाश्च शास्त्रनिपुणा धृतविप्रवेशाः ।
ग्रन्थं निधाय पुरतो नतमस्तकाश्च
पारायणं विदधते भगवत्कथायाः ॥ ९२ ॥

अन्येऽपि गौर्जराः शिष्टाः शास्त्रनिपुणा विप्रवेशा विबुधा अग्रे ग्रन्थं निधाय नतमस्तकाः सन्तः भगवत्कथायाः पारायणं कुर्वन्ति ॥ ९२ ॥

परिसरभुवि तस्योद्यानदेशस्य तस्यां
जनहितपरिपूर्त्तौ नव्यकोषालयोऽपि ।
अशनशयनसिद्धौ पाकशय्यालयौ च
सकलभुवनलक्ष्मीर्नृत्यतीवात्र नित्यम् ॥ ९३ ॥

प्रसिद्धस्य तस्यारामस्य परिसरभूमौ जनहिताय नवीन एकः कोषा-लयोऽपि निर्मितोऽभूत् । अशनाय शयनाय च पाकालयो विश्रामालयश्च निर्मितावास्ताम् । मन्ये, सकलभुवनलक्ष्मीरत्र नित्यं नृत्यति ॥ ९३ ॥

प्रतिदिवसमजस्रं द्वारदेशे समस्ते
विविधमृदुलशय्यं वाहनं चाप्यनेकम् ।
धनपतिपरिवारं वोढुमासीत् समन्ताद्
इह जगति विशाले सम्पदां वै महत्त्वम् ॥ ९४ ॥

प्रतिदिनं नित्यं सकले द्वारदेशे विविधाभिर्मृदुलाभिः शय्याभियुक्त-मनेकं वाहनमासीत् । तच्च धनिकान् वोढुं द्वारदेशे स्थित आसीत् । विशाले इह जगति सम्पदामेव महत्त्वमस्ति ॥ ९४ ॥

आसन् प्रबन्धकुशला बहवः समाजे
बच्चूपटेल इव नास्त्यपरः सुशीलः ।
सन्दृश्यते चतुरता नितरां समाजे
धन्याः क एव कुलशीलमहो भजन्ते ॥ ९५ ॥

तत्र समाजेऽनेके प्रबन्धप्रवीणा आसन्, किन्तु श्रीबच्चूपटेलः सर्वतः कुलशीलगुणसम्पन्न आसीत् । समाजेऽनेके चतुराः सन्ति, परन्तु कुलीना विरला एव लभ्यन्ते ॥ ९५ ॥

इत्थं दिनानि कतिचिन्मयका निवासात्
संवाहितानि यमुनापुलिनेऽतिकान्ते।
आकर्णिता भगवतो मधुराश्च वाचो
नीतञ्च जन्म सुखितां भवतापतप्तम् ॥ ९६ ॥

एवं यमुनायाः कमनीये कूले निवसता मयाऽनेकानि दिनानि व्यतीतानि, भगवतः श्रीकृष्णस्य भवतापहारिणी कथा च श्रुता। संसारतापपरीतञ्च जन्म सुखितं नीतम् ॥ ९६ ॥

श्रीचन्द्रशेखरबुधात् प्रियमङ्गलायां
जातः प्रसादपदलाञ्छितकालिकाख्यः।
तेन प्रणीतकविकर्मणि माथुरोक्तौ
पूर्ति त्रयोदश इतोऽयमगाद्धिसर्गः ॥ ९७ ॥

यस्य श्रीचन्द्रशेखरः पिता, माता च मङ्गला, तेन श्रीकालिकाप्रसादशुक्लेन विरचिते राधाचरितकाव्ये मथुरावर्णने त्रयोदशः सर्गः समाप्तिमगमत् ॥ ९७ ॥

इति देवरिया (देवपुरी) मण्डलान्तर्गतकुशीनगरदक्षिणसार्द्धक्रोशत्रय-
परिमितमठियाशुक्लाभिधेयग्रामवास्तव्येन सरयूपारीणगर्गवंशावतंसेन
श्रीचन्द्रशेखरशुक्लात्मजेन वाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्या-
लये वेदवेदाङ्गसंकायस्य व्याकरणविभागस्य चाध्यक्षचरेण प्राप्त-
शब्दशास्त्रादिपरिशीलनपाटवेन 'वाचस्पति' इत्युपाधिभूषितेन
प्राप्तस्वर्णपदकेन श्रीजानकीजानिना व्याख्यातसम्पा-
दितानेकग्रन्थेनाचार्यश्रीकालिकाप्रसादशुक्लेन विरचिते
श्रीराधाचरितमहाकाव्ये त्रयोदशः सर्गः समाप्तः ॥



खद्योतमुद्द्योतयुतं निरीक्ष्य
निशाधिनाथो न हि मन्युमेति।
राधापदध्यानपरश्रयत्नं-
दयालवः सत्कवयः क्षमन्ताम् ॥

परिशिष्टम्

प्रकीर्णकश्लोकाः

(१)

राधामाधवयोः केली राधामाधवयोरिव ।
कालिन्द्याः शाद्वले कूले दुकूलेऽलं विराजताम् ॥

(२)

स्निग्धच्छायतमालानां मालाभिरभिमण्डिते ।
कदम्बानां कदम्बेन कृशतापदिवाकरे ॥

(३)

कालिन्दीलोलकल्लोलैः क्षपिताघपरम्परे ।
हंससारससंगीते कलकूजितकोकिले ॥

(४)

भृङ्गपीतमरन्दालिप्रफुल्लसरसीरुहे ।
पिबद्वत्सघटोध्नोभिर्निवारितवसुन्धरे ॥

(५)

उमाकान्तिघनश्यामो राधाविद्युल्लताङ्कितः ।
माधवः पुलिने कान्ते वंशीनादं कलं जगौ ॥

(६)

वृन्दारकाङ्गनाः कम्रा गलदंशुककञ्चुकाः ।
सुराणां निजनाथानां मनोरथपदं ययुः ॥

(७)

अधरीकृतगन्धर्वो मधुरीकृतगोव्रजः ।
सरसीकृतयोगीन्द्रो वंशीरावो द्विधाऽभवत् ॥

(८)

वासन्तीकुसुमासक्तः स्निग्धो वाति समीरणः ।

कलिन्दनन्दिनीतीरे मन्दं मन्दं स्वभीप्सितः ॥

(९)

मयूराः प्रमदस्वान्ता वनराजिलतातले ।
नृत्यन्ति प्रमदाभिश्च वंशीमधुरनिःस्वनैः ।।

(१०)

मत्तमातङ्गनिर्घोषैः शार्दूलोर्जितनिक्वणैः ।
खगालेर्विरुदावल्या वनालिः शब्दिताऽभितः ।।

(११)

सिंहा निर्मत्सराः सन्तो मृगैर्गोभिश्च संगताः ।
नृत्यन्ति रसधारायां निस्तटायां व्रजावनौ ।।

(१२)

रसप्रवाहविभ्रान्ताः व्रजबालाः कमप्यहो ।
गाढमालिङ्ग्य निश्चिक्युः परमेव पतिं स्वकम् ।।

(१३)

कान्ते निकुञ्जवृन्दे हि रसासारावगाहनाः ।
मृगैर्मृग्योऽनुकूल्यन्ते कण्डूयनशतैर्मुहुः ।।

(१४)

मदवारिकृतागाहाः करिणः करिणीः करैः ।
परिष्वज्यमुहुः प्रेम्णा चीत्कारं चारु कुर्वते ।।

(१५)

रसोदधौ तदा मग्नाः कवीनां कलमाः स्थिराः ।
भारती कच्छपी रुद्धा वाचस्पतिरेवाक्पतिः ।।

(१६)

रसस्य महिमानं तं वर्णयितुं क ईशते ।
अश्मनोऽपि रसं लान्ति शालग्रामस्य वैदिकाः ।।

(१७)

अत एव श्रुतिः स्पष्टं 'रसो वै सः' इति ब्रूते ।
ऋषिणा भारतेनायं सम्प्रदायः प्रवर्तितः ।।

प्रथमं परिशिष्टम्

ग्रन्थागताः सूक्तयः

[अत्र प्रथमोऽङ्कः सर्गं द्वितीयश्च श्लोकं बोधयति]

ग्रन्थागतश्लोकसूची

[अङ्कः पृष्ठाङ्कं बोधयति]

शोधनपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्ध पाठः	शुद्ध पाठः
४	३	मुरलीमधुरं	मुरली मधुरं
११	१४	श्रुत्या	श्रुत्वा
१४	२७	०तीरपङ्क	०तीरपङ्कं
१४	३०	वषभानु	वृषभानु
१७	७	रम्भावनान्त०	रम्भा वनान्त०
२६	१९	श्रुतिसम्भदान	श्रुतिसम्मदान
२६	१९	०ङ्गलिस्तन०	०ङ्गुलिस्तन०
२८	२३	कथमार्येरपि	कथमार्यैरपि
२८	२७	०मययं त्वद्वथो	०मद्वयं त्वथो
३०	३१	सुतदान	स्रुतदान
४४	२९	विभरयं	विधुरयं
४८	२७	लधुभाषिणी	मधुभाषिणी
४८	२७	परिगृह्यतां	परिगृह्य तां
४९	३४	द्वितीयः	तृतीयः
५२	१७	०मग्ननभावाः	मग्नभावाः
५३	२९	प्रारम्भभागाद०	प्रारम्भमागाद्०
५४	१	सेशुभे दिव	शुभे दिवसे
५४	२६	०पनतोन्नांसो	०पनतोन्नतांसो
५५	१	नवजकन्याकायाः	कजकन्यकायाः
५५	१९	मामा धव...विदन्ति	माधाधव...वदन्ति

पृष्ठे	पंक्तौ	अशुद्धपाठः	शुद्धपाठः
५६	२३	राधापदे	राधापदं
५८	५	संभूषिताभूषण०	संभूषिता भूषण०
६०	..	मक्तकीलाल०	मुक्तकीलाल०
६०	१३	अभिशरण०	अभिसरण०
६२	११-१२	प्रातरशाः कल०	प्रातराशाः कर०
७०	२०	गृहवृन्तान्त	गृहवृत्तान्तं
७१	२४	०मालाभधिशमनं	मालामधिशयनं
७५	१२	प्रमदभरो दधि०	प्रमदभरोदधि
७२	४	नभकिसलय०	नवकिसलय०
८३	२	कबरोचुम्बित	कबरीचुम्बित
८४	८	होलागीतै भङ्ग्या	होलागीतैर्भङ्ग्या
८६	११	कपोलपाली	कपोलपालीं
८९	३	चराच रस…तरांर	चराचरस्स…तरां
९१	४	कुमारभवनौ	कुमारमवनौ
९३	१९	मदुकाय०	मृदुकाय०
९५	१८	सरागवक्त्रौ	सरागवक्त्रो
९७	११	०कासितनना	कासितानना
९८	१५	धिलोक्य	विलोक्य
९८	२३	समर्चितै	समर्चितं
१००	७	०मंञ्जति	०मंज्जति
१००	११	०लभ्पट	०लम्पट
११०	१७	०मण्ढल	०मण्डल
११४	१५	०कान्तवक्तम्	०कान्तवक्त्रम्
११५	१०	विभिन्नरूप स्त्री	विभिन्नरूपस्त्री
११६	१५	वरां	परां
११८	११	रासरामा	रासरामाः
११८	१४	नदीष्णां	नदीष्णा

पृष्ठे	पंक्तौ	अशुद्धपाठः	शुद्धपाठः
१२०	२३	रखे	खे
१२०	१३	गोपवधू व्रजस्य	गोपवधूव्रजस्य
१२८	१२	युदतितति:	ध्रुपतितति:
१२८	१७	सुगन्धिनाते	सुगन्धिवाते
१३३	२६	षगाधनद्यः	अगाधनद्यः
१३५	२५	प्रनृत्यद्	प्रनृत्यद्-
१३६	१२	अक्षिप्ता	आक्षिप्ता
१३७	३१	कलानदीष्णे	कलानदीष्णो
१४२	९	वतं	वयं
१५१	२३	मखचन्द्रकान्तिः	मुखचन्द्रकान्तिः
१५५	२३	रमसि	रहसि
१५५	२७	हसिति०	हसित०
१५९	३	वनालिर्नं	वनालिः
१६३	२६	कामिनि०	कामिनी०
१६६	२८	माशीविशेषै०	माशीर्विशेषै०
१६७	२०	परी क्षणार्थं	परीक्षणार्थं
१७६	१५	पूजनायविधिम्	पूजाविधिम्
१७७	२५	वण्टानिनादै०	घण्टानिनादै०
१८०	२१	वक्षौज०	वक्षोज०
१८१	३२	रतः सहस्र	रतेः सहस्रं
१८८	१३	०नामकस्य	नायकस्य